२.५-

गान्धिशताब्द्यवसरे प्रकाशितम्

मागधम्

संस्कृतशोधवाङ्मयस्यं
तृतीयोदयः

गान्धि-दर्शनम्

संस्कृत-प्राकृत-विभागः,
एच्० डी० जैनकालेजः, आरा,
मगधविश्वविद्यालयः

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

मागधम्

[मगधविश्वविद्यालयस्याङ्गीभूतहरप्रसाददास-जैनकालेज-
संस्कृत-प्राकृत-विभागस्य संस्कृत-
शोधवाङ्मयस्य तृतीयोदयः]

गान्धि-दर्शनम्

संस्कृत-प्राकृत-विभागः
एच० डी० जैनकालेजः, आरा
मगधविश्वविद्यालयः

गान्धिजन्मदिनम्
२अक्तूबर १९६९
विक्रमाब्दः २०२६

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

मागधम्

संस्कृत-प्राकृत-विभागस्य संस्कृत-शोध-वाङ्मयस्य तृतीयोदयः

गान्धि-दर्शनम्

संरक्षकः

कुलगुरुः शिक्षाशास्त्री, श्रीविश्वमोहन कुमार सिन्हा

मगधविश्वविद्यालयस्योपकुलपतिः

प्रेरकः

डॉ० परमहंसरायः

एम्० ए०, पी-एच० डी० (लन्दन)

आरास्थहरप्रसाददासजैनकालेजस्य प्राचार्यः

सम्पादकः

लब्धस्वर्णपदकः, प्रो० डॉ० नेमिचन्द्र शास्त्री

एम्० ए० (संस्कृत-प्राकृत-हिन्दी), पी-एच० डी०, डी० लिट्०,

ज्योतिषाचार्यः, न्याय-काव्य-ज्योतिषतीर्थश्च

संस्कृत-प्राकृत-विभागाध्यक्षः—आरास्थ एच्० डी० जैनकालेजस्य

संयोजकौ

श्रीरामनाथपाठकः 'प्रणयी'

एम्० ए० (संस्कृत-प्राकृत), साहित्यव्याकरणायुर्वेदाचार्यः

डॉ० राजारामजैनः

एम्० ए० (प्राकृत-हिन्दी), पी-एच० डी०,

आरास्थहरप्रसाददासजैनकालेजस्य

संस्कृत-प्राकृत-विभागस्य प्राध्यापकौ

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

प्रकाशिका
बाणभट्ट-परिषद्,
एच० डी० जैनकालेज:,
आरा (बिहार)

तृतीयोदय:
अक्तूबर १९६९

मुद्रक
बाबूलाल जैन फागुल्ल
महावीर प्रेस,
भेलूपुर, वाराणसी-१

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

विषयानुक्रमणिका

१. जयतु जयतु भुवि मोहनदासः

श्रीरामनाथ पाठकः 'प्रणयी' मुखपृष्ठम्

२. सम्पादकीयम् १

डॉ० नेमिचन्द्र शास्त्री, एम० ए० (त्रयम्)
पी-एच० डी०, डी० लिट्
संस्कृत-प्राकृतविभागाध्यक्षः,
आरास्थ एच० डी० जैन कालेजस्य

३. गांधी-विचारधारायामाधृतमर्थशास्त्रम् ४४

डॉ० परमहंसरायः
एम० ए०, पी-एच० डी० (लन्दन)
प्राचार्यः आरास्थ एच० डी० जैन कालेजस्य

४. तन्त्रयन्त्रदर्शनम् (चर्खादर्शनम्) ४९

डॉ० राजाराम जैनः, एम० ए० (द्वयम्), पी-एच० डी०
प्राध्यापकः, संस्कृत-प्राकृत-विभागीयः
आरस्थ एच० डी० जैन कालेजस्य

५. महात्मगान्धिनः शिक्षादर्शनम् ५५

श्रीवाचस्पति द्विवेदी, एम० ए० (द्वयम्)
एम० एड०, साहित्याचार्यः
संस्कृत-विभागाध्यक्षः आरास्थ महाराजा कालेजस्य,

६. महात्मगान्धिनामीश्वरदृष्टिः ५९

डॉ० जगन्नाथ पाठकः, साहित्याचार्यः
एम० ए० (द्वयम्) पी-एच० डी०
अध्यापकः, आरास्थराजकीयसंस्कृतोच्चविद्यालयस्य

७. महात्मगान्धिन ईश्वरदर्शनम् ६२

श्री रञ्जन सूरिदेवः, साहित्याचार्यः
कार्यकारि-सम्पादकः, परिषद् पत्रिकायाः (त्रैमासिक्याः)
पाटलिपुत्रस्थविहार-राष्ट्रभाषा-परिषदः

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

८. गान्धि-ज्ञानमीमांसा ६८

श्रीदशरथसिंहः, एम० ए० (लब्धस्वर्णपदकः)
प्राध्यापकः दर्शनविभागीयः
आरास्थ एच० डी० जैनकालेजस्य

९. गान्धि-नीतिदर्शनम् ७८

श्रीकञ्छेदीलाल एम० ए०: साहित्याचार्यः
अनुसन्धित्सुः संस्कृत-प्राकृत-विभागीयः
आरास्थ एच० डी० जैन कालेजस्य

१०. महात्मगान्धिनः जीवनदर्शनम् ८४

गोविन्द नरहरिवैजापुरकरः
एम० ए०, न्याय-वेदान्तसाहित्याचार्यः
प्राध्यापकः, वाराणसेयस्याद्वादमहाविद्यालयस्य

११. गान्धिनः शिक्षा-क्रान्तिः ९६

श्रीरामनाथ पाठकः 'प्रणयी' एम० ए० (द्वयम्), डिप-इन-एड,
साहित्यव्याकरणायुर्वेदाचार्यः
प्राध्यापकः, संस्कृत-प्राकृत-विभागीयः
आरास्थ एच० डी० जैन कालेजस्य

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

जयतु जयतु भुवि मोहनदासः !

जयतु जयतु भुवि मोहनदासः !
भारतवर्ष - विभूति - विलासः !!

यो गन्धीति प्रसिद्धिं यातः,
यस्य मनसि गर्वो नायातः,
यो 'बा'-हृदय-ललितमधुमासः !
जयतु जयतु भुवि मोहनदासः !!

मानवतायाः जीवन - दाता,
मानवतायाः भाग्य - विधाता,
सत्याग्रह-हित-विहित - प्रयासः !
जयतु जयतु भुवि मोहनदासः !!

बहु-जन-हित - कामनासु लीनः,
बहु-जन-सुख-साधना - प्रवीणः,
प्रेम - भावना यस्योच्छ्वासः !
जयतु जयतु भुवि मोहनदासः !!

यस्याहिंसा परमं शस्त्रन्,
येन धृतं करनिर्मितवस्त्रम्
सत्ये यस्य परमविश्वासः !
जयतु जयतु भुवि मोहनदासः !!

येनात्मनि निर्भयता नीता
कण्ठे यस्यागुञ्जद्गीता,
पीडायामपि यस्योल्लासः !
जयतु जयतु भुवि मोहनदासः !!

श्रम - संयम - सेवा - संलग्नः,
राम - नाम-रस - सागर - मग्नः,
यस्य शुद्धि-संबलमुपवासः !
जयतु जयतु भुवि मोहनदासः !!

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

अस्पृश्यानामश्रु—धनानाम्,
वन्धुरीश्वरो दीनजनानाम्,
येन कृतो ग्रामीण-विकासः!
जयतु जयतु भुवि मोहनदासः!!

त्यागमयी यस्यार्थिक-समता,
ज्ञानमयी यस्यात्मिकममता,
येन नाशितो भवसंत्रासः!
जयतु जयतु भुवि मोहनदासः!!

यः कथितो लोकैरवतारः,
सेवा - ग्राममहर्षिरुदारः,
छिन्नो येन दासता - पाशः!
जयतु जयतु भुवि मोहनदासः!!

यस्य दर्शने जीवन - शिक्षा,
यस्य जीवने कठिन - परीक्षा,
दिशि-दिशि दीव्यति यस्य प्रकाशः!
जयतु जयतु भुवि मोहनदासः!

प्रो० रामनाथ पाठकः 'प्रणयी'

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

सम्पादकीयम्

प्रास्ताविकम्

विंशतितमा शताब्दी भारतवर्षस्येतिहासाय परममहत्त्वपूर्णास्ति। अनया शताब्द्या चिन्तनक्षेत्रे महात्मनो गान्धिनः, काव्यक्षेत्रे रवीन्द्रनाथठक्कुरस्य तथा शिक्षाक्षेत्रे महामनोमदनमोहनमालवीयस्य जन्मभिरभूतपूर्वं कार्यं कृतम्। महात्मा गान्धी त्वेतादृगसाधारणो महापुरुष आसीत्, येन भारतस्य सांस्कृतिकेतिहासे राजनैतिकेतिहासे चानेकानि मौलकचिन्तनानि समुपस्थापितानि। तेनाहिंसासदृशमस्त्रं प्रदाय देशः स्वतन्त्रो विहितः। एवं राष्ट्रपिता महात्मा गान्धी स्वस्य तपसा त्यागेन चिन्तनेन च नवीनां विचारधारां विश्वहिताय कल्पितवान्। तादृशः सर्वतोमुखचिन्तकः शङ्कराचार्यानन्तरमेकसहस्रवर्षावधौ नान्यः कोऽप्यजनि। अस्माकं दृष्ट्या महात्मा गान्धी श्रमणपरम्पराया एतादृशः सन्त आसीत्, यो वर्गभेदं जातिभेदं तथान्योच्चावचभावनामुन्मूल्य समतायाः सिद्धान्तं प्रतिपादितवान्। स्वामी श्रीभगवदाचार्यमहाराजः कथितवान्—

सदैव तद्वाञ्छति मुक्तिमेकिकां विदेशिसत्तामिह तन्न काङ्क्षति,
न चापि तत्कामयते कदाप्यथो विदेशिसेना-विधृतां सहायताम्।
अहिंसकेनैव बलेन तत्क्षमं समर्जितुं स्वस्य महास्वतन्त्रताम्।[1]

अर्थात् विदेशिभ्यो भारतस्य मुक्तिः केवलाहिंसकशक्त्यैव सम्भाव्यते, या शक्तिः शतघ्न्यादिषु द्विनलिकासु च नास्ति। सा शक्तिरहिंसायां संयमे चास्ति। यदा मनुष्यः स्वार्थे पतति, तदा दासतागत्य तमावेष्टितं करोति। आत्मशक्तेरेकमात्रं जागरणोपायआत्मनियन्त्रणमेवास्ति। यः स्वतन्त्रतां समीहते, तस्मिन्नात्मबलस्यापेक्षा वर्तते। आत्मबलाभावे जनः स्वतन्त्रः न स्थास्यति। स्वतन्त्रतायाः स्वादं सैव जातिर्व्यक्तिर्वा लभते, यस्त्यागं तपश्चरणं वा स्वीकरोति। गान्धिना कथितम्—

---

१. पारिजातसौरभम्—पण्डितराजस्वामिश्रीभगवदाचार्यविरचितम्; द्वितीयः सर्गः श्लोकः ६०,६१ तथा द्रष्टव्यम्
In search of the supreme, Vol I, Nava jivan publishing House Ahmedabad—14, 23–24

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

"हिंसायाः परिणामो वहुधा विपरीत एव भवति। अस्माकं देशे वहवो जना नैतिकदृष्टिमपहाय केवलं व्यावहारिकदृष्ट्यैव विचारयन्ति। किन्तु वयं हिंसामार्गं सारहीनं विचार्य परित्यक्तवन्तः। भारते हिंसया विनाश एव भविष्यति।'''''''
निश्चितमिदं यत् यः साहसं कृत्वा कार्यक्षेत्रेऽग्रसरो भवति, विजयवैजयन्ती तमेव वृणीते।[1]"

महात्मा गान्धी देशस्य राष्ट्रस्य समाजस्य वैयक्तिकजीवनस्य चोहापोहनं कृत्वैकां जीवनप्रक्रियां प्रतिपादितवान्। सा प्रक्रिया प्रकारान्तरेण दर्शनाभिधानं प्राप्नोति। पारिजातसौरभेऽस्य चिन्ताधारायाः विश्लेषणं विवेचनञ्च विद्येते—

लुण्ठितानि सकलानि यन्नृणां द्रव्यवासवसनादिकानि ह।
तान्कथं सुसुखितान्विदध्महे चिन्तयेति न शमं लभामहे॥[2]

× × ×

सर्ववर्णजनतोपभुक्तये भूरियं च भविता निरावृता।
या प्रवर्त्तत इहाद्य भावना सा सती भवतु दीर्घजीविनी॥
ब्राह्मणाश्च वणिजश्च मुस्लिमा अन्त्यजा अपि भुवीह सर्वदा:
सर्वमानवहितानुगामिनीं कांचनापि सुकृतिं वितन्वताम्॥
नाहमस्मि मुखजो न वाहुजो नोरुजात इति नास्मि पादजः।
नैव हिन्दुरथ नैव मुस्लिमः सर्व एव मयि सर्वगोऽप्यहम्॥[3]

महात्म-गान्धि-दृष्टया दर्शनम्

दर्शनं मनुष्यस्यैको निष्पक्षो वौद्धिकप्रयत्नोऽस्ति, येनासौ विश्वं तस्य सम्पूर्णतायां ज्ञातुं प्रयतते। वस्तुतः कस्यापि वस्तुनः ज्ञानप्राप्तेः साधनद्वयमस्ति। प्रथमं साधनं तदस्ति, यस्मिन् वस्तुनोंऽशान् पृथक्-पृथक् कृत्वा समस्तवस्तुनः ज्ञानं प्राप्यते तथा द्वितीयं साधनं तदस्ति, यस्मिन् समग्रवस्तुनः ज्ञानमवाप्यते।

वौद्धिकप्रयत्नेन सह दार्शनिकचिन्तनं तदैव पुष्टं मन्यते, यदात्मानुभूतिरपि तेन सहावस्थिता भवेत्। मनुष्ये चिन्तनस्योत्पत्तिः स्वाभाविक्याः जिज्ञासायाः फलस्वरूपा विद्यते। अतः स जीवनं जगच्च ज्ञातुं यतते। मनुष्यो जीवति तथा स ज्ञातुं प्रयत्नं करोति यदसौ कथं जीवति तथा तस्य जीवनस्य कोऽर्थोऽस्ति ? तस्य

---

१. भारतीयम्, विष्णुप्रकाशनम्, गया, सन् १९६२ ई०, पृ० ३६५
२. पारिजातसौरभम्, पण्डितश्रीभगवदाचार्यः, ६।५१
३. सैव ६।७१–७३

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

जीवनेऽन्यजीवजीवनेषु च किं पार्थक्यम् ? मनुष्यः केवलजीवनेनैव न तुष्यति, स जीवनस्यार्थं जिज्ञासते । तस्येयं जिज्ञासोत्तरोत्तरं वर्द्धते तथा तस्य चिन्तनप्रक्रिया गतिशीला भवति । जीवनं जगत्कृते जायतेऽतः जीवनं वेत्तुं जगतः परिज्ञानं परमावश्यकमस्ति । सः पश्यति यत् पुष्पाणि विकसन्ति तथा पुनः शीर्णानि जायन्ते; आकाशे मेघाः दृश्यन्ते तथा पुनरितस्ततो विलीयन्ते । वसन्तस्य मादकतया सह ग्रीष्मस्य तप्तः पवनोऽपि चलति । चिन्तनशीलमानवः एतन्निखिलदृश्यानामर्थं ज्ञातुं समीहते तथा मानवजीवनेन सह वर्त्तमानसम्बन्धानां विश्लेषणं चिकीर्षति ।[१]

घटनानां कारणेषु विश्लेषितेषु प्रतीयते यत् प्राकृतिकघटना अपि कार्यकारणनियमानुसारं घटिताः भवन्ति । एवं प्रकारेण चिन्तनशीलमानवः जीवन-जगतोः कार्यकारणसम्बन्धं ज्ञातुं प्रयासं करोति, तथैष एव तदीयः प्रयासः दार्शनिकचिन्तनमस्ति । दार्शनिकस्य बौद्धिकी यात्रा तदैव समाप्ता भवति, यदासौ जीवनजगतोरर्थं ज्ञातुं प्रभवति ।[२]

भारतीयपद्धत्यनुसारं सर्वविधानुभूतीनां युक्तिसङ्गतां व्याख्यां विधाय वास्तविकतायाः यथार्थज्ञानं दार्शनिकताया उद्देश्यमस्ति । अनुभूतयो द्विप्रकाराः भवन्ति ऐन्द्रियाः, अतीन्द्रियाश्च । उभयोरपि गणना दर्शनसूत्रे भवति । वयं संसारस्य भौतिकपदार्थानां ज्ञानमिन्द्रियैः कुर्मः, यान् पदार्थान् नेन्द्रियाण्यवगच्छन्ति, तेषां ज्ञानमतीन्द्रियानुभूत्या प्राप्यते । एषाध्यात्मिक्यनुभूतिः बौद्धिकज्ञानसदृशी न भवति । बौद्धिकज्ञाने ज्ञातृज्ञेययोः द्वैतं तिष्ठति, परमस्यामनुभूत्यां द्वयोरप्यैक्यं जायते । एषात्मानुभूतिरनायासं प्राप्यते । एतस्यै साधनाया आवश्यकता भवति । साधनाया अर्थोऽस्ति मनोवाक्बुद्धि-भावनाचेष्टाः पवित्राः परिमार्जिताश्च सम्पाद्य एकस्यां विशेषदिशि तत्प्रेरणा । एतासां कस्मिन् कस्यामपि वा दुष्टे, दुष्टायां वा साधना दूषिता जायते । अनवरतं साधनायाः फलस्वरूपं साधकस्य परमतत्त्वस्यानुभूतिर्भवति, एषैवानुभूतिराध्यात्मिक्यनुभूतिरस्ति ।

महात्मनो गान्धिनो विश्वासोऽस्ति यद्दार्शनिकचिन्तनस्योत्पत्तिः जिज्ञासया नाभवत्, प्रत्युत दुःखमात्रस्य नाशाकाङ्क्षया भवति तथैतस्योद्देश्यं मोक्षप्राप्तिर्विद्यते । मोक्षप्राप्तिश्च तदा भवति यदा साधकस्य परमतत्त्वस्य साक्षात्कारो भवति । जिज्ञासामात्रस्य शमनं दर्शनस्य लक्ष्यं नास्ति । तस्य लक्ष्यं तु जीवनस्य परम-

---

३. In scarch of the supreme Val II P. 320-323.

४. Cantemporaray Indian Philosophy, P 21, edited by Radhakrisnan, London, 1958

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

सुखस्य प्राप्तिर्विद्यते। एतदेव कारणमस्ति यत् भारतीयदर्शने जीवनमूल्यानां मीमांसाऽपि गर्भिता वर्त्तते।

वस्तुतः विश्वमिदं किमस्ति? एतत्कथमस्ति? एतस्योत्पत्तिश्च कथमभूत्? एतस्य वास्तविकस्वरूपं किमस्ति? घटनाः केनापि नियमेन घटिताः भवन्ति उत एवमेव वा? वास्तविकसत्ता काऽस्त? तस्याः ज्ञानं कथं भवितुमर्हति? सत्यज्ञानस्य स्वरूपं साधनं सीमाश्च काः सन्ति? ज्ञानाचारयोः कः सम्वन्धः? आचारस्य किंमानं मूल्यञ्चायाति? आचारस्य मूल्याङ्कनप्रक्रिया कथं केन प्रकारेण वा सम्भाव्यते? कीदृशमाचरणं कर्त्तव्यं कथ्यते? व्यक्तिसमाजयोः कानि कर्त्तव्यानि सन्ति? राष्ट्रेषु कीदृशः सम्बन्धोऽपेक्षितो विद्यते? तेषां सम्वन्धानामाधारभूताः सिद्धान्ताश्च के सन्ति? मनुष्यजीवनस्य किं लक्ष्यमस्ति? तस्य लक्ष्यपूर्त्तौ च केन प्रकारेण समाजस्य सहायतापेक्षिता वर्त्तते? मनुष्यः सौन्दर्यं कथं समीहते? सौन्दर्यस्य स्वरूपं किमस्ति? इत्यादिप्रश्नाः दर्शनेऽन्तर्हिताः सन्ति। एवं महात्म-गान्धि-प्रतिपादितदर्शनस्य विषयः व्यापको गहनो महत्त्वपूर्णश्च विद्यते। स हि व्यक्ति-समाजयोर्मध्ये उत्पाद्यमानानां विभिन्नप्रश्नानां समाधानमपि दर्शनसरण्यैव कृतवान्।[1]

महात्मगान्धिनो दर्शनस्य सर्वोत्तमा विशेषतैषा विद्यते यत् स हि जीवनस्य जगतश्च सर्वाङ्गीणमध्ययनमकार्षीत्। जीवन-जगतोः सम्वन्धे न कामपि समस्यां स परित्यक्तवान्। तस्य दार्शनिकचिन्तनं रागद्वेषरहितं निष्पक्षं युक्तिसङ्गतञ्चास्ति। तस्य मतं विद्यते यद् दार्शनिकविचार एवास्माकं गतिविधौ स्थिरत्वमानयति। जीवनं कीदृग्भविष्यति? तथा तादृग्जीवनेन कथं वयं विश्वकल्याणे योगं दास्याम एतत्सर्वमस्माकं दार्शनिकविचारेष्वेव पर्यवसितं भवति। वस्तुतः विना कमपि सैद्धान्तिकमाधारं जीवने श्रृङ्खला दृढता च नायास्यतः। आचरणे सामञ्जस्यानयनाय विचारे सामञ्जस्यमावश्यकं विद्यते। विचाराणां सामञ्जस्यं च तदानीमेव सम्भवमस्ति, यदा तेषामाधारशिलारूपेण जीवनजगतोः विषये समुचिताः सुदृढाश्च सिद्धान्ताः प्रस्तुताः भवेयुः। एते सिद्धान्ताः जीवनं प्रति व्यक्तिदृष्टिकोणं स्थिरं कुर्वन्ति तथा तस्य जीवनपर्यन्तस्य क्रियाणां मध्ये एकां श्रृङ्खलां समुपस्थापयन्ति। संक्षेपेण वयं महात्मगान्धिनो दार्शनिकविचारान् निम्नाङ्कितवर्गेषु प्रस्तुतान् करिष्यामः—

---

१. "हरिजन" पत्रम्—१९३४
Mahatma Gandhi P. 5-6, edited by S. Radhakrishnan, London, George Allen and un win Ltd (1949)

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

१ ईश्वरमीमांसा २ तत्त्वज्ञानम् ३ नीतिविज्ञानम् ४ जीवनदर्शनम् ५ सौन्दर्य मीमांसा ६ प्रमाणमीमांसा ७ अर्थदर्शनम् ८ समाजदर्शनम् ९ मूल्यमीमांसा ।

ईश्वर-मीमांसा

महात्मगान्धिन ईश्वरे पूर्णो विश्वासोऽस्ति । स ईश्वरस्यास्तित्वं स्वीकरोति । 'ईश्वरः सर्वज्ञः शक्तिशाली च विद्यते' तस्य पूजयोपासनया चात्मशक्तीनां विकासो जायते । गान्धिनोक्तम्—"अहमव्यक्तरूपेणावश्यमेवानुभवामि यद् यदा मामभितः सर्वं परिवर्त्तितं भवति, मृतमपि जायते, तदैषु परिवर्त्तनेष्वेका चिच्छक्तिरस्ति, यस्याः कदापि परिवर्त्तनं न भवति, या सर्वमेकत्र वद्ध्वा रक्षति, या नवां सृष्टि रचयति, एषैव शक्तिरीश्वरोऽस्ति । परमात्मा चापि कथ्यते । अहमिन्द्रियैः येषामनुभवं करोमि, तेषु नैकमप्यन्यद् वस्तु स्थायित्वमर्हति । अत एव 'तत्सत्' एकः स एवास्ति । सा च शक्तिः शिवरूपा स्यादशिवस्वरूपा वाहं तु तां शुद्धांकल्याणकारिणीमेव पश्यामि । यतोऽहं पश्यामि यन्मृत्युमध्ये जीवनं स्थितं भवति । असत्ये सत्यस्यास्तित्वं विद्यमानं जायते । अतोऽहं मन्ये यदीश्वरः जीवनमस्ति; सत्योऽस्ति; प्रकाशोऽस्ति । स एव च परममङ्गलमस्ति"[१] । अन्यत्रापि लिखितमस्ति—

"If we exist, if our parents and their parents have exited, then it is proper to belive in the parent of the whole creation."....There is orderliness in the universe, there is an unalterable law govrning everything and everything and every being that exists or iives. It is not a blind law; for no blind law can govern the conduct of living beings.... that law then which governs all life is God. Law ano Law-giver are one."[२]

स्पष्टमेतद् यन्महात्मगान्धिना अस्माकं मातृपित्रस्तित्ववदीश्वरस्याप्यस्तित्वं

---

१. महात्मागान्धी—धर्मपथ, छात्रहितकारी पुस्तकमाला, दारागंज, प्रयाग, १९३३ ई०, पृ० ५ तथा—
In search of the supreme, val II, P. 302-303
Wit and wisdom of Mahatma Ganphi, P. 116-120
The story of my Experiments with truth, P. 189-200

२. The Philosophy of Mahata Gandhi, university of calcutta (1968) P. 43.

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

स्वीकृतम्। अस्मिन्संसारे एका सुनिश्चितनियमपरम्परा चलति, अस्याः परम्परायाः सञ्चालिका सम्पादिका च काऽपि शक्तिरस्ति।

महात्मा गान्धीश्वरस्य साम्राज्यं हृदये मनुते। इन्द्रियज्ञानेनेश्वरबोधो न भवितुमर्हति। यः परमात्मसाक्षात्कारं करोति, तस्याचारे, व्यवहारे, चरित्रे च परिवर्त्तनानि जायन्ते। गान्धी लिखितवान्—"यः मनुष्य स्वयमेवेश्वरस्योपस्थितिं परीक्षितुं कामयेत, स श्रद्धया जीवितया तमनुभवितुमर्हति तथा श्रद्धाविश्वासौ बाह्यप्रमाणैरपरीक्ष्यावतः सुरक्षिततमो मार्गोऽस्ति संसारस्य नैतिकशासने विश्वासो नैतिकनियमश्च सत्यप्रेम्णोः सर्वोपरितायां श्रद्धाभावो विद्यते। यत्र सत्य-प्रेम-विरुद्धं प्रत्येकं वस्तु निराकृतं भवेत्, तत्र श्रद्धाविश्वासावलम्बनं सर्वाधिकं सुरक्षितं वर्त्तते। ...."अहं यावान् शुद्धो निर्विकारश्च स्थातुं प्रयते, मह्यं परमात्मा तावानेव समीपवर्त्ती ज्ञायते। अद्य तु मम श्रद्धा नाममात्रात्मिका विद्यते, परं यदा सा हिमालयसमाटला भविष्यति, हिमालयशिखरवर्त्तिहिमसदृशैव दिव्या शुभ्रा चं भविष्यति, तद्दिने मयि कियत्यधिका शक्तिर्भविष्यति।"[1]

स्पष्टमस्ति यत् महात्मागान्धीश्वरे विश्वसन् नैतिकतायै महत्त्वमददात्। श्रीधीरेन्द्रमोहनदत्तो लिखितवान् यन्महात्मगान्धिनो दृष्ट्या सत्यं शिवं सुन्दरमीश्वरोऽस्ति। ईश्वरस्य निवासस्तत्रैवास्ति यत्रेमे त्रयस्सहैव निवसन्ति।[2]

गान्धीमहोदय एकत्र लिखितवान् यन्ममेश्वरस्तु मम सत्यं प्रेम च वर्तते, नीतिरीश्वरोऽस्ति, सदाचारश्चेश्वरोऽस्ति, निर्भयतेश्वरोऽस्ति, ईश्वरः जीवनप्रकाशयोरेकं मूलमस्ति, पुनरपि सर्वेभ्य एतेभ्यः परोऽस्ति। ईश्वर अन्तरात्मैवास्ति, स नास्तिकानां नास्तिकताप्यस्ति। यतः स स्वामर्यादितप्रेम्णा तानपि जीवितान् रक्षति। स हृदयदर्शकोऽस्ति, वाण्याः बुद्धेश्च परोऽस्ति। वयं स्वयं यावदात्मनो जानीमः, स ततोऽधिकमस्मानस्माकं हृदयानि च जानाति। यथा वयं वदामः स तथैवास्मान्न जानाति, यतः स जानाति यद् वयं जिह्वया यं ब्रूमः, स एव भावोऽस्माकं प्रायो न भवति, तथैतत् कियन्तः ज्ञात्वा कुर्वन्ति कियन्तश्चाज्ञात्वैव। ईश्वरः तेषां कृते व्यक्तिरेवास्ति ये तं व्यक्तिरूपे समुपस्थितं दिदृक्षन्ति। यस्तं स्प्रष्टुमिच्छति, स-

---

१. धर्मपथ, छात्रहितकारीपुस्तकमाला, दारागंज, प्रयाग, पृ० ६-७ तथा—
In Search of the Supreme Val. I, Navajivan publishing house Ahmadabad, 80-90

२. The plilosophy of Mahatma Gandhi, Page 58-59

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

तस्मै शरीरं दधाति । स पवित्रतमं तत्त्वमस्ति । यस्य तस्मिन् श्रद्धास्ति, तस्मै एव तस्यास्तित्वमस्ति ।[1]

गान्धिमहोदयस्य विचारानुसारमीश्वरः परमसंवेदनशीलोऽस्ति । वयं यथान्यैः सह व्यवहारं कुर्मः ते तथैवास्माभिः सह व्यवहारं कुर्वन्ति । ईश्वरः परमदयालुः वर्तते । स सर्वैः सह दयापूर्वकं व्यवहारं करोति ।

गान्धिमहोदयः रामं मोक्षदातारं मनुते तथा तस्यैष रामोऽपि परमेश्वर एवास्ति । अस्य मते रामः केवलः दशरथपुत्रः नासीत्, अपितु अयं व्यापकः सर्वशक्तिमान् सर्वज्ञोऽस्ति अयं सर्वस्य जगतः स्थित्युत्पत्तिविनाशानां कारणं स्वतोऽकारणं जाग्रदाद्यवस्थानां समाधिसहितानामनुस्यूतं देहेन्द्रियादिभिर्यदगम्यं विद्यते, तदेवरूपं रामस्य ।

अत्रेदमस्ति विचारणीयम्—गान्धी मत्स्यवराहनृसिंहावतारेभ्योऽपि मान्यतां ददाति । मनुष्यः देहाभ्यासेनेश्वरस्य कल्पनां देहधारिरूपे करोति । गीतासदृशं तस्यापि कथनमस्ति यत् यदा धर्मस्य ग्लानिर्भवति तथाधर्मश्च वर्धते तदा धर्मस्य रक्षायै सोऽवतारं गृह्णाति । स एतदपि कथितवान् यदवतारस्य वार्त्तायां तावत्येव सत्यतां विद्यते, यावत्यैतिहासिकपुरुषस्येश्वररूपेऽथवेश्वरस्यैतिहासिकपुरुषस्य रूपे ऽवतरणकल्पनायां । ये-ये महापुरुषा अभूवन् तेषां गुणान् वीक्ष्य मनुष्यस्तान् पूर्णवतारान् वांशावतरानमन्यत । गान्धी लिखितवान्—"वयं कस्यापि देहधारिण ईश्वरस्य पूजां न कुर्मः, वयन्तु स्वनिरञ्जनं निराकारं राममर्चामः, तस्य निकटे गतिः सरला नास्ति, अनेनैव कारणेन तस्य सामीप्यलाभार्थं मूर्त्तिमत ईश्वरस्य पूजा विधीयते, तथा तस्य भजनान्यपि गायामः"।[2]

गन्धीश्वरप्रार्थनायां विश्वसितिस्म । स समस्तमनुष्यैः सह प्रेमन्यायपूर्णव्यवहारञ्च सत्यां प्रार्थनाममन्यत । प्रार्थनायां समयदानेन धैर्येण श्रद्धया च सह पवित्रतायाः प्राप्तिर्भवति । स लिखितवान्—"निश्चयात्मिका वैयक्तिकी या प्रार्थनेश्वरं किमपि याचितुं विहिता भवेत्, सा स्वभाषायां कृता भवेत् । अनया प्रार्थनयेश्वरोऽस्मान् प्रत्येकं जीवं प्रति शक्ति ददातु, तथा कापि वार्त्ताधिका न भवेत् । प्रार्थना याच्ञा न वर्त्तते, एषात्मन आह्वानमस्ति । ईश्वरसत्तास्वीकारस्यैतावानेवार्थोऽस्ति यत् मनुष्यो जगति किमपि दुष्कर्म न कुर्यात्, कस्मा अपि कष्टं न यच्छेत् तथा कमपि

१. धर्मपथ, पृ० १५-१७; हरिजन १९३८ ई०

२. धर्मपथ—पृष्ठ २१ तथा—
In search of the supreme Val. I पृष्ठ० 40-50

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

निजापेक्षया नीचं नावगच्छेत् । यः मानवमात्रेण सह प्रेमव्यवहारं करोति, स ईश्वरस्यास्तित्वमनुभवति "।[1]

परमात्मा सर्वस्य द्रष्टा सर्वस्य भोक्ता सर्वज्ञः सर्वानुभावी च वर्तते। अयं नित्यज्ञानादिमत्त्वेन सर्वोत्कृष्टः । गौतमन्यायवत् शरीरमन्तरेणैवेश्वरेण मन्त्रादिवत्कार्योत्पादनमिति । अत्रानुमानं भवति—ईश्वरः कारणं पुरुषकर्माफल्यदर्शनात् । न पुरुषकर्माभावे फलनिष्पत्तिः । शरीरहेत्वदृष्टाभावात्परमात्मा शरीररहित एवास्ति, अनेन सत्यरूपः परमात्मास्ति। नहि सत्यात्परोऽपर ईश्वरोऽस्ति । विशुद्धं चैतन्यं पुरुषोत्तम ईश्वरः पितामह ईश्वरः अन्तरात्मानुभूतिरीश्वरः, सच्चिदानन्दस्वरूप ईश्वरः, इतीश्वरस्यानेकानि रूपाणि स्वीकृतानि महात्मना ।

गान्धिदृष्टया परमात्मा क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषः स्वेच्छया निर्माणकार्यमधिष्ठाय लौकिकवैदिकसम्प्रदायप्रवर्त्तकः संसाराङ्गारे तप्यमानानां प्राणभृतामनुग्राहकश्चास्ति ।[2] अनेन हेतुना प्रार्थनाया आवश्यकता विद्यते ।

यस्य जनस्य हृदयः विशुद्धो वर्त्तते, स एव मनुष्य ईश्वरस्यास्तित्वमनुभवति । यः कलुषितविचारयुक्तोऽस्ति, अथवा यस्य जीवने न कापि मर्यादा विद्यते, स मनुष्यः ईश्वरस्यास्तित्वं नानुभवति ।

वस्तुतो मनुष्यस्य सद्विचार एवेश्वरोऽस्ति । य ईश्वरस्य साक्षात्कारं समीहते, स स्वकीयमात्मानं शुद्धं प्रबुद्धं वा कुर्यात् । प्राकृतिकनियमानां पर्यायभूता एवेश्वरीयनियमाः वर्त्तन्ते । मनुष्यः कर्मकरणे स्वतन्त्रोऽस्ति, स फलमपि स्वतन्त्ररूपेण प्राप्नोति । यः प्राकृतिकनियमाननुसरति स एवेश्वरीयनियमान् जानाति ।

गान्धिनः श्रद्धान्धा नासीत् । स तस्यामीश्वरशक्त्यां विश्वसितिस्म, या शक्तिः मानवायेश्वरीयरूपं ददाति । मनुष्यस्य यदा सर्वाः दुर्बलताः दूरीभवन्ति, तस्य विकाराः नश्यन्ति, तदा स परमात्मनः साक्षात्कारं करोति । ईश्वरस्य सत्तायाः बोधः जीवच्छ्रद्धया भवति, येनेश्वरास्तित्वे विश्वासो विहितः, तेनैव तस्याकथनीयाज्ञाताशक्तिरनुभूयते । यथार्थतः जगतः सम्पूर्णजन्तवः समानाः वर्त्तन्ते । येषामधिक उपयोगो भवति, तेषामधिकं महत्त्वमस्ति । ईश्वरदृष्टया न कोऽपि लघुर्न च कोऽपि महान् विद्यते । सत्यहङ्कारे नष्टे ईश्वरीयशक्त्याः परिज्ञानं भवति । ईश्वरः सर्व-

---

१. The philosophy of Mahatma Gandhi, Page 37-45.
२. तुलनीयम्—सर्वदर्शनसंग्रह, पृ० ३३३ तथा—
The story of my experiments with, truth, page 56-60

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

द्रष्टा भवन्नपि जगत्पदार्थैर्लिप्तोऽस्ति। सैद्धान्तिकदृष्ट्येश्वरः "परमतत्त्वम्" व्यावहारिकदृष्ट्या परमसाध्योऽस्ति।

गान्धिदृष्ट्या विश्वस्येश्वरः केवलं निमित्तकारणमस्ति। अयमेवैकमात्रं परमार्थतत्त्वमस्ति, यः विना किमप्युपादानं वैविध्यपूर्णसंसारस्य रचनां विदधाति। एष संसारश्चिरन्तनोऽनादिश्च वर्त्तते, सृष्टेः कदाप्यन्तो न जायते। ईश्वरः स्वस्मिन् पूर्णो निरपेक्षश्चास्ति। ईश्वरकृते संसारस्यापेक्षावश्यकता वा नास्ति। यतः स स्वभावतः पूर्णोऽभावरहितश्च वर्त्तते। संसारस्य जडचेतनपदार्थाः केनापि नियमविशेषेणैव सञ्चालिताः भवन्ति। एष नियमविशेषः प्राकृतिकनियम ईश्वरीयनियमो वा कथ्यते, विश्वं स्वयमेव स्वतन्त्रगत्या स्वनियमानुसारं चलति। ईश्वरः तदीयं शासनं पर्यवेक्षणं वा न करोति। ईश्वरः कस्मिंश्चिदपि कार्ये हस्तक्षेपमपि न कुरुते, येन सृष्टेः समस्तकार्याणि निरन्तरं सम्पद्यमानानि जायन्ते। प्रत्येकात्मनि स्वतन्त्रकार्यसम्पादनक्षमता विद्यते। अतः सत्सु कार्येष्वीश्वरस्य निवासो विद्यते। यः सेवायाः त्यागस्य च कार्यं कुरुते स ईश्वरानुकम्पां लभते। महात्मगान्धिदृष्ट्या राम एवेश्वरोऽस्ति। एतस्य तथ्यस्याभिव्यक्तिः स्वराज्यविजयनामकग्रन्थे पण्डितया सौभाग्यवत्या क्षमारावेन निम्नप्रकारेण कृता विद्यते—

प्रकाशयति तच्चेतः स रामः परमेश्वरः।[1]
तत्प्रकाशोत्सवेनासौ नन्दति प्रेमभाग्जनः॥

गान्धिना रामरहीमयोरेकत्वमपि प्रतिपादितम्। स रामं कृष्णं रहीमं करीमञ्चैकस्यैवेश्वरस्य रूपं मनुते। रावेन लिखितमस्ति—

रामस्य रहिमस्यापि नाम्नो प्रार्थनोत्तरम्।
हृदये चेन्निरूढे वस्तदेतत्परमं शुभम्॥[2]

गान्धिना मनुष्येश्वरसम्बन्धो वैष्णवसम्प्रदायाधारे स्थापितः। गीताधारे हि स कथितवान् यत् समस्तजीवा ईश्वरस्यावताराः सन्ति। ईश्वरः प्रभुरस्ति, मनुष्यश्च तद्दास इत्येषा कल्पना नाधिका स्वस्थास्ति। ईश्वरे मनुष्ये चैकैव शक्तिः विद्यमाना। य आत्मानुभूतिं प्रवुद्धां विधाय समताभावस्य दर्शनं करोति, स ईश्वरं पश्यति।

यः विश्वस्य नैतिकसत्तायां नैतिकशासने च विश्वसिति, तस्यैवेश्वरे विश्वासो

---

१. स्वराज्यविजय—सौ० पं० क्षमाराव, पृ०११० श्लो० २०
In search of the supreme Vol II, Page 70, 72, 78, 240
२. स्वराज्यविजय, पृ० १६०, पद्य ७

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

वर्त्तते। गान्धिदृष्ट्या नियमनियामकयोरेकत्वमस्ति। यो नैतिकनियमे निष्ठावान् भवति स एवास्मिन् क्रियात्मके चेतने प्रेम्णि विश्वसिति; गान्धिन ईश्वरसम्बन्धी-विचारः परमसुन्दरोऽध्यात्ममूलकश्चास्ति। यदि व्यक्तिः कामयेत तदा स्वात्मनि साक्षात्कारमीश्वरस्य कर्तुं प्रभवेत्। ईश्वरस्य विश्वास एव मानवतायाः विश्वासोऽस्ति। अनेन लिखितम्—

"I believe in absolute oneness of god and therefore also of humanity. what though we have many bodies? we have but one soul. The rays of the sun are many through refraction. But they have the same source."[१]

ईश्वरेच्छां विज्ञाय सदाचारे प्रवृत्तिः मानवेभ्य आवश्यको वर्त्तते। एतत्सदैवा-विस्मरणीयमस्ति यत् सत्यमीश्वरमेव सत्यं गान्धी स्वीकृतवान्।

तत्त्वज्ञानम्

गान्धि-दर्शनानुसारं मूलतत्त्वं किमस्ति? तत्संख्या च कियत्यस्ति? एष प्रश्नो विचारणीयोऽस्ति। सतश्च सद्भावः असतश्चासद्भावः तत्त्वम्। योयथावस्थितः पदार्थः स तथाभूत-प्रत्ययोत्पत्तिनिमित्तम्। स्वतन्त्रास्वतन्त्रभेदेन द्विविधं तत्त्वमिति द्वैतवा-दिनः श्रीपूर्णप्रज्ञाचार्या वेदान्तिनः प्राहुः। सदसदुभयानुभयात्मकचतुष्कोणविनिर्मुक्त शून्यमेव तत्त्वमिति शून्यवादिनो बौद्धाः। पृथिव्यादीनि चत्वारि भूतानि तत्त्वानी ति चार्वाका आहुः। द्रव्याद्रव्यभेदेन द्विविधं तत्त्वमिति रामानुजीयाः। पतिपशुपा-शेषु त्रिषु पदार्थेषु पृथिव्यादीनि पञ्च तत्त्वानीति पाशुपतशास्त्रकोविदा नकुली-शाचार्याः। महदादीनि पञ्चविंशतितत्त्वानि इति निरीश्वरसांख्याः। ईश्वराधिकानि तानीति षड्विंशतितत्त्वानीति सेश्वरसांख्याः पतञ्जल्यादयः। अशेषप्रत्यनीकं चिन्मात्रं ब्रह्मैकमेव तत्त्वमिति मायावादिनो वेदान्तिनः। विलम्बितं नृत्यवाद्यादि तत्त्वमिति नाट्यशास्त्रज्ञा आहुः। चेतः स्वरूपं च तत्त्वमिति काव्यज्ञाः कस्यापि मतस्य तत्त्वं-लोकविमोक्षमुख्योपायमस्ति। अभिमतं तत्त्वज्ञानं यथार्थबोधसाधकं निःश्रेयस-साधनञ्चेति बोध्यम्।

गान्धिना मूलत एकं सत्यमेव तत्त्वं स्वीकृतम्। इदमेव तत्त्वं गान्धिप्रतिपादितानां-सर्वेषां सिद्धान्तानामाधारभूतं वर्त्तते। अस्मादेव तत्त्वादहिंसातत्त्वं निस्सृतमस्ति। अनयोः प्रस्फोटनेन चत्वारि तत्त्वानि जातानि।

---

१. Selections form gandhi, by N. K. Bose, Navajivan, 1957
तथा—हरिजन जुलाई, अगस्त, १९४० ई०

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

१ सत्यम् २ सत्याग्रहः ३ अहिंसा ४ मोक्षः

गान्धिदृष्ट्या तत्त्वमिति प्रामाणिकोऽर्थो निगद्यते। तत्तत्त्वं परं सत्यं ब्रह्म परमात्मा सर्वेश्वरः श्रीभगवान् नारायण इत्यादिभिः पर्यायान्तरैः गण्यते। सर्वे चेतनाचेतन-पदार्थास्तस्य विशेषणानि। तच्चैषां विशेष्यम्। अतएव मूलभूतमेकं सत्यमेव तत्त्वमस्ति। उपर्युक्तानाञ्चतुर्णां तत्त्वानां स्फोटनेन चेतनाचेतनपदार्थानां विशिष्ट-ज्ञानार्थं सप्त तत्त्वानि जायन्ते। येषु तत्वेषु जीवनस्य समस्तार्थिकसामाजिक-व्यवस्था अवलम्बिताः सन्ति।

(१) सत्यम्। (२) सत्याग्रहः। (३) आत्मा, ईश्वरश्च। (४) रचनात्मककार्यक्रमः—आत्मविस्तारः (५) श्रमः (६) आत्मशुद्धचर्थं प्रार्थना (७) उपवासः

गान्धि-दर्शनस्य यावदस्माकमध्ययनमस्ति, वयमेतद्वक्तुं शक्नुमो यत् गान्धि-दर्शने यथार्थतः तत्त्वज्ञानं नास्ति। इदं तत्त्वज्ञानं प्रकारविशेषेण जीवनशोधनस्य कार्यक्रममात्रमस्ति, अनेनैव कार्यक्रमेण मोक्षप्राप्तिरपि भविष्यतीत्यत्र नास्ति मना-गपि सन्देहः। यतो हि यत्र सत्यमस्ति, तत्रैव शुद्धं ज्ञानं विद्यते। अहिंसा, अस्तेयः, ब्रह्मचर्यम्, अभयम्, आस्वादः, अपरिग्रहप्रभृतयः सत्यस्यैव विस्तृतरूपाणि सन्ति। गान्धिमतेन सत्याहिंसे एकमेव वस्तु स्तः। सत्यं साधनमस्ति, अहिंसा च साध्यास्ति। यत्र सत्यमस्ति, तत्रेश्वरनामापि वर्त्तते। सत्येन सदैव ज्ञानानन्दौ स्थातुं शक्नुतः। सत्य आनन्दश्च शाश्वतौ स्तः। एतदेव कारणमस्ति यत् 'ईश्वरः' सच्चिदानन्दोऽ-भिधीयते। सत्यशब्दस्य मूलम् 'सत्' अस्ति। सतोऽर्थोऽस्ति भवनम्। अतएव सत्यार्थ उभयोर्भावो जातः। अनेनैव हेतुना परमेश्वरस्य सत्यं नाम सदथवा सत्योऽस्ति। गान्धी परमेश्वरं सत्यं सत्यञ्च परमेश्वरं मनुते। स लिखितवान्—
"साधारणतया सत्यार्थं वयं सत्यभाषणमेव जानीमः। परन्तु मया सत्यार्थः विशालार्थे प्रयुक्तः। विचारे, कार्ये, वाचि आचारे, च सत्यमेवास्तु। एतत्सत्यस्य पूर्णतया ज्ञात्रे संसारे किमपि ज्ञातुं नावशिष्यते। यतः सम्पूर्णं ज्ञानं जगच्चास्मिन् समाविष्टे स्तः। सत्यमेवैकं विश्वस्य कार्यं कारणञ्चास्ति। सत्यादृते ऽन्यत्किमपि तत्त्वभूतं नास्ति। संसारस्य रचनापि सत्येनैव भवति।"

"वस्तुतः सत्यं पारसमणिरूपमस्ति, कामधेनुरूपमस्ति च। एतत् कथं प्राप्येत ? चेत्, एतस्य समाधानं गीतायां भगवता दत्तम्—अभ्यासेन वैराग्येण च। सत्ये संलग्न-ताभ्यासोऽस्ति तथा सत्यं विनाऽन्यद्वस्तुभ्यः आत्यन्तिकी उदासीनता वैराग्यमस्ति। अस्मिन् सत्यपि वयं द्रक्ष्यामो यदेकस्य सत्यमन्यस्मा असत्यं विद्यते। एतद्व्यप्र-

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

ताया: नावश्यकता वर्त्तते। यत्र शुद्धः प्रयत्नो वर्त्तते, तत्र भिन्नानि प्रतीयमानानि सर्वाणि सत्यानि वृक्षस्यैकस्यैवासंख्यातानि दृश्यमानानि पत्राणीव सन्ति।"[1]

गान्धिनः प्रत्येककार्यक्रमे सत्यस्य समावेशोऽस्ति। स समस्तसमस्यानां समाधानं सत्येनैव प्राप्नोति। सम्पूर्णसफलकर्मणां मूलेषु सत्यस्य स्थितिर्भवति। सत्यमेवैकमेतादृशं तत्त्वमस्ति,. यत् परस्परं प्रेम्णो, विश्वासस्याहिंसायश्च भावना-मुत्पादयति। विश्वासाभावे एव संसारे दुराचारा अत्याचाराश्च भवन्ति। यत्र सत्यतत्त्वं तिष्ठति, तत्र सम्पूर्णं सङ्कुटितजीवनं कार्यसम्पादने संलग्नं भवति। अनाचारस्य, भेदभावस्य, भयस्वार्थयोश्च त्यागः सत्यं विना न सम्भाव्यते। सत्ये कार्यसम्पादनस्यापूर्वा योग्यता भवति। यत्र सत्यमस्ति, तत्राध्यात्मिकशक्ति-रात्मवलञ्च पूर्णरूपेण निवसतः। सत्यमेव मनुष्यं वादेभ्यस्तर्केभ्यश्च दूरं करोति। भौतिकवलस्य पशुवलस्य वा निरोधोऽपि सत्येनैव सम्भवति।

"गान्धिना लिखितम्—"सत्यशोधनेन तपश्चरणं जायते, अर्थात् सत्यानुष्ठाने स्वयं दुःखं सोढव्यं भवति। एतत्कृते मरणमपि वरणीयं भवति। सत्ये स्वार्थस्य गन्धोऽपि न तिष्ठति। एतादृशं निःस्वार्थं शोधं कुर्वन्नद्यावधि न कोऽपि तादृशो भूतो योऽन्तपर्यन्तं कुमार्गं गतो भवेत्। सत्यानुष्ठानेन मुक्तिमार्गस्य प्राप्तिर्भवति, तेन जप-तपो-ध्यानादीनामुपयोगिता सत्याद्भिन्ना नास्ति। अतएव सत्यस्याराधना भक्तिरस्ति तथा भक्तिस्तु शिरःपण्यमस्ति, अथवा सा हरिमार्गमस्ति। अतस्तस्यां कातरताया आवश्यकता नास्ति। तस्यां पराजयसदृशं किमप्यस्त्येव न हि। सत्यं मृतेऽपि जीवनमन्त्रोऽस्ति। गान्धिन एतत्तत्त्वं परमव्यापकं वर्त्तते। एतत् स्वयं परमेश्वररूपमस्ति। एतस्याराधनाऽहिंसया कर्त्तुं शक्यते।"[2]

---

१. धर्मपथ, छात्रहितकारी पुस्तकमाला, दारागंज, प्रयाग, सन् १९३३ ई०, द० १३२-१३३

Wit and Wishdom of Mahatma Gandhi, P. 270-180

In search of the Supreme, Val I Page 20-35

The Mind of Mahatma Gandhi, Compiled by R- K. Prabhu and U. R. Ros, Madras, oxford University Press (1946), Page 150

Contemporary Indian philosophers, Allahbad Kitabistan (1947) Page 70-81

2. The Philosophy of Mahatma Gandni, Page 40-41
धर्मपथ, पृ० १३४

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

सत्यं व्यापकं जीवनव्यवस्थापकं साधनमस्ति। कथितम्—"The path of truth is as narrow as it is stratght. Even so is that of ahıniaa. It is like balancing oneself on the edge of a sword. By concentration an acrobat can walk on a rope. But the concentration required to tread the path of truih and ahin isa is far greater. The slightest in attention brings one tumbling to the ground. One can realize truth and ahinisa by ceaseless striving."[1]

स्पष्टमेतद्यदहिंसां विना सत्यं कार्यसाधकं नास्ति। सत्यतत्त्वं मूलभूतं वर्त्तते। अस्मादेव सत्याग्रहः निस्सृतोऽस्ति।

सत्याग्रहः

गान्धिनो जीवनोत्थापनस्य द्वितीयं तत्त्वं सत्याग्रहो विद्यते। एतज्जगज्जीवनञ्च दर्शनस्यैकावृत्तिरस्ति। वस्तुतः सत्याग्रह आत्मशोधकस्तथा परशोधकोऽप्यस्ति। एषा सत्याहिंसासदृशी साधना वर्त्तते, या विना कमपि विकारं स्वविजयेन सह परविजयं प्रापयति। एतस्य सत्याग्रहस्यान्तिमध्येयं सत्यमस्ति। अस्माकं दृष्टया गान्धिनः सत्याग्रहतत्त्वस्यार्थाः सन्ति—प्रेम, कष्टसहिष्णुता, तथाहिंसया सत्योपलब्धिः। एषोऽहिंसया प्रेम्णाथवा सत्यपर्यन्तं गमनस्य मार्गोऽस्ति। एषा प्रेम्ण एतादृशी प्रवृत्तिरस्ति, या स्वसर्वस्वं प्रदाय सत्यं प्रापयति। कस्यापि पीडनम्, कष्टदानम्, तिरस्कारः, क्रोधः एतद्राज्याद् वहिः सन्ति। सत्याग्रहः सर्वेषां जीवानां समानरूपेण कल्याणं विदधाति। नैषा प्रतिगामिनी शक्तिः, प्रत्युतात्मोन्मुखी वर्त्तते। प्रेम्णः, त्यागस्य, आनन्दस्य, ऐक्यस्य, अध्यात्मनः—सर्वेषां समाहारः सत्याग्रहे भवति। मानवजातेः विकासः सत्याहिंसयोर्मार्गेणैव भवति। सत्याग्रहः सत्यमार्गमुद्घाटयति।

श्रीरङ्गनाथदिवाकरो लिखितवान्—"सत्याग्रहस्य विश्वासोऽस्ति, यत् मानवविकासः प्रेम्णि तथाहिंसायामेवावलम्बितोऽस्ति। सत्याग्रहो मनुते यत् नाधिकबाहुबलैः, प्रत्युत नैतिकबलेन प्रेम्णा कष्टसहनेन चान्ते न्यायस्य विजयोऽपेक्ष्यते। एतत्स्पष्टमस्ति यत् सुखशान्तिदिग्भ्यामेव मानवस्य विकासो जायते। सत्याग्रहस्य प्रकृतिः विधायिका विद्यते। अतो मानवीयप्रगतिमार्गेऽज्ञानस्यालस्यस्य, भीरुतायाः स्वामित्वस्य भावना, आक्रमण-शोषणयोः प्रवृत्तिः, महत्त्वाकाङ्क्षा, लालसा, सत्ता-

---

१. Truth is God, P. 32.

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

लोभस्तथान्यानि काठिन्यानि सत्याग्रहादेव दूरीक्रियन्ते । उच्चकोटेः सरसतायाः, श्रेष्ठप्रकारस्य शान्तेः स्वर्गीयसुखस्य च दिक्षु मानवतायाः नेतुः विकासस्य नैसर्गिक प्रेरणाया एकस्मिन् एकाङ्करूपेऽविभाज्ये सत्याग्रहस्य कार्यं चलति ।"[1]

मानवमनसः सूक्ष्माध्ययनेन तस्य नैसर्गिकप्रवृत्तेर्विश्लेषणेन च ज्ञायते यत् सत्याग्रहः एकं शान्तिदायकमस्त्रमस्ति । एषः सत्याग्रहः संग्रामात् सैनिकयुद्धेभ्यश्च विरतं करोति । सत्योपासकतया सत्याग्रही स्वजीवनस्य प्रत्येकक्षणं सत्यान्वेषणे यापयति । सत्याग्रही नम्रः परोपकारपरायणश्च भवति ।[2] स सत्तालोभाद्दूरं गच्छति । तस्याचारविचारौ परिष्कृतौ भवतः । तस्य मार्गः एकस्य कर्मयोगिनो मार्गो भवति । तस्मिन्नहङ्कारात्याचारशोषणानीति तत्त्वानि न भवन्ति । सत्याग्रहिण उपास्यदेवः एकमात्रं सत्यमेव भवति । एतत्सत्यं प्रेम्णा, विश्वासेन चोपलभ्यते । अनुशासनस्य, संयमस्य, अनासक्तेः, स्वार्थत्यागस्य, शान्तेरेवं धैर्यादिगुणानां तस्मिन् पूर्णः समवायः प्राप्यते । प्रेम-विश्वासौ तस्य कार्यसिद्धेः मूलाधारौ स्तः । अतएव प्रेमसम्बन्धे लिखितमस्ति—"प्रेम मानवीयजीवनस्य सिद्धान्तोऽस्ति । प्रेमाधारेणैव समाजस्य रचना जाता । यद्येवं नाभविष्यत्, तदा कोऽपि समाजोऽस्तित्वे नागमिष्यत् तथा मानवजातिरपीदानीं यावत् नष्टाभविष्यत् । प्रेम्णो द्वेषोपरि, अहिंसाया हिंसोपरि सृजनात्मकशक्तेः विनाशकशक्तेरुपरि प्रभुत्वेनैव जीवनं सुघटितं समृद्धं तथाखण्डं विद्यते । सत्यंत्वेतदस्ति यद् जीवनस्योदय एव प्रेम्णो जातः । जीवनं प्रेम्णैव स्थितमस्ति तथा प्रेम्णैव तस्मै पूर्णता प्राप्यते । अतः प्रेममार्गस्यावलम्बनेनैव केवलं प्रेम्णोऽनुभूतिर्भवति । द्वेषहिंसयोः मार्गोऽसत्यमार्गोऽस्ति । एष वन्यजीवनस्य नियमो वर्त्तते । अहिंसाथवा प्रेम मानवीयसमाजस्य नियमो विद्यते । अतएव सत्याग्रही सत्यसाधनामहिंसया करोति ।"[3]

गान्धिनः सिद्धान्तानुसारं सत्याग्रहिणो जीवनमात्मशुद्धेः, संयमस्य, सेवायाः स्वार्थत्यागस्यात्मसमर्पणस्य चाखण्डपिण्डो भवति । स मनुष्याणां सत्यवृत्तिषु निष्ठां

---

१. सत्याग्रह मीमांसा, सस्ता साहित्यमण्डल, नई दिल्ली, सन् १९४९, पृ० ३९ ।

२. सत्याग्रही अन्याय का प्रतिकार शारीरिक बल से नहीं करता । वह तो उसे धैर्य से हँसमुख रहकर सहन करता है और इस प्रकार अन्यायी के हृदय को स्पर्श करने की कोशिश करता है । वह अन्याय और अन्यायी में बड़ा अन्तर मानता है । दुःख और कष्ट को मिटाने का प्रयत्न करते हुए वह अन्यायी को अन्याय का अनुभव कराने का प्रयत्न करता है ।—सत्याग्रहमीमांसा, पृ० ९

१. सत्याग्रहमीमांसा, पृष्ठ ५१ ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

करोति । स्वलक्ष्यं प्रति सत्याग्रह्युदम्यं विश्वासं विदधाति । स स्वयमेवात्मपरीक्ष-णेनात्मवृत्तीनां मननं परीक्षणं परिष्करणञ्च करोति ।

सत्याग्रह एक एतादृशस्तन्त्रोऽस्ति, यदर्थमनेकगुणानां सद्भाव आवश्यकोऽस्ति । महात्मगांधिनैतस्य तन्त्रस्य षट् प्रमुखसिद्धान्ताः प्रतिपादितास्सन्ति ।

(१) सत्याग्रहस्य कारणं न्यायोचितं सत्यञ्च भवेत् ।

(२) यदा सन्धिमार्गः पूर्णतयाऽसफलो भवेत्, तदा सत्याग्रहस्यावलम्बनं कार्यम् ।

(३) विरोधिने स्वदोषपरिमार्जनाय पूर्णोऽवसरो देयः ।

(४) सत्ये तथेश्वरे पूर्णं विश्वासं विधाय कष्टसहनात्मकेनाहिंसामार्गेण प्रतिकारो विधेयः ।

(५) नम्रतापूर्वकं स्वसिद्धान्तस्य सन्धिं विना परित्यागो न विधेयः ।

(६) कष्टसहनं विना कमपि कलहं विसंवादं प्रसन्नतया सह्यं स्यात् ।

सत्याग्रहिभ्यः निम्नलिखितगुणानां सद्भावोऽप्यावश्यको विद्यते ।[1]

(अ) निर्भयता

(आ) वीरता

(इ) धैर्यं दृढता च

(ई) आत्मशुद्धिकृते उपवासादिः

(उ) संयमः

(ऊ) प्रेम-विनयादिः

जीवनसफलताप्राप्तेरेष सिद्धान्तो गान्धिनैतादृशः स्वीकृतः, यः सत्यपर्यन्तं प्रापयति । सत्यान्निसृतमिदं तत्त्वं सत्यसाधकमात्मशोधकञ्चास्ति ।

आत्मन ईश्वरस्य च विश्वास :

गान्धिनात्मन ईश्वरस्य च विश्वासः जीवनविकासार्थमावश्यकः स्वीकृतः ।

---

१. सत्यका उपासक होनेके कारण सत्याग्रही अपने जीवनका प्रत्येक क्षण सत्य की खोजमें लगाता है और प्रेममय जीवन होनेके कारण वह दूसरोंका हित-करनेमें मग्न रहता है । यह सब करना मानो उसका स्वभाव धर्म ही हो जाता है ।""""वह विनम्र परोपकारी और मिलनसार होता है । और वह जिस समाजमें रहता है तथा जिनके साथ उसका सम्बन्ध होता है, उनके हित के लिए सदैव प्रयत्नशील रहता है ।

—सत्याग्रहमीमांसा, पृ० ४०

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

यः सामाजिकेषु राजनैतिकेषु च कार्येषु सफलतां प्राप्तुं समीहते, तस्मै वाह्याचरणापेक्षयान्तरिकशुद्धेरधिकावश्यकता भवति ।

आत्मन ईश्वरस्य च विश्वासः मानवाय प्रत्येककार्ये साफल्यं प्रयच्छति । यः स्वस्मिन् न विश्वसिति, स आत्मशक्तिं विकसितां कर्त्तुं न शक्नोति । मानसिकः श्रमः आत्मविश्वासं विना सफलो न भवति । यः स्वान्तरङ्गशक्तौ विश्वसिति, स एव सफलताप्राप्तेरधिकार्यस्ति । स्वातन्त्र्यस्य मूलमन्त्र आत्मविश्वास एवास्ति । आत्मविश्वासाभावे मनुष्यः कस्मिंश्चिदपि कार्ये दक्षो भवितुं नार्हति । दक्षताप्राप्तिनियमेषु सर्वप्रथमो नियम आत्मविश्वास एवास्ति । यदा प्रवल आक्रमणकारी आत्मन्याक्रमणं करोति, तदाहिंसात्मकप्रतिरोधस्य विश्वास एव तस्मादाक्रमणात् रक्षति । यत्रात्मविश्वासस्यालोको भवति, तत्र प्रेम, सहानुभूतिः, सरलता च स्वयमेवोपस्थिताः भवन्ति । आत्मविश्वासेनैव दयायाः सहानुभूतेश्च विकासो जायते । दयया मनुष्ये वन्धुत्वस्यैकतायाश्च भावना जागर्ति । सहिष्णुतायाः नम्रतायाश्चोत्पत्तिरात्मविश्वासभावेनैव भवितुमर्हति । अतएव गान्धिना सफलतायाः मार्ग आत्मविश्वास ईश्वरविश्वासो वा स्वीकृतः ।

जीवने निर्भयतायाः विकासोऽपि आत्मविश्वासेनैव भवति । अयमात्मविश्वासः दार्शनिकभाषायां सम्यग्दर्शनमभिधीयते । अहं कर्त्ता, भोक्ता चेत्यस्य प्रतीतिः आत्मनि जागरणं कर्त्तुं शक्नोति । मोक्षमार्गदृष्ट्या आत्माशुद्धिकारणं मिथ्यात्वं स्वश्रद्धाभावोवेति चिन्तनीयम् । आत्मालोचनेनोक्ता प्रतीतिरात्मनि संजायते ।

आत्मप्रतीत्यभावे न सामान्यतः साक्षात्कारस्य कारणत्वप्रयत्नेच्छयोर्वा, प्रमाणाभावात्, चेष्टादिनाऽन्यथासिद्धेः । व्यापारेण व्यापारिणो नान्यथासिद्धिरिति प्रवादस्तु यत्र व्यापारिकारणताग्रहाधीनैव व्यापारसिद्धिस्तद्विपयक एव । अतएवानुमानेनात्मप्रतीतिः कार्यसाधिका सिद्ध्यत्येव । तथापि—आत्मनिष्ठैव कार्यसाधिका सत्याहिंसासाधनान्यथानुपपत्तेः । अस्मिन्ननुमाने हेतुः असिद्धविरुद्धादिदोषैरहितः, तेन स्वसाध्यं साधयत्येव ।

अत्रेयं विचारणीया वार्त्ता यदात्मविश्वासाभावे प्रमातृप्रमाणादेरपि तथात्वे शास्त्रादेरपि मिथ्यात्वे कथं तेभ्यः परमपदमतिरुपपद्यत इति चेद् विमृश्यताम् । अत्रेदं भवान् प्रष्टव्यः किं प्रमात्रादेरसत्यत्वे ततः परमपदसिद्धिर्न भवतीत्युच्यते, किं वा भवन्त्यपि सा वास्तवी न बोभवीति; किं वाऽविद्याप्रतिवन्धनिवृत्तिरूपा वा ? भवतीति । नाद्यः, यतो हि सच्चिदानन्दरूपमात्मतत्त्वमेव प्रमितिर्यत्र स प्रत्यक् प्रमाणकः, तत्रान्येषामपेक्षाविरहात्तत्स्फुरणे वाधाभावात् । अतः आत्मप्रतीतिरतीवावश्यका पारमार्थिकफलानुपपत्तेः ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

आत्मप्रतीतिः प्रमेयरूपा, असति प्रमातरि प्रमेये वा प्रमा न भवति, सति तु भवति; न पुनः प्रमातरि प्रमेये वा सति प्रमा भवत्येव, किन्तु प्रमाणे सति भवन्ती प्रमा भवत्येव; इति सर्वानुभवात् आत्मप्रतीतिः सिद्धयत्येव। अर्थक्रियासामर्थ्यादेवात्मविश्वास आत्मप्रतीतिर्वा प्रमाणात्सिद्धयति।

रचनात्मककार्यक्रमः

जीवने सर्जनात्मककार्याणां विशेषं महत्त्वमस्ति। अतएव गान्धिना रचनात्मक कार्यक्रमस्यापि गणना प्रमेयविषये तत्त्वरूपेण कृता। इदमत्रालोचनीयम्—सामान्यतो ज्ञातत्वे सत्यज्ञातविशेषवत्त्वमधिष्ठानत्वे प्रयोजकम्। तेनेदं सिद्धयति यन्मानवैरेव स्वजीवनसार्थक्याय काश्चन मानसशक्तयो धर्मरूपेण रचनात्मककार्यक्रमेण वा प्रतिष्ठापिताः। अतो व्यक्तेरेव वैयक्तिकयोः सामाजिकयोर्वा बन्धमोक्षयोर्मुख्यं दायित्वम्। व्यक्तौ समाजे च विवेकस्य साऽपूर्वा शक्तिर्निहितैव विद्यते ययाऽसौ व्यक्तौ समाजे च कुशलशक्तिं पर्याप्तमुद्बोधयेत्, समाजं व्यक्तिं च निःश्रेयसं प्रापयेत्।

दृष्टिर्दर्शनम्। दृष्टयश्च रचनात्मककार्यक्रमेणानुविद्धाः। कार्यक्रमाणाञ्च सामाजिकत्वं निर्विवादम्। परं रचनात्मककार्यक्रमाणां स्वयंसिद्धत्वं नास्ति। अतो दार्शनिकैः समाजस्य व्यक्तेश्च विवेचनमालोचनं च कर्त्तव्यम्। भारते प्राचीनदार्शनिकानां विश्लेषणपद्धतिर्व्यक्त्युन्मुखी आसीत्। साम्प्रतं तया सामाजोन्मुख्यापि भाव्यम्। एतदर्थं गांधिना जीवनस्याखण्डतायाः सिद्धान्तः कथितः। तत्र समाजस्य परित्यागोऽनावश्यकः। गांधिदृष्ट्याखण्डता नाम नानात्वेष्वेकत्वबोधः, संसारनिर्वाणयोरभेदबोधो वा, न तु नानात्वस्य विलोपः। संसारनिर्वाणयोर्दृष्टेरेव भेदो न तु वस्तुनः। दुःखं न केवलं वैयक्तिकम्, प्रत्युत सामाजिकमप्यस्ति। अतो दुःखच्छेदो वैयक्तिक एव कथं भवेत् सर्वथा विहाय समाजम्।

रचनात्मककार्यक्रमस्यालम्बनं समाज एव। अस्मिंश्चालम्बनेऽस्त्यापेक्षिकं नित्यत्वम्, यतो हि समाजस्य कार्यक्रमो नित्यः। कार्यक्रमस्यापरं नाम मानवानां नैतिकत्वम्, नीतिकर्म। स च प्रवहन्नित्यः, न तु सिद्धः, मानवैः साध्यत्वात्। व्यक्तेरयं पुरुषार्थो यस्तु स्वाध्यवसायेन रचनात्मककार्यक्रमस्य साक्षात्कारः, समाजे च तस्य प्रतिष्ठापनम्। एवं सति दार्शनिकानां तत्प्रधानं कर्त्तव्यं यत्ते समाजव्यवस्थान्तर्हितसिद्धान्तानां प्रतिपादनं कुर्युः। महात्मा गान्धी एव एतादृशः दार्शनिकः यः समाजसञ्चालनार्थं रचनात्मककार्यक्रमं प्रतिपादितवान्। यतो हि समन्तात् प्रसृतानां समस्यानां समाधानमकृत्वा स्वीयं दर्शनं परमार्थप्रापकत्वेन वक्तुं न शक्नुयात्।

गान्धी समाजव्यवस्थार्थं यं पञ्चदशसूत्रीयं कार्यक्रमं प्रस्तुतवान्, तस्य सम्पादनं परमावश्यकं विद्यते। एष कार्यक्रमः निम्नाङ्कितो विद्यते—

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

(१) जातीयैकता (२) अस्पृश्यतानिवारणम् (३) मद्यपाननिषेधः (४) हस्तनिर्मितवासोव्यवहारः (खादी-धारणम्) (५) ग्रामोद्योगः (६) ग्रामस्वास्थ्यम् (७) नवीना शिक्षायोजना (८) प्रौढशिक्षा, साक्षरताप्रचारश्च (ज्ञानप्रचारः) (९) नारीणामुन्नतिः (१०) ग्रामसेवा। (११) आर्थिकसमता। जनानामुन्नतिः (१२) निम्नश्रेण्यां दलितश्रेण्याञ्च विद्यमानानां (सर्वाङ्गीणविकासः)। (१३) कृषकेषु श्रमिकेषु च जागरणम्। (१४) आत्मालोचनम्। (१५) जाति-वर्गभेदादीनामुन्नयनम्।

समाजे प्रचलितमूल्यानां पुनर्घटनं रचनात्मककार्यक्रमद्वारेणैव सम्भाव्यते। एतत्सत्यमस्ति यद् रचनात्मककार्यक्रमस्य मूले क्रान्तिः समाहिता भवति। क्रान्तिं विना न नवीनसमाजस्य निर्माणं भविष्यति, न प्राचीनमूल्यानां स्थापनैव। मौलिकः प्रतिभाशाली जनः कामपि क्रान्तिं गृहीत्वैवोत्पन्नो भवति। स च समाजे यथेष्टं परिवर्त्तनं करोति। न्यायस्य, समतायाः मानवाधिकारस्य च भावना व्यक्ति-समाज-राष्ट्राणां जीवनं परावर्त्तयति। मानवहृदये यदा मानवस्य मौलिकाधिकाराणां विश्वासो भवति तदा स क्रान्तिमार्गेऽग्रसरो भूत्वा नवीनं कार्यक्रमं समुपस्थापयति।

मनुष्यस्य भूषणभूताः चेष्टास्तथा तस्यात्मालोचनस्य प्रक्रियाः तं क्रान्तिमार्गेऽग्रसरं कुर्वन्ति। एतत्सत्यात् कोऽपि विमुखो भवितुन्न शक्नोति, यत् शताब्दीभ्यः आगच्छन्तः सामाजिकदोषाः समाजे विषमतां दरिद्रतां स्वार्थबुद्धिमनीतिञ्च जनयन्ति; येन जनतायाः शारीरिको बौद्धिको नैतिकश्च विकासोऽवरुद्धो भवति। अतएव क्रान्तिजन्मनः पश्चादेव रचनात्मककार्यक्रमाणां प्रारम्भो भवति तथैव रचनात्मककार्यक्रमाः समाजस्यार्थनीत्यामाचारनीत्याञ्च परिवर्त्तनं कुर्वन्ति।

गान्धिना भारतवर्षस्य नवनिर्माणे समाजकल्याणे च रचनात्मककार्यक्रमाय तत्त्वस्वरूपं दत्तम्। समाजस्य प्रत्येकव्यवस्था तत्त्वतः रचनात्मककार्यक्रमेणैव सम्भवति। अनेनैव कारणेन गान्धिमहोदयः मानवस्य समाजस्य च गम्भीराध्ययनं कृतवान्। स व्यक्ति-समाजयोर्जीवने लोकमङ्गलस्य दर्शनं करोति। गान्धिसिद्धान्तेनैवाधुनिक्यः सर्वा अपि समस्याः समाहिताः सन्ति। पूर्वोक्तरचनात्मककार्यक्रमेषु नवीनः समाजः संस्थापितो भवेत्। अस्य विशिष्टकार्यभारस्य निर्वाहस्तु गान्धिमहोदयेन कृतः।

श्रमः

गान्धी जीवनविकासाय श्रममावश्यकतत्त्वं स्वीकृतवान्। यो जनः श्रमं विनैव सामाजिकसौविध्यानि प्राप्नोति, स समाजं प्रति तस्करोऽस्ति। सामाजिकः श्रमोऽस्माकं कर्त्तव्यमस्ति। एषोऽस्मभ्यं प्रकृत्या दत्तो विद्यते। अतएव स्वजीवनं व्यव-

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

स्थितं विधातुं तथा मानसिकाध्यात्मिकशक्त्याः पूर्णतयोपभोगाय शारीरिकः श्रमोऽपेक्षितो वर्त्तते। कृषिकार्यम्, तांतवचक्रचालनमन्यस्मिंश्च कस्मिंश्चिदप्युद्योगे प्रवृत्तिः जीवनयागोऽस्ति। गान्धी शारीरिकश्रमाय विशेषं महत्त्वमददात्। स लिखितवान्—"यज्ञार्थः शारीरिकश्रमोऽथवा रोटिकाभृतिश्चोपयुक्ता प्रतीयते। त्वं स्वरोटिकां स्वेदञ्च वाहयित्वा श्रमं कुरु खाद च। शारीरिकश्रमः सर्वस्मै परमावश्यकः"[1]

मलपरिष्कारः गृहादिकस्य परिमार्जनं श्रमान्तर्गतमस्ति। यो मनुष्यः शारीरिकश्रमं विना जीवनयापनं करोति, तस्य जीवनमहिंसकं न मन्यते। अहिंसायाः व्यवहारः शारीरिकश्रमेऽवलम्बितोऽस्ति। श्रम्येव जनः सबलतां प्राप्नोति तथा श्रमेणैव सेवावृत्तिः पुष्टा भवति। अतो जीवनोत्थानाय श्रमस्य तत्त्वरूपेण स्वीकरणं परमावश्यकमस्ति। श्रमादेव निर्भयतायाति तथा श्रमिक एव प्रेम्णः सद्भावनायाश्च व्यवहारं करोति। श्रमे भगवतो निवासो वर्त्तते। यः भोगं परित्यज्य पारमार्थिकसेवावृत्तौ संलग्नो भवति, स भगवद्भक्तोऽस्ति, पूजनीयोऽपि च विद्यते।

गान्धिनोऽभिमतमस्ति यत् निःस्वार्थं श्रमं कुर्वन्नेव जनः भगवदनुग्रहमवाप्नोति। यः विना श्रमं तथानुत्पादितमन्नं गृह्णाति, स दण्डनीयो विद्यते। श्रमो जीवनविकासायानिवार्यतत्त्वमस्ति।

प्रार्थना

प्रार्थनायाः महत्त्वं जीवनविकासाय सर्वाधिकमस्ति। गान्धिदृष्ट्या प्रार्थनायाः परिभाषा काचिदन्यैव वर्त्तते। स लिखितवान्—"प्रार्थनायाः सर्वोत्तमः प्रकारः कः भवितुं शक्नोति? तस्यां कियान् समयः यापनीयः? मम मतेन तु न्यायकरणमेवोत्तमप्रकारा प्रार्थना विद्यते यो मनुष्यः सर्वैः सह न्यायार्थं सत्यहृदयेन तत्परो भवति, तस्मै नान्यायाः प्रार्थनाया आवश्यकताऽस्ति। कियन्तः सन्ध्यायामधिकं समयं यापयन्ति, परन्त्वधिकाः जना एवंविधाः सन्ति, ये तदर्थमपि नावगच्छन्ति। मम मतेन तु मातृभाषायामेव प्रार्थना विधेया, तस्या एवात्मनि प्रभावो लक्ष्यते। अहन्तु कथयाम्येतदपि यत् सत्या प्रार्थना यदि क्षणपर्यन्तमपि क्रियते, तदा सापि पर्याप्ता भविष्यति।"[2]

स्पष्टमस्ति यत् गान्धिदृष्ट्या न्यायः श्रमः संयतजीवनयापनं वा प्रार्थनान्तर्गतमस्ति। प्रार्थनायाः पवित्रतोत्पद्यते। प्रार्थनाया आत्मविश्वासः कार्यक्षमता चोत्पद्येते। गान्धी आत्मशुद्ध्यै प्रार्थनां साधनभूतां मनुते। तस्याभिमतमस्ति यत् प्रार्थना याच्ञा

---

१. धर्मपथ, पृ० १६१

२. धर्मपथ, पृष्ठ २३।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

नास्ति, एषा आत्मन आह्वानमस्ति। वैयक्तिकया प्रार्थनया सह सामूहिकी प्रार्थनाप्यपेक्षिता वर्त्तते। अतः प्रार्थनैकमेतादृशं तत्त्वमस्ति, यज्जीवनेऽनुशासनं विश्वासं स्वावलम्बनञ्चोत्पादयति।

गान्धिसिद्धान्तोऽस्ति—"Religion, in the opinion of Gandhi, is a friend of libreralism and a foe to fanaticism. It is conquest of passion and quest for compassion. Religion wears equation with his Maker. It is to become what he is. By religion, Gandhi means to cognize the self (आत्मा), to recognize the cosmic self (परमात्मा), to realize Reality, to see God face to face, to attain Moksa through service to man."[1]

स्पष्टमेतद्यत् मानवसेवायाः रूपान्तरं प्रार्थना विद्यते। यः मानवसेवां करोति, स सेवाश्रमरूपप्रार्थनया स्वकार्यमचिरेणैव साधयति। मोक्षप्राप्तिरपि सेवारूपप्रार्थनया सहजं सम्भवतीत्यत्र नास्ति कोऽपि विवादः।

उपवासः

उपवासः शरीरशुद्धयर्थं परमावश्यकतत्त्वमस्ति। उपवासेन विकाराणां शमनं भवति। आत्मोत्थानस्य मार्ग उपलभ्यते। गान्धिनोपवासः जीवनशोधनार्थं स्वीकृतः। तथाहि—उपवास आवश्यकं तत्त्वं-जीवनशोधनसम्भवात्। अनेनैवहिंसायाः सत्यस्य च प्राप्तिर्भवति। उपवासविषये गान्धिसाहित्येऽधिकाधिको विचारो लभ्यते। अस्माकं दृष्टयेयं जीवनशोधनप्रक्रियाचारविशेषेणाभिमतत्वात्तत्त्वशब्देनोच्यते, वस्तुतः तत्त्वस्यात्रैतादृशोऽर्थो न विद्यते, यादृश आकाशजलादीनां मूलभूतानां पदार्थानामर्थो विद्यते। अत्रेदं विचारणीयं यदुपवासकारणसत्त्वे आत्मशुद्धिः कार्यसत्त्वमिति यावत्।[2]

---

1. Candhi Marg, July 1969, Page 211
   Truth is God, Navajivan Publishing House (1959) Page 5 तथा—
   The mind of Mahatma Gandhi, Page 175-178

२. उपवास शब्द का अर्थ ही है भगवान् के पास वैठना। इसलिए कि परमात्मा के नजदीक हमारा चित्त रहे, वाहरी भोगों का दरवाजा वन्द करने की जरूरत है। परन्तु वाहर से विषयभोगों को छोड़कर यदि मन में भगवान् का चिन्तन न होता, तो फिर इस वाहरी उपवास की क्या कीमत रही?

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

उपवासकारणाभाव आत्मशुद्धिरूपकार्याभाव: दृश्यते । अतोऽन्वयव्यतिरेकाभ्यां सहकारित्वेनोपवासस्यावश्यकता सिध्यति । उपवास: ज्ञानसाधकमपि भवति । ज्ञानव्यक्ते उपवासव्यक्तितो भेदाभावेऽपि विज्ञानत्व-प्रमात्वधर्मयोरभेदात् । तथा च घटत्वस्य पृथिवीत्वप्रयोजकातिरिक्तप्रयोजकत्वसाधन इवोपवासस्य विज्ञानत्वप्रयोजकातिरिक्तप्रयोजकत्वसाधने वाधाभावात् । उपवास आत्मशुद्धिकारणाद्विज्ञानं जनयति, विपक्षे वाधकाभावात् । उपवसन् व्यक्ति: आत्मशुद्धि लभते, तेन ज्ञानमुत्पादयति । अनेनैव कारणेनोपवास: पृथग्भूतं तत्त्वं स्वीकृतम् ।

नीतिविज्ञानमाचारदर्शनञ्च

महात्मा गान्धी नैतिकचेतनां नैतिकीमनुभूतिं वा व्यक्तां कर्त्तुमाचारं विस्तारपूर्वकं निरूपितवान् नैतिकचेतनाया आशय: शुभोऽशुभ:, उचितोऽनुचित:, वाञ्छनीयोऽवाञ्छनीय आदिरस्ति । एता अनुभूतय: सार्वभौमा: सन्ति । स्वरुचिसंस्कृत्यनुसारं सदसदोश्चेतनाऽस्माकं सर्वेषां भवति । अतो नैतिकविज्ञानं नैतिकनिर्णयानामध्ययनं कृत्वा नैतिकचेतनाया: युक्तिसङ्गतां व्याख्यां करोतितथा तस्या: सार्थकतां स्थिरां करोति । महात्मा गान्धी स्वाचारस्य व्याख्यायै नैतिकताया: मानदण्डं स्थिरं कृतवान् तथा तस्य मानदण्डस्यानुकूलमेव कर्त्तव्याकर्त्तव्यो: समीक्षां कृतवान् । शुश्रूषाश्रवणग्रहणधारणविज्ञानोहापोहतत्त्वाभिनिवेशा हि नैतिकाचारानुष्ठानेन प्राप्नुवन्ति । सर्वसुखंपरिपूर्णं मोक्षसुखमपि नीतिविज्ञानं विना न प्राप्नोति कश्चिज्जन: । विपरीताभिनिवेशविविक्तमात्मन: स्वरूपमपि न कोऽपि लभते सदाचारेण विना । नैतिकानुष्ठानेनैव मनुष्यस्य कर्त्तव्यपरिज्ञानं भवति तथान्तरङ्गमलानामपि परिक्षालनं सम्भवति ।

अलौकिकाविगीतशिष्टाचारविषयत्वन्नैतिकविज्ञानं आत्मशोधकमस्ति विद्वेषरागरहितत्वात् । शरीरेण प्रशस्तानि दानपरपरित्राणादीनि कर्माण्याचरति । वाचा हितसत्यादीनि । मनसाजिज्ञासादीनि । सेयमात्मशोधनरूपा प्रवृत्ति: आचारदर्शनमिति गान्धिनाभिमतम् ।

ईश्वर का चिन्तन न करते हुए यदि उस समय खाने-पीने की चीजों का चिन्तन करें तो फिर बड़ा ही भयंकर भोजन हो गया। यह जो मन से भोजन हुआ, मन में विषय चिन्तन रहा, इससे बढ़कर भयंकर वस्तु दूसरी नहीं ।

—गीता प्रवचन, विनोबा भावे, सस्ता साहित्य मंडल
(सन् १९५२), पृ० ४६-४७

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

गान्धिन आचारदर्शनं सत्याहिंसाब्रह्मचर्यस्वादास्तेयापरिग्रहाभयेषु[1] सप्तव्रतेषु वैकादशव्रतेषु विभक्तमस्ति । तेनैते सप्तमहाव्रतसंज्ञयाप्यभिहिताः । निस्सन्देहं जीवन-समाजयोः राष्ट्रस्य चोत्थानाय चोक्तव्रतमूलकाचारस्य पालनमावश्यकमस्ति । गान्धिना प्रकृति-मानवयोरुभयोः क्रूरतानां निराकरणस्य प्रयत्नः कृतः । तस्याहिं-सासिद्धान्तः केवलं व्यक्तेरेव शोधनं न करोत्यपितु समाजराष्ट्रयोर्मध्येऽप्यात्मीयतां स्थापयति । गान्धिनो मतमस्ति, यत् समूहं विना व्यक्तिः कापि नास्ति तथा कोऽपि समूहः व्यक्तिं विनान्येन केनापि सह चलितुं न शक्नोति । यदि समूहस्य व्यवहारो वन्यो हिंसको वास्ति तदा तस्य प्रतिकूलः प्रभावः व्यक्तेः सामाजिकजीवने तथा सामान्ये सदाचारे नीत्याञ्चावश्यमेव पतति । मानवता तदानीमेव सभ्या सती स्थास्यति, यदा तस्याः द्वावपि पक्षौ व्यक्तिः समूहश्चाथवा सामाजिकः राजनैतिकश्च सभ्यौ भवेताम् । सदाचारी जनो दुराचारी समाजश्चाधिकदिनानिपर्यन्तं सहैव नहि चलितुं शक्नुतः । वैयक्तिकप्रगत्या सामाजिकप्रगत्या च सह यदि समूहगता राज-नैतिकद्रुतिगामिता चलन्ती तिष्ठेत्, तदा स्थिरोन्नतिकृत आवश्यकं सन्तुलनं नष्टं भविष्यति । गान्धिमहोदयोऽहिंसाव्याख्यां धर्मशिक्षकरूपेण न कृतवान्, प्रत्युतैकस्य विचारकस्य क्रान्तिद्रष्टुः रूपेण कृतवान् ।

धर्माचार्याः यत्राहिंसायाः सम्बन्धं केवलवैयक्तिकजीवनेन सह स्वीकृतवन्तः, गान्धी तस्याः सम्बन्धं समाजेन राजनीत्या च सह योजितवान् । प्रेम, विश्वासः निष्ठा चाहिंसायाः प्रतिरूपाणि सन्ति । आचार्यकृपलानीमहोदयः महात्मगान्धिनोऽ-हिंसायाः व्याख्यां कुर्वंल्लिखितवान्—"स्वश्रद्धायाः, स्वदेशस्य प्रतिभापरम्पराणा-ञ्चानुकूलं गान्धी विश्वशान्तिकृते एकस्याः योजनायाः एकस्य तत्त्वज्ञानस्य च निर्माणं कुर्वन्नस्ति । तस्य विश्वासोऽस्ति यद् यथाहिंसया, सत्येन च व्यक्तेः सामाजिक-सम्बन्धेषु सा सभ्या निर्मिता, तया तेनैवचान्तःसामूहिकसम्बन्धानामन्ताराष्ट्रिय-सम्बन्धानाञ्च मार्गदर्शनं विधेयम् । आसीत् कश्चन समय एतादृशो यत् वैयक्तिकी हिंसा कदाचित् व्यक्तेः समस्यानां समाधानमकरोत् । वैयक्तिकप्रतिहिंसा द्वारेण तस्यैकमात्रन्यायप्राप्तेः सम्भावनासीत् ।

---

१. तुलनीयम्—

हिंसाऽनृतस्तेयाऽब्रह्मपरिग्रेहभ्यो विरतिर्व्रतम् ।—तत्त्व सूत्रम् ७।१

व्रतमभिसन्धिकृतो नियमः । बुद्धिपूर्वकपरिणामोऽभिसन्धिः, इदमेवेत्थमेव वा कर्त्तव्यमित्यन्यनिवृत्तिः नियमः, अभिसन्धिना कृतः अभिसन्धिकृतः सर्वत्र व्रतव्यपदेशभाग् भवति ।—

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

परमद्यतनयुगे गान्धी सामूहिकविकासेऽप्यहिंसायाः प्रयोगमनिवार्यं मनुते। कर्त्तव्यपालनं विना कामपि दुर्भावना सत्यमभयाऽहिंसात्मिकया च रीत्यावश्यकमस्ति।"[1]

चिराद् विच्छिन्नाया भारतीयसमाजव्यवस्थायाः सन्धानं वैयक्तिक-सामाजिक-नैतिकाचरणेनैव सम्भवति। अनेनैव सिद्धान्तेनाधुनिक्यः सर्वाअपि समस्याः समाहिताः स्युः, तद् द्वारैव वाऽपूर्वं दर्शनमपि सदुद्भवेत्, यस्य पवित्रतायां यथार्थभूतायां च भूमिकायां नवीनः समाजः संस्थापितो भवेत्। अस्य विशिष्टकार्यभारस्य निर्वाहस्तु नैतिकानुष्ठानेन विधेयः। एतदर्थं तत्त्वचिन्तनस्य स्वतन्त्रता-प्रवृत्तिर्नूनमुद्बोधयितव्या। अतः सामाजिकजीवनोपजीव्यदार्शनिकतत्त्वानामाकलनं गान्धिना कृतम्।

सत्यादहिंसाया उत्पत्तिर्भवति। गान्ध्यहिंसानन्तरं ब्रह्मचर्याय महत्त्वमददात्। यतो ब्रह्मचर्यस्य सम्पूर्णपालन महिंसाचरणं विना शक्यं न भविष्यति। सर्वव्यापिने प्रेम्णे ब्रह्मचर्यमपेक्षितमस्ति। यः कुटुम्बं सृष्टवान्, एतादृशो जनः व्यापकं प्रेमकर्त्तुं न शक्नोति। व्यापकप्रेमकृते "वसुधैव कुटुम्बकम्" इति सिद्धान्तस्यावश्यकता विद्यते। मनसो वाचः शीलस्य च निर्विकाररक्षणं कर्त्तव्यपालने सदा संलग्नता च ब्रह्मचर्यान्तर्गतमायातः। गान्धी लिखितवान्—"यदि वयं मनोऽधीनाः भवेम, तदा शरीर-मनसोः विरोधो जायते, मिथ्याचारस्य कदाचारस्य वा प्रारम्भो भवति। परं वक्तुं शक्यते यत् यावन्मनोविकारः निरुद्धो भवति, तावत् उभयोः सहैव गमनं भवति।"[2]

तत्त्वार्थवार्तिकम्—भारतीय ज्ञानपीठ काशी, प्रथम संस्करण, पृ० ५३३,७।१।३
एवमिहापि य एष मनुष्यः प्रेक्षापूर्वकारी स पश्यति य एते हिंसादयः परिणामाः पापहेतवः पापकर्मणि च प्रवर्तमानमिहैव राजानो दण्डयन्ति परत्र च बहुविधं दुःखमवाप्नोतीति स्वबुद्ध्या सम्प्राप्य निवर्तते।

—वही, पृ० ३३,७।१।५

१. गान्धीमार्ग, साधनासदन, इलाहाबाद (१९४७ ई०), पृ० ८९

२. धर्मपथ, छात्रहितकारी पुस्तकालय, मारागंज, प्रयाग, सन् १९३३, पृ० १४१
तुलनीयम्—
अहिंसादिगुणबृंहणाद् ब्रह्म—अहिंसादयो गुणाः यस्मिन् परिपाल्यमाने बृंहन्ति वृद्धिमुपयन्ति तद् ब्रह्मेत्युच्यते, न ब्रह्म अब्रह्म। किं तत्? मैथुनम्। तत्र हिंसादयो दोषाः पुष्यन्ति। यस्मात् मैथुनसेवनप्रवणः स्थाष्णुचरिष्णून् प्राणिनो हिनस्ति मृषावादमाचष्टे अदत्तमादत्ते सचेतनमितरं च परिग्रहं गृह्णाति।—तत्त्वार्थवार्तिक ७।१६।१०, पृ० ५४४।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

गान्धी विषयेन्द्रियविजेतारं ब्रह्मचारिणमलौकिकशक्तिशालिनं मनुते तथैतादृशः ब्रह्मचार्य्येव स्वविकासं कृत्वा समाजं व्यवस्थितं कर्त्तुं शक्नोति । गान्धी ब्रह्मचर्य-लाभानां विचारपूर्वकं विवेचनं विहितवान् । तस्याभिमतमस्ति—"संयमादुत्पद्य-मानस्य रोगस्य कस्यापि कोऽपि नाम वक्तुं न क्षमते । परमसंयतविषयभोगेभ्य उत्पद्यमानानां भयङ्करव्याधीनां नामानि को न जानाति । शरीरन्तु विकृतं वस्तु जायमानमस्त्येव, कल्पनाशक्तेः, हृदयस्य बुद्धेश्च दशा नितान्तं भ्रष्टा जायते । दिशि दिशि चरित्रपतनम्, युवकानामुद्दामवासना, स्वार्थपरतायाश्च वृद्धेः रोदनं श्रूयते ।[1]"

गान्धी जीवनोत्थानाय संयममावश्यकं मनुते। यस्मिन् संयमस्य प्रकाशो विद्यते, स स्वचरित्रबलद्वारेण समाजस्य देशस्य च प्रवाहं परिवर्त्तयति । ब्रह्मचारिणः स्वभावः संन्यासिनो भवति । तस्मै सम्पूर्णं विश्वं समानं दृश्यते । स समदृष्टिरस्ति तथा विश्वप्रेमद्वारेण समाजाय नवीनां गतिविधिं ददाति । ब्रह्मचर्यस्यामिता शक्ति-रस्ति । विकाराणां वशीकरणे समर्थो जनः जितेन्द्रियो भूत्वा परं शक्तिशाली भवति । वस्तुतः समस्तविकाराणां मूलं कामवासना वर्त्तते । येनैषा वासना विजिता, स सर्वेभ्योऽन्यायेभ्योऽत्याचारेभ्यश्च मुक्तो भवति ।

ब्रह्मचर्यस्य सहायकोऽस्वादव्रतोऽस्ति । यद्यस्य व्रतस्य सम्यक् पालनं क्रियते, तदा जीवने संयमोपलब्धिरसम्भवा नास्ति । अस्वादस्यार्थोऽस्ति भोजनकाले-ऽस्वाद्यपदार्थानामस्वादनम् । यथौषधसेवनकाले औषधस्य स्वादापेक्षा न भवति, तथैव शरीरस्यावश्यकतां मत्वा भोजनं कुर्वन्नपि स्वादापेक्षा न विधेया। यः भोजनेऽ-सक्तो भूत्वा तत् स्वाद्यते, तस्यैव व्रतो भग्नो भवति । जिह्वेन्द्रियस्य दासतायाः अर्थोऽस्ति समस्तेन्द्रियाणां दासता । यः स्वादं विजितवान्; सोऽहिंसायाः, सत्य-ब्रह्मचर्ययोरपि सम्यक् पालनं कर्त्तुं शक्नोति ।

स्वादजयः साधारणो नास्ति । सामाजिकजीवनक्रिया-प्रतिक्रियाणां कृते इन्द्रियजयित्वमावश्यकमस्ति । गान्धी लिखितवान्—"मम स्वानुभवस्तु एषोऽस्ति, यः जिह्वां न विजितवान्, स विषयवासनां जेतुं न शक्नोति, जिह्वाजयः परम-कठिनोऽस्ति । विजितायां जिह्वायामन्यविजयो लभ्यते । जिह्वाविजयस्यैक उपाय एषोऽस्ति यद् यथाशक्तिमरिचादिसेवनस्य परित्यागः विधेयः । द्वितीयोऽप्तोऽपि बलवानुपायोऽस्ति, यन्मनसि सदैष भावो रक्षणीयः यद् वयं यद् खादामः, तत्सर्वं शरीरपोषणार्थमेव । स्वादार्थं वयं कदापि भोजनं न कुर्मः । वयं स्वादार्थं न

---

१. आत्मसंयम, सस्ता साहित्यमण्डल, नई दिल्ली, १९६० ई०, पृ० ३२ ।
तुलनीय—हस्तपादपुद्गलसंघट्टनादिभिरब्रह्म सेवमाने—तत्त्वार्थवार्त्तिक ७।१६।५, पृ० ५४३

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

पिवामः। प्रत्युत जीवनधारणार्थं जलं पिवामः। जलमपि यथा तृषाशमनार्थमेव पीयते तथैवान्नमपि केवलं बुभुक्षाशमनार्थमेव ग्राह्यम्।[1]"

गान्ध्यस्वादमहाव्रतं परं प्रशंसितवान्। तेन स व्रतः जीवनशोधनस्य सुन्दरोपायः कथितः। एतस्य व्रतस्य सर्वोत्कृष्टलाभस्तु एषोऽस्ति यन्मनुष्योऽभक्ष्यभक्षणस्य त्यागं करोति, मिताहारश्च जायते। मिताहारः स्वास्थ्यरक्षाया उपायस्त्वस्त्येव, जीवनयापनस्यापि मार्गोऽस्ति। गीतायां कथितमस्ति—

विषया: विनिवर्तन्ते निराहारस्य देहिनः।
रसवर्जं रसोऽप्यस्य परं दृष्ट्वा निवर्त्तते ॥[2]

अस्तेयम्

अस्तेयेन सत्यस्यास्तिक्यबुद्धेरहिंसायाः विश्वप्रेम्णश्च पालनं भवति। गान्धिना लिखितम्—"मनुष्यः स्ववस्तून्यपि चोरयति। उदाहरणार्थं कस्यापि पितुः स्ववालकानामज्ञाने–परोक्षे वा कस्यापि वस्तुनः खादनम्। एतद् वक्तुं शक्यते यद् आश्रमस्य वस्तु भाण्डागारं सर्वेषामस्माकमस्ति। परन्तु तस्मादनिवेद्य गुडखण्डमपि यदि कश्चन गृह्णाति तदा स चौरोऽस्ति। एकः वालकः द्वितोयस्य वालकस्य कलमं दृष्ट्वा चोरयति''''''यस्य वस्तुनो ग्रहणस्यास्माकमावश्यकता न भवेत् तस्य ग्रहणं तदाज्ञामादायापि तस्करता विद्यते। अस्तेयव्रतपालकः स्वावश्यकतां शनैः शनैः न्यूनां कुर्वन् गच्छति।[3]"

---

१. आत्मसंयम, सस्ता साहित्यमण्डल, नई दिल्ली, द्वितीय संस्करण, पृ० ६३।
विशेष जानने के लिए—
यह इन्द्रियसंयम आसान नहीं है। इन्द्रियों से बिलकुल काम ही नहीं लेना एक वात आसान हो सकती है। मौन, निराहार आदि वातें इतनी कठिन नहीं हैं। इससे उलटा इन्द्रियों को खुला छोड़ देना तो सबके लिए सधा-सधाया ही रहता है। परन्तु जिस प्रकार कछुवा खतरे की जगह अपने तमाम अवयवों को भीतर छिपा लेता है और निर्भय स्थान पर उनसे काम लेता है, इसी तरह विषय-भोगों से इन्द्रियों को समेट लेना और परमार्थ के काम में उनका उचित उपयोग करना यह संयम कठिन है। इसके लिए महान् प्रयत्न की जरूरत है।—गीताप्रवचन, विनोवा भावे, पृ० ३२।
तथा—तानि सर्वाणि संयम्य युक्त आसीत मत्परः।
वशे हि यस्येन्द्रियाणि तस्य प्रज्ञा प्रतिष्ठिता ॥—गीता २।६१।
२. गीता २।५९।
३. सप्तमहाव्रत, विद्याप्रचारकमण्डल, चकियाँ वाजार, शाहावाद, पृ० २०-२१।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

गान्धिनो विचारेण मनसापि कस्यापि वस्तुनो ग्रहणाकाङ्क्षा तस्करतास्ति। एषा पतितकारिण्यस्ति। वयं कस्यापि सुन्दरमाकर्षकं वस्तु वीक्ष्य लोभं कुर्मः; तत्प्राप्तुमिच्छामः। अस्माकमेष स्वभाव तस्करतान्तर्गतो विद्यते। उपवासी शरीरेण न खादति, यदि स द्वितीयं खादन्तं वीक्ष्य मनसा स्वादेच्छां करोति, तदा स चौर्यमाचरति, उपवासं जहाति। य उपवासंत्यजन् खादितुं समीहते सोऽस्तेयमुपवासं द्वावपि नाशयति। अस्तेयव्रतपालकः नम्रः विचारशीलः विवेकी तथा साधारण-वसनो भवति। यः स्वजीवनेऽस्तेयव्रतं पालितवान्, स भौतिकीं बौद्धिकीं नैतिकीं कलागताश्च शक्तीः नियामयति। अतः समूहस्य व्यक्तेश्च उभयोरपि कृते सभ्यतायै, सदाचरणशीलतायै चास्तेयव्रतस्य पालनमपेक्षितमस्ति।

अपरिग्रहस्य सम्बन्धोऽस्तेयेनास्ति। यद्वस्तु मूले चौर्यस्य नास्ति, परन्तदेवा-नावश्यकमस्ति, तदा तस्य वस्तुनः संग्रहः व्यक्ति-समाजोभयकृतेऽनावश्यकोऽहित-करश्च विद्यते। परिग्रहस्यार्थः सञ्चयो विद्यते। सत्यशोधकः परिग्रहं न सञ्चयति। परमात्मापि परिग्रहं न सञ्चयति। स आत्मन आवश्यकं वस्तु प्रतिदिनं जनयति। यदि वयं परमात्मनि विश्वासं कुर्याम तदा ज्ञास्यामः यदावश्यकतायाः वस्तूनि प्रतिदिनं जायन्ते। यः सञ्चयं करोति, स जगति विषमतां तज्जन्यदुःखानाञ्च सर्जनं करोति। अतः सञ्चयः सामाजिकदृष्ट्या, राष्ट्रदृष्ट्या चाहितकरः कथितो विद्यते। मानवतृष्णा प्रत्यहं वर्धते। सः क्वापि न तुष्यति। यो लक्षाधीशोऽस्ति, स कोटच-धीशतायै, यः कोटचधीशोऽस्ति, स ततोऽप्यधिकाधिपतित्वाय यतते। दरिद्रोऽपि स्वावश्यकतानुसारं वस्तु प्राप्य न तुष्यति, सोऽपि घनाढचो भवितुमिच्छति। यो मनसा कर्मणाच दिगम्बरो भवति, स एव सत्यसाधको विद्यते। उक्तञ्च गीतायाम्—

ध्यायतो विषयान्पुंसः सङ्गस्तेषूपजायते।
सङ्गात्संजायते कामः कामात्क्रोऽभिजायते॥
क्रोधाद्भवति सम्मोहः सम्मोहात्स्मृतिविभ्रमः।
स्मृतिभ्रंशाद् बुद्धिनाशो बुद्धिनाशात्प्रणश्यति॥
रागद्वेषवियुक्तैस्तु विषयानिन्द्रियैश्चरन्।
आत्मवश्यैर्विधेयात्मा प्रसादमधिगच्छति॥[1]

---

१. गीता, २।६२-६४।
तुलनीयम्—
हृदि यस्य पदं धत्ते परवित्तामिषस्पृहा।
करोति किं न किं तस्य कण्टलग्नेव सर्पिणी॥—ज्ञानार्णव, रायचन्द्रशास्त्र माला, ११७

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

गान्धी लिखितवान्—"सत्यस्य संस्कृतेः सुधारस्य सभ्यतायाश्च लक्षणं परिग्रहवृद्धिर्नास्ति, प्रत्युत विचारपूर्वकं तस्य न्यूनता वर्त्तते। यथा-यथा परिग्रहो न्यूनः क्रियते, तथा-तथा सुखसन्तोषयोर्वृद्धिर्भवति। सेवा क्षमता च वर्धेते। केवलं सत्यात्मदृष्ट्या विचारेण शरीरमपि परिग्रहे गण्यते। भोगेच्छार्थमस्माभिः शरीरावरणं गृहीतम्। भोगेच्छा यदि परंक्षीणा भवेत्, तदा शरीरेच्छा नश्येत्। यो विचारोऽस्मानीश्वराद् विमुखान् करोति, ईश्वरसविधे वा न नयति, स परिग्रहे गण्यतेऽत एव च स त्याज्योऽस्ति।"

महात्मगान्धिना परिग्रहव्याख्या परमविस्तरेण कृता। स सर्वविधसंग्रहं परिग्रहं मनुते। यावत् संसारस्य पदार्थैः विषयैः वा ममता संलग्ना भवति, तावत् परिग्रहस्य मोचनमावश्यकमस्ति। ममता मोहबुद्धिश्च परिग्रहे स्तः। अतः साम्यवादाय परिग्रहस्य त्याग आवश्यको वर्त्तते।

सप्तमहाव्रतस्यान्तिमा शृंखला—अभयमस्ति। इदं व्रतं गान्धिमहोदयः गीतायाः षोडशाध्यायत् प्रेरितो भूत्वा प्रतिपादितवान्। गीतायां लिखितम्—

अभयं सत्त्वसंशुद्धिर्ज्ञानयोगव्यवस्थितिः
दानं दमश्च यज्ञश्च स्वाध्यायस्तप आर्जवम्॥—गीता १६/१

विनाभयमाध्यात्मिकसम्पदोऽलभ्याः सन्ति। अभयं विना नाहिंसा पालिता भवेत्, न सत्यमेव रक्षितं भवेत्। यो भीतः कापुरुषश्चास्ति, स सत्याहिंसयोः पालनं कर्त्तुं न शक्नोति। अभयार्थोऽस्ति समस्तत्राह्यभयेभ्यो मुक्तिः। मृत्युभयं धनापहरणभयं कुटुम्बपरिवारादिभयं रोगभयं शस्त्रप्रहारभयं सम्मानभयमेवं भयान्यसंख्येयानि सन्ति। भयाक्रान्तः संसारे किमपि सत्कार्यं कर्त्तुं न प्रभवति। सः भयात् न सत्यं वक्तुं शक्नोति, न चाहिंसायाः पालनं करोति। यो निर्भयो भूत्वा सर्वविधानि प्रलोभनानि विजितवान्, स एव स्वकल्याणे परकल्याणे वा प्रवृत्तो भवितुमर्हति। भयं कातरतायाः लक्षणमस्ति। भयाक्रान्त एव जन इन्द्रियदासो भवति। स एव च परिग्रहादीनां सञ्चयं विधायावश्यकतानां पूर्त्ति करोति।

एवंप्रकारेण महात्मगान्धिना कर्तव्याकर्तव्योः समीक्षा स्वनीतिविज्ञाने कृता। यस्य जनस्याचरणं शुद्धं परिष्कृतञ्चास्ति, स स्वसाधनायां सफलो भवितुं शक्नोति। आत्मसंयमस्येन्द्रियसंयमस्य च प्राप्तिरुक्तसप्तमहाव्रताचरणद्वारेण सम्पत्स्यते। दया, सहानुभूतिः, सहिष्णुता, नम्रताप्रभृतयोऽपि गुणाः अपेक्षिताः सन्ति। सत्याचरणेन विना जीवनशोधनस्य किमपि कार्यं न सम्भवति।

जीवनदर्शनम्

महात्मगान्धिनो जीवनदर्शनमाचारेऽध्यात्मोपरि चावलम्बितमस्ति। स सामा-

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

जिकराजनैतिकविचाराणां समाधानमध्यात्मजीवनदर्शनद्वारेण कृतवान् । निश्चयतो महात्मगान्धिना वैयक्तिकजोवनाचरणे सामाजिकजीवनाचरणे च स्वजीवनदर्शनमवतारितम् । गान्धिनो जोवनदर्शनमेकत्र जोवनरहस्यानां प्रतीतिं कारयति, अन्यत्र च सृष्टिनियमानां शक्तोनाञ्चान्वेषणं विदधाति । एतावदेव न हि, प्रत्युतात्मज्ञानं विज्ञानञ्च मिलित्वा ताः शक्तीः वैयक्तिकजीवने सामाजिकजीवने चावतारयतः ।

गान्धिना जोवनदर्शने नवीना वक्रता निहिता 'तस्य धर्मः न्यायो नास्ति, प्रत्युत करुणा विद्यते । अन्येषां जोवनाय दर्शनमस्ति' "जियो और जीने दो"— 'जीव जीवय च' स्थाने गान्धिनाऽन्येभ्यो जीव इत्येष सिद्धान्तः स्थापितः । गान्धिदर्शनं सर्वोदयदर्शनमस्ति । अस्य दृष्ट्या वैयक्तिकशक्तीनां गुणानाञ्च विनियोगः सामाजिकजीवने विधेयः । विषयप्रवृत्तिनिषेधोपवासप्रायश्चित्तादिविधायकत्वेन वैयक्तिकजीवनस्याभ्युत्थानमपेक्षते, लोकद्वयोपकारकत्वात् । गीतायां लिखितमस्ति—

ये तु सर्वाणि कर्माणि मयि संन्यस्य मत्पराः
अनन्येनैव योगेन मां ध्यायन्त उपासते ॥ गीता १२।६

करुणायाः अहिंसाप्रेम्णोः तथाशक्तेः वैयक्तिकगुणानां सामाजिकगुणे परिवर्तनस्य कला गान्धिना सर्वोदयेऽभिहिता । तत्रार्थिकसमतायाः कल्याण-न्याययोश्च स्थापनया विशेषरूपेण बलं प्रदत्तमस्ति । तेन प्रत्येकतथ्यं विचाराश्च मानवीयमूल्यानां निकषासु परिक्षितास्तथाक्रान्तिमयस्य नवसमाजस्य, नवमानवस्य, नवमूल्यानाञ्च सृष्टिः कृता । सत्तायाः सम्पत्तेश्च विकेन्द्रीकरणमपेक्षितमस्ति । भौतिक समृद्धिकृते तेनैका नवा व्यवस्था नवस्तन्त्रः दत्तौ । वैयक्तिकस्वार्थानां सामाजिकस्वार्थैः कल्याणेन च सह सामञ्जस्यस्थापनार्थं पूर्णः प्रयासः कृतो विद्यते । गान्ध्यभिमतजीवनदर्शनस्य स्पष्टीकरणं गीतयापि भवति—

यो न हृष्यति न द्वेष्टि न शोचति न काङ्क्षति ।
शुभाशुभपरित्यागी भक्तिमान्यः स मे प्रियः ॥
समः शत्रौ च मित्रे च तथा मानापमानयोः ।
शीतोष्णसुखदुःखेषु समः सङ्गविवर्जितः ॥

—गीता १२।१७-१८

अद्वेष्टा सर्वभूतानां मैत्रः करुण एव च ।
निर्ममो निरहंकारः समदुःखसुखःक्षमी ॥—गीता १२।१३

स्पष्टमेतद् यद् गान्धि-जीवनदर्शनानुसारमाध्यात्मिकमूल्यानां भौतिकमूल्यापेक्षया प्राथमिकता विद्यते । इमे समाजस्य कल्पनां पारिवारिकसमाजरूपे कुर्वन्ति तथा पारिवारिकगुणेषु प्रेम्णेऽहिंसायै करुणात्यागादिभ्यश्च महत्त्वं ददति । तेषां

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

विश्वासोऽस्ति यत् शुद्धैः निर्दोषैश्च साधनैरेव पवित्रसाध्यस्य प्राप्तिर्भवति। साधनानि यदि सदोषाणि सन्ति तदा तेभ्यो निर्दोषसाध्यस्य प्राप्तिर्न भविष्यति।

गान्धिजीवनदर्शनस्य प्रमुखलक्ष्यं सरलजीवनमुच्चविचाराश्च सन्ति। यावत्प्रवृत्तयो भोगप्रधानाः भवन्ति, तावत् मानवमूल्यानां प्रतिष्ठा न जायते। जीवनधारणार्थं आवश्यकः, परमस्य सञ्चयस्यावश्यकता नास्ति। अर्थो निजश्रमद्वारेणोत्पादनीयः, प्रत्येकमानवः श्रमवान् भवेत्, श्रमेणोपार्जनं कुर्यात्, एतदेव जीवनलक्ष्यमस्ति। गान्धी लोकात्मानं दरिद्रनारायणरूपे पश्यति। यो निर्भयतापूर्वकं श्रमं करोति, स्वावश्यकपदार्थानाञ्चोत्पादनं करोति, स एव जीवनानन्दं प्राप्नोति। गान्धिजीवनदर्शनं वैयक्तिकजीवन-लोकजीवनयोर्न कमपि भेदं स्थापयति। प्रत्येकमानवस्य या भावना लोकसेवायां संलग्नास्ति, लोकसेवया व्याप्तास्ति, सा भावना जीवनमुर्वरं करोति जीवने च क्रियाशीलतामुत्पादयति।

गान्धिजीवनदर्शनस्य प्रमुखकेन्द्रं मनुष्योऽस्ति। स संसारस्य सर्वान् प्राणिनः सुखिनः द्रष्टुमिच्छति। तस्याचारसंहिता कल्पितादर्शो नास्ति, प्रत्युत यथार्थजीवनमस्ति। मनुष्यस्य शरीरस्य, मनुष्यस्य मस्तिष्कस्य मनुष्यस्य हृदयस्य च विकासः गान्धिजीवनदर्शने समाविष्टोऽस्ति। स भोगशक्तेरुत्पादनशक्तेश्च समानरूपेण विकासं वाञ्छति। जीवनान्मरणपर्यन्तं प्रशिक्षणमस्य जीवनदर्शने समायाति। उत्पादकशक्तेः विकासे व्यक्तेः व्यक्तित्वस्य निर्माणं जायते, मानवसंस्कृतेस्तथा मानवसभ्यतायाश्च सर्जनं भवति, स्वावलम्बनशक्तेः स्फुरणं भवति। जीवनस्य स्वावलम्बनाय शारीरिकश्रमद्वारेणोत्पादनमपेक्षितमस्ति। नैतिकता, धार्मिकता, सहानुभूतिः, पारस्परिकं प्रेम, अन्यसहायार्थं स्वार्थत्यागः, परोपकारः, अन्येभ्यो दत्त्वा भोजनग्रहणमादिगुणाः दैनिकजीवनयापनायावश्यकाः सन्ति।

गान्धिदर्शनस्य सारभूतं तत्त्वमभयमस्ति। निर्भयो जनः स्वलक्ष्यप्राप्तिकरणे समर्थो भवति। अनेन जीवनदर्शनानुसारेण वाण्याः पवित्रतापि परमावश्यकी वर्त्तते। येन स्ववाणी पावनी विहिता तथा यो हितवचनस्य पालनंकरोति, स जनः दैनिककार्येषु सफलो भवति। वचनशुद्धया सह मनःशुद्धिरप्यपेक्षितास्ति। यदि मनसि कश्चन गर्हितविचारः प्रविशति तदा वाण्यपि विकृता जायते। यावन्मनो विकाररहितं न भवति तावन्मनुष्यः स्वकार्यकलापेषु सिद्धिं न प्राप्नोति। य आत्मालोचनपूर्वकं देशसमाजयोः कार्ये प्रवृत्तो भवति, स एव समाजे गतिशीलतामुत्पादयति। प्रार्थनामात्मनिवेदनञ्च गान्धीमहोदय आत्मशुद्धयर्थं परमावश्यकं स्वीकृतवान्। सदाचरणं तथा सज्जनतापूर्णो व्यवहारो वैयक्तिकसफलताया एव मूले न स्तोऽपितु सामाजिकसफलताया अपि मूले स्तः। अतएव मानवस्य प्रत्येकव्यवहार एतादृशः

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

स्यात्, येन तस्मिन् हिंसा-स्वार्थौं समाहितौ न भवेताम् तथा परहितकामनाः निहिताः भवेयुः ।

गान्धी जीवनोत्थानायान्धविश्वासनिराकरणमपि समीहते । योऽन्धविश्वासेषु संलग्नोऽस्ति, शारीरिकबौद्धिकश्रमेभ्यो दूरेऽस्ति, स सफलतां प्राप्तुं न शक्नोति । बौद्धिकश्रमेण सह जीवनस्यावश्यकताः पूर्णाः विधातुं शारीरिकश्रमोऽप्यपेक्षितो विद्यते । शारीरिकावश्यकता शरीरेणैव पूर्णा भवेत्, एतस्याधिकावश्यकता विद्यते ।

जीवनदर्शनारम्भः जनस्यात्मनिरीक्षणाच्च भवति । यः स्वदोषान् स्वयं जानाति, तस्य दोषाः ततः स्वयमेव निर्गच्छन्ति । परं योऽहङ्कारवशेन स्वदोषानपि स्वगुणेषु गणयितुं समीहते, स स्वयमात्मानं छलयति तथैवान्यानपि । विश्वप्रेम्णा समाजसेवया च जीवनार्थमावश्यकतत्त्वेन भाव्यम् । विश्वप्रेम्णोदारतयैव च मानवतायाः द्वारोद्घाटनं सम्भाव्यते । त्यागः सेवा च व्यक्तिसमाजयोरुभयोरपि कृते सुखदायिन्यौ स्तः । गान्धिमहोदय आध्यात्मिकतां कमपि विशेषधर्मं मतमुपासनां पद्धतिं वा न मनुते । स आध्यात्मिकतामपि नैतिकतायाः पर्यायं स्वीकरोति । तद्दृष्ट्या धर्मे नैतिकजीवने च न कोऽपि भेदो विद्यते । केवलं सिद्धान्तेषु विश्वासेन मनुष्यो नोत्तमो भवितुं शक्नोति । तदर्थं सत्कर्मकरणं सदाचारपूर्णजीवनयापनञ्चावश्यके स्तः । कर्म विना श्रद्धा शून्या वर्त्तते । सदाचारः आत्मनीश्वरे च विश्वासः, विकारशमनम्, इन्द्रियदमनम्, संयमश्च जीवनोत्थानाय परमावश्यकाः सन्ति । कार्ये प्रवृत्तिरुद्योगशीलता च जनेभ्योऽनिवार्ये स्तः । संक्षेपेण गान्धिजीवनदर्शने निम्नाङ्कितानि तत्त्वानि समादिष्टानि सन्ति—

१ सप्तव्रतानामाचरणम् । २ आर्थिकसमतायाः विश्वासः । ३ वर्गविहीनस्यान्यभेदविहीनस्य च समाजस्य स्थापना । ४ परसेवायाः परोपकारवृत्तेश्च कामना । ५ निर्भयता । ६ सदाचारं प्रति निष्ठा । ७ शरीरश्रममहत्त्वम् । ८ पारिवारिकसमाजस्य स्थापना ९ ग्राम्यजीवनस्य विश्वासः । १० वैयक्तिकजीवनस्य लोकजीवनस्य च सन्तुलनम् । ११ सर्वोदयसमाजस्य प्रतिष्ठा । १२ स्वार्थत्यागः । १३ आत्मनिरीक्षणभावना । १४ भौतिकव्यामोहत्यागः । १५ आत्मशुद्धयर्थमुपवासं प्रति निष्ठा । १६ साधनसाध्ययोरेकता । १७ वैयक्तिकानां सामाजिकमूल्यानाञ्च पुनर्घटनम् । १८ साम्ययोगस्वामित्वस्य भावना । १९ वैयक्तिकस्वामित्वस्य वैयक्तिकसम्पत्तेश्च त्यागः । २० सहयोगव्यवस्थां प्रति निष्ठा । २१ दृढसंकल्पः ।

अर्थदर्शनम्

वर्त्तमानयुगे महात्मगान्धिना ये विचाराः प्रस्तुताः ते तदर्थदर्शनान्तर्गताः सन्ति । स स्वार्थनीतेः व्याख्यां कुर्वंल्लिखितवान्—"यद्दरिद्रता महत्पापमस्ति । यदि

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

मानवः जीवनदायिनीरावश्यकताः न तर्पयति तदा ततोऽधिकममानवीयं पापं किं भवितुमर्हति। एतस्यां स्थित्यां जीवननिर्वाहस्य स्तरं वर्द्धयितुं लिप्सा पूर्णतया मानवीया वर्त्तते। अतो मानवापमानस्य, शोषणस्यात्याचारस्य च जन्मानि जायन्ते। अर्थशास्त्रेणैतस्याः प्रक्रियाया अवरोधो विधेयः। प्रतिस्पर्द्धास्थाने सहयोगस्थापनं भवेत्, येन मानवः सहोपभोगस्य, सहजीवनस्य तथा सहोत्पादनस्य लक्ष्यं प्राप्नुयात्, एतदेवार्थशास्त्रमस्ति। एतदर्थं प्रत्येकजनेन शारीरिकश्रमोऽनिवार्यरूपेण विधेयः। एषा जीवनस्य परमावश्यकता विद्यते। प्रत्येकजनस्य व्यक्तित्वं दीव्येदेतदर्थं चेष्टा भवेत्। सर्वेषां व्यक्तित्वस्य संभावनाः विकसिताः भवेयुः, तथा सर्वे स्वजीवन-दायिनीनानावश्यकतानामुपार्जनं कुर्युः, एवं प्रयत्नो विधेयः। यावदन्यो जनः बुभुक्षितः स्थास्यति, तावत् स्वबुभुक्षापि शान्ता न भविष्यति, अतोऽन्यबुभुक्षा-शमनाय योऽहिंसकोपायो विद्यते, तदेव गान्ध्यर्थदर्शनमस्ति।"[1]

गान्धिनार्थदर्शनस्य व्याख्यानावसरे लिखितमस्ति यन्नैतिकाचरणं स्वनियन्त्रणञ्च जीवने समाजे च महत्त्वपूर्णे स्तः। प्राकृतिकजीवनस्य प्राकृतिकव्रतस्यैवं प्राकृतिक-नियमानामाचरणेन मनुष्यः सबलो भवति तथा निजावश्यकता अहिंसाचरणद्वारेण पूरयति। सत्यामेव कर्मठतायां वासनालस्यञ्च स्थानं न प्राप्नुतः।

गान्धिनोऽर्थदर्शनस्य स्तम्भद्वयमस्ति—(१) सत्यम् (२) अहिंसा च। यथार्थतो मानवजीवनस्याधारमेव सत्याहिंसे स्तः। जीवनस्य मूलभूतान्नवस्त्रावश्यक-तानां समाधानं स स्वराज्येन रामराज्यद्वारेण वा स्थापितवान्। हस्तनिर्मितवस्त्राय (खादी) ग्रामोद्योगाय च विशेषं महत्त्वं दत्तमस्ति। गान्धिमतानुसारमुपभोक्तृ-स्थाने उत्पादकस्य प्रतिष्ठा वर्तते।

---

१. विशेष जानकारी के लिए देखें।
गान्धीजी एक कुशल एवं व्यावहारिक अर्थशास्त्री थे। इसलिए इनकी समाज-रचना का चित्र पूर्णतया सत्य है। अन्य अर्थशास्त्रियों की भाँति गान्धीजी 'कम काम ज्यादा दाम' या 'सस्ता खरीदो मँहगा बेचो' या 'निर्जीव माँग और पूर्ति सन्तुलन' आदि के अमानवीय एकांगी रूप को अपनाने वाले नहीं हैं। इन्होंने मानवीय अर्थशास्त्र की श्रेष्ठ परम्परा अपनायी है। मानव जीवन के समग्र विकास राजनैतिक, सामाजिक, आर्थिक, नैतिक एवं व्यक्तिगत पहलू का पूर्ण ध्यान गांधीजी को है। आर्थिक जीवन एकांगी नहीं है। साथ ही उनके आर्थिक सिद्धान्त हवाई नहीं हैं, बल्कि सब विचार पहले आचार से पुष्ट करके निकले हैं।
—महात्मा गांधीजी का आर्थिक दर्शन, काशी विद्यापीठ, पृ० १०२-१०६

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

वर्त्तमानार्थशास्त्रं यत्र मानवस्य शिष्टतां,सभ्यतां संस्कृतिं मानवताञ्च विकृताः करोति, तत्र महात्मगान्धिनोऽर्थदर्शनं भौतिकव्यामोहमपनीय मानवतायाः प्रतिष्ठां करोति। अध्यात्मनः भौतिकतायाश्च संघर्षविरोधौ महात्मनो वाण्यपनीतवती। महात्मा गान्धी स्वावश्यकतायाः पदार्थानां स्वयमुत्पादने बलं ददाति। यावन्मनुष्यः श्रमेण स्वावश्यकपदार्थानामुत्पादनं स्वयं न करिष्यति, तावत् तस्यार्थिकसमस्यायाः समाधानं न प्राप्स्यते। शारीरिकश्रमः जीवनस्य पवित्रो व्रतोऽस्ति। श्रमः पूजा-सदृशः पवित्रः प्रतिष्ठितश्च मान्यः।

कार्लमार्क्सेन वर्गविहीनस्य, शोषणविहीनस्य राज्यविहीनस्य च समाजस्य कल्पना कृता। परं गान्धी शारीरिकश्रमस्य प्रतिष्ठया तं साकारं कृतवान्। स्वराज्या-न्दोलने स्वदेशिवस्त्राणां व्यवहारे तथा मानवाधिकारं प्रति विहितकुठाराघात-विरोधे सत्याग्रहो जन्मालभत। गान्धी भारतीयकृषकं परमेश्वरं मनुते। यतस्त-दृष्ट्या शारीरिकश्रम एव सर्वोपरिवैभवमस्ति। कृषकः श्रमस्य प्रतीकमस्ति। स उत्पादकोऽस्ति, अनेनैव प्रकारेण स भगवान्नित्युच्यते। यतो भगवतः निवासः श्रम एवास्ति। अतः सर्वैः स वन्दनीयो विद्यते। कृषक-श्रमिकावुभावपि तद्दृष्ट्या महान्तौ विद्येते।

गान्धिनोऽर्थदर्शनं वयं सर्वोदयार्थदर्शनं वक्तुं शक्नुमः। सर्वोदये समतायाः भावोऽस्ति। अतएव साम्यवादो न भूत्वा साम्ययोगो भवति। फलत उत्पादनस्य, वितरणस्य, विनिमयादेश्च सर्वेषां सम्यक् विकासो भवति। एतदर्थदर्शनद्वारेण समाजस्य प्रत्येकजनस्य विकासो जायते। गान्धिनोऽर्थदर्शनस्य दृष्टिः निम्नप्रकारेण विचार्यते--

१ एतस्याः समाजरचनाया आधारे नीतेः, धर्मस्य, सत्यस्याहिंसायाश्च प्रमुखं स्थानम्। जीवनस्य प्रमुखावश्यकतानां पूर्त्यर्थं नैतिकदृष्ट्या श्रमकरणमावश्यकमस्ति। श्रमं विना जीवनं विफलंविद्यते। सफलताया एकमात्रसाधनं शारीरिकश्रमः मन्यते। श्रमः तपश्चरणमपि कथ्यते। श्रमेण विना किमपि कार्यं न सिद्धयति। आर्थिक समस्यायाः समाधानं श्रम एव विद्यते। श्रमेणैवाभीष्टसाधनं जायते।[१]

विशेष जानने के लिए देखें—

१. प्रत्येक मनुष्य श्रमवान् बने, श्रम से ही उत्पादन सम्भव है। श्रम प्रत्येक मनुष्य का प्रतिदिन का व्रत बने। श्रम ही उत्पादन का साधन है। श्रम ही वस्तुओं का मूल्य निर्धारित करता है—महात्मा गान्धीजीका आर्थिक दर्शन। पृ० ७।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

२ आर्थिकसमता । ३ स्थातृग्रहणस्य सिद्धान्तः (ट्रष्टीशिप) । ४ सामाजिकक्षेत्रेपूच्चावचभेदाभावः । ५ बौद्धिकशक्तेः विकासस्य सर्वेषां कृते समानोऽधिकारः । ६ श्रमानुसारं पदार्थानां मूल्यनिर्धारणम् । ७ स्वशासन-बाह्यशासनाभ्यां मुक्तिः । ८ श्रमनिष्ठसमाजस्य सद्भावः । ९ व्ययसाध्यचिकित्सास्थाने प्राकृतिकचिकित्सायाः प्राधान्यम् १० लोकहिताय साहित्यस्य, कलायाः विज्ञानस्य च स्थापनं, संवर्द्धनञ्च । ११ सहकारिताया आवश्यकता । १२ साधनशुद्धिः । १३ सामाजिकलाभार्थं कार्यसञ्चालनम् । १४ सम्पत्तेः सदुपयोगः स्वार्थहेतुकः न करणीयोऽपि तु समाजकल्याणार्थं तस्य विनियोगः विधेयः । कोऽपि जनो यथा स्वं प्रत्युत्तरदायी, तथैव समाजं प्रत्यपि । १५ वस्तूनां स्वामित्वं सामाजिकमेव स्यात् ।

गान्धिनोऽर्थदर्शनस्याधारं मानवीयमूल्यमस्ति । अथ जगति या आर्थिकपद्धतयः सन्ति, तासामाधारं भौतिकमूल्यमस्ति । यानि बाह्यवस्तूनि सन्ति, तान्यस्माकं शारीरिकावश्यकतानां तृप्तिं कुर्वन्ति । अर्थशास्त्रे च तेषां भौतिकपदार्थानां मूल्यानां विवेचनं भवति । परं गान्धिविचारानुसारमर्थशास्त्रस्य लक्ष्यं मानवीयमूल्यानां प्राप्तिरस्ति । मनुष्याणां कृत एव समस्तभौतिकोपकरणानां साधनानाञ्च प्रयोगो भवति । अत एतेषामुपकरणानां प्रयोग एवम्प्रकारेण भवेत्, यन्मानवताया अधिकाधिको विकासः जायेत । आदर्शमूल्यानां स्थितौ माध्यमस्य प्रधानता भवति, भौतिकमूल्येषु साधनस्य । गान्धिविचारानुसारं मनुष्यस्य नैतिकविकासस्यात्यधिकावश्यकता विद्यते । गान्धी स्वार्थदर्शनपूर्त्यर्थं पञ्चदशसूत्रात्मकं कार्यक्रमं प्रदत्तवान्, यस्मिन् ग्रामाणां विकासोऽपि समाविष्टोऽस्ति । महात्मा गान्ध्यौद्योगीकरणस्य विरोध्यासीत् ।

तस्य मतमासीद्यत् भारतसदृशजनसंख्यकदीनदेशकृते महतां यन्त्राणामुपयोगो लाभदायको नास्ति । औद्योगीकरणे धनसञ्चयः कतिपयजनानां हस्तेषु भवति । येन समस्तार्थव्यवस्था कतिपयजनैः सञ्चालिता भवति । स्वभावतः समाजे आर्थिकी समानतायाति । यदा धनस्य समग्रं कार्यं कतिचन जनाः करिष्यन्ति, तदा तेषु प्रलोभनं भविष्यति, समाजे चासमानता व्याप्ता भविष्यति । अतो भारतसदृशनिर्धनदेशकृते नौद्योगीकरणस्य तद्रूपं स्वीकृतं भविष्यति, यद् विदेशेऽद्य स्वीकृतम् । महात्मा गान्ध्यार्थिकसङ्घटनमेवं निर्मातुं समीहते, येनाधिकाधिकजनाः लाभान्विताः भवेयुः, समाजे चार्थिकसमानता भवेत् । औद्योगीकरणस्य सर्वाधिको महान् दोषः गान्धिदृष्ट्यैषोऽस्ति यद् सिद्धं वस्तु ग्रामेभ्यो नगरेषु गच्छति, येन नगराणां वृद्धिर्भवति ग्रामाणाञ्च ह्रासो जायते तथा ग्रामीणार्थिकव्यवस्थासन्तुलिता जायते ।[1]

१. विशेष जानने के लिए देखें—'औद्योगीकरण पर गान्धीजी के विचार'—महात्मा गाँधीजी का आर्थिक दर्शन, वाराणसी, पृ० २४०–२५० ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

एकस्मिन्नेवस्थानेऽत्यधिकोत्पादनकारणाद् व्यर्थता (बेकारी) प्रसरति। निर्जीवशिल्पशालानान्तु वृद्धिर्भवति, परं सजीवमनुष्या आजीविकारहिताः भवन्ति। फलत आजीविकाहीनानां समस्या प्रतिदिनं वर्द्धते तथा समाजेऽव्यवस्था भ्रष्टाचारश्चोत्पद्येते। स्वामिभृत्यभावना समाजे प्रसरति।

महात्मा गान्धी यन्त्रोद्योगं मर्यादितं चिकीर्षन्नासीत्। स महतां वस्तूनामुत्पादनमेभिरुद्योगैरावश्यकं मनुते स्म। फलतः तद्दृष्ट्या ग्रामोद्योगस्य स्थानं प्रथममासीत्, यन्त्रोद्योगस्य च द्वितीयम्। गान्धी स्वदेशिवस्तुनः परिभाषां लिखन् कथितवान्—"यद्वस्तु कोटि-कोटि-भारतीयानां हितानां संवर्द्धनं कुर्यात्; यद्यपि तस्मिन् विदेशस्य सम्पत् लग्ना भवेत्, कौशलञ्च लग्नं भवेत्, तद्धितसाधकत्वेन स्वदेश्यस्ति। परं सा सम्पत् तत्कौशलञ्च भारतीयनियन्त्रणे स्याताम्।"[१]

"किमपि वस्तु स्वदेशि तदैव कथ्यते, यदैतत् सिद्धं भवेत्, यत्तद्वस्तु जनसमुदायहितायास्ति, तथा तस्मिन् कार्यकर्त्तारः श्रमिकाश्च भारतीयाः सन्ति।"[२]

स्पष्टमस्ति यत् गान्धी ग्रामोद्योगाय विशेषमहत्त्वमददात्। सोऽनेनैव जनसामान्यं समृद्धं समानञ्च चिकीर्षन्नासीत्[३]। मानवमूल्यानां स्थापना ग्रामोद्योगेनैव सम्भवास्ति। स्वास्थ्यस्य स्वच्छतायाः सन्तुलितभोजनस्य तथा सामाजिक-मानसिकाध्यात्मिकविकासस्य साधनानामुपलब्धिः ग्रामोद्योगद्वारेणैव सम्भवति। मानवजीवनं ग्रामोद्योगद्वारेणैव स्वावलम्बि भवितुमर्हति। सन्तोषस्य स्वावलम्बनस्य, सदाचारस्य तथा सहकारितायाः सम्मुखं तदग्रसरं भवितुं शक्नोति। अपरिग्रहः, अहिंसा तथा सत्यमेव नवजीवनस्याधारं सम्पत्स्यन्ते। अतएव महात्मगान्धिदृष्ट्या ग्रामोद्योगस्य महत्त्वपूर्णं स्थानमस्ति।

महात्मनो गान्धिनोऽर्थदर्शनस्य प्रमुखाधारं श्रमोऽस्ति। शरीरस्यास्तित्वाय पोषणाय च यावती खाद्यपदार्थस्यावश्यकता विद्यते तावत्येवश्रमस्यापि। स वैज्ञानिकधार्मिकविचाराणां सम्मिश्रणं विधायार्थव्यवस्थां श्रममूलां सिद्धां कृतवान्। तस्य विश्वासोऽस्ति यत् प्रकृतिः समाजे सर्वान् जनान् समानान् सृष्टवती। एतस्य समत्वस्य निर्वाहः पारस्परिकसम्बन्धानामाधार एव सम्भवोऽस्ति। यावत् भेदभावस्य वर्गसंघर्षस्य चास्तित्वं स्थास्यति, तावत् समत्वस्य स्थापना न भविष्यति। अर्थसदृशेन भौतिकसाधनेनापि सह समतायाः, स्वतन्त्रतायाः भ्रातृत्वस्य च सम्बन्धोऽस्ति। यः

---

१. हरिजन सेवक ३०।१०।३७।

२. वही, नवम्बर, दिसम्बर १९३८, १८३९।

३. Young India 18।10।20; 21।7।20; 16।6।28।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

समाजः स्वमूल्यानां प्रतिष्ठां कुर्वन् स्वमूलभूतशक्तीनां कलात्मकं विकासं समीहते, स समाजः समतायाः स्वतन्त्रतायाश्चाधार एव तथाकर्त्तुं शक्नोति। गीतायां भगवता कृष्णेन कथितम्—

आशापाशशतैर्बद्धाः कामक्रोधपरायणाः।
ईहन्ते कामभोगार्थमन्यायेनार्थसञ्चयान्॥ —गीता १६।१२
अहंकारं बलं दर्पं कामं क्रोधं च संश्रिताः।
मामात्मपरदेहेषु प्रद्विषन्तोऽभ्यसूयकाः॥—गीता० १६।१८

प्रत्येकजनः समाजे परस्परसहायतया सम्पदो भौतिकवस्तूनां वार्जनं करोति। मनुष्यस्य कापि सम्पद् परस्परं साहाय्यं विना नार्जिता भवितुं शक्नोति। मनुष्यस्य प्राथमिकावश्यकताः भोजनस्य शरीरसंरक्षणस्य च सन्ति। इमा आवश्यकताः कस्मिंश्चिद्देशे समाजे च पूर्णरूपेण तृप्ताः भवन्ति, क्वचिदल्पमात्रायाम्। अस्यां स्थितौ समुत्पादितशक्तेः कश्चिद्भागः यस्मिन् कस्मिन्नपि रूपे समाजस्य कतिपयसमर्थ-जनानां सविधे सम्पत्तिरूपे धनरूपे वा एकत्र जायते। अस्याः सम्पदः साधनस्य वा स्वामित्वमस्य जनस्य न हि, प्रत्युत समग्रसमाजस्य जायते। स जनस्तु केवलं तद्धनं संरक्षण-(ट्रस्टीशिप) रूपेण स्वसमीपे रक्षति; येन तस्योपयोगः समाजस्य कार्याणं कृते विहितः स्यात्। भूमिः, सम्पत्तिः, श्रमः, बुद्धिः, साधनञ्चैतानि सर्वाणि जनविशेषसमीपे संरक्षणार्थं सन्ति। स्वयमुपयोगार्थं न। महात्मगान्धिनः संरक्षणस्यैष सिद्धान्तः तदीयार्थदर्शनस्यैकः पक्षोऽस्ति।

प्राचीनार्थशास्त्रे जीवनम्, सम्पत्तिः, तथा सुखमेतानि त्रीणि मानवस्य मौलिकाधारे प्रतिष्ठितान्यासन्। समाजवादिन्या विचारधारयैतस्य खण्डनं कृतम्। सम्पच्च शोषणस्वरूपा स्वीकृता। एवम्प्रकारेण प्राचीनार्थिकविचारधारायां समाजवादिन्यां विचारधारायाञ्च मतभिन्नतास्ति। महात्मा गान्धी स्वव्रतेषु संयोज्यापरिग्रहं परिग्रहं स्तेयरूपेण स्वीकृतवान्। परिग्रहस्य द्वे प्रमुखकारणे स्तः लोभः रक्षा च। यतः समाजे आवश्यकतानां तृप्तेराश्वासनं नास्ति, सम्पत्तिर्न पूर्णतया लोभ-परिणामोऽस्ति न वा पूर्णतया मनुष्यस्य पुरुषार्थस्य मितव्ययितायाश्च परिणामो विद्यते। एतस्य प्रभुत्वकारणं मूलद्रव्यवादी समाजो वर्त्तते; यः मानवाय तस्य भविष्यदावश्यकतानां तृप्तेराश्वासनं न ददाति। एतदर्थमेव जनः संग्रहं करोति। एतत्संग्रहकारणात् एकत्राभाव आवश्यकता चान्यत्राधिक्यं विपुलताश्च जायन्ते। स्पष्टमस्ति यत् सम्पत्तिः स्वामित्वञ्च चौर्यमनैतिकता च स्तः। महात्मा गान्धी ऋग्वेद-वत् एकाकिभोजनकर्त्तारं चौरं मनुते। तस्यैतदपि कथनमस्ति यत् सम्पत्तिशाली, स्वामिवान् च जनः सदैव द्रष्टो न भवति। अतएव संरक्षणसिद्धान्तः समाजनिर्माणार्थ-

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

मावश्यकोऽस्ति। अस्तेयमपरिग्रहश्चार्थिकरचनायाः मूलभूतौ स्तः। इमौ द्वावपि सिद्धान्तौ गान्धी संरक्षणसिद्धान्ते मेलितवान्। समाजवादिनः स्वामित्वं सम्पदञ्च धनिकेभ्यः पुञ्जपतिभ्यश्चादाय श्रमिकवर्गेभ्यो दातुमिच्छन्ति। परमेतादृश्यादान-प्रदानव्यवस्थाप्यनर्थकारिण्यस्ति। एषोऽनर्थोऽपि संरक्षणसिद्धान्तद्वारेणैव दूरी-कृतो भविष्यति।

सामाजिकपरिस्थित्या स्वयंकृतपुरुषार्थेन च यत्किञ्चन मानवेन प्राप्यते, तस्य न्यासरूपेण संरक्षणीयरूपेण वा स्वीकृतिः संरक्षणस्य सिद्धान्तोऽस्ति।[1] प्रत्येकजन-समीपे या सम्पत्तिः स्वामित्वं वा वर्त्तते, तदसौ न स्वोपभोगायावगच्छेत्; तथा न केनाप्यार्थिकसाधनद्वारेण तद्वृद्धिं कुर्यात्। एष संरक्षणस्य न्यासस्य वा सिद्धान्तः सामाजिकपरिवर्त्तनस्य कारणमस्ति।

गान्धी श्रममपि सम्पदं मनुते। स श्रमायार्थिकोपकरणाय च समानमादरं प्रयच्छति। स सर्वाणि वस्तूनि भगवद्दत्तानि मनुते। अतएव कस्यापि दुरुपयोगः पापमूलकोऽस्ति। अथर्ववेदेऽपि लिखितमस्ति—

श्रमेण तपसा सृष्टा ब्रह्मणा वित्तर्ते श्रिता।
सत्येनावृता श्रिया प्रावृता यशसा परीवृता
स्वधया परिहिता श्रद्धया पर्यूढा दीक्षया गुप्ता यज्ञे प्रतिष्ठिता लोको निधनम्॥

—अथर्व० का० १२, सू० ५ मं० १–३

गान्धिदर्शनानुसारं प्रत्येकमनुष्यः स्वतन्त्रप्रेरणया स्वस्य शक्तेः रुचेः वानुसार-मुन्नतरूपेण कार्यं करिष्यति तथाधिकाधिकं समाजाय दास्यति तथा न्यूनातिन्यूनं ततो ग्रहीष्यति। इमां प्रत्यर्पणभावनां यदा मानवो मनसि समानयति, तदा स स्वकीयां कलां प्रतिभां श्रमञ्च समर्पयति। फलतः जनदृष्ट्या सार्वभौमदृष्टेः विकासो भवति स्व-पर-भावनायाः लोपो जायते।

संरक्षणसिद्धान्तः (ट्रष्टीशिपं) वैयक्तिकसम्पत्तेः स्वामित्वं न स्वीकरोति। केवलं तत्सीमापर्यन्तं स्वामित्वाधिकारः स्वीकृतो भविष्यति, यत्सीमापर्यन्तं समाजः सर्वकल्याणं पश्यन् स्वामित्वस्वीकृतिं दास्यति। यस्य प्रकारस्य स्वामित्वेन सम्पूर्ण-

---

१. प्रत्येक सम्पत्तिवाला यह समझे कि सब सम्पत्ति उसीकी नहीं हैं, बल्कि सारे राष्ट्र की है। राज्य, जिसका जन्म ही हिंसासे हुआ है, लोगों की सम्पत्ति लेनेमें हिंसाका प्रयोग अवश्य करेगा। लोग स्वेच्छा से ट्रष्टियों की तरह जब व्यवहार करने लगते हैं, तो राज्य या हिंसा की कोई आवश्यकता नहीं है।

—यंगइण्डिया ३०।४।३१, १०।९।३१

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

समाजः लाभान्वितो भवति, तत्प्रकारमेव स्वामित्वं सीमितरूपे मर्यादितरूपे च स्वीकृतं भवितुं शक्नोति । एतावदेव नहि, प्रत्येकजनः स्वनिर्वाहयोग्यानां स्वावश्यकतानां पूर्त्ति सहजरूपेण करिष्यति । संक्षेपेणैतत् सिद्धान्तस्य मूलतत्त्वं सार्वजनीनोपभोगः कल्याणञ्चास्ति । शोषणसञ्चययोरभावे जाते व्यक्तिसमाजौ समत्वस्य, साम्यस्य सार्वजनीनकल्याणस्य सिद्धान्तं प्राप्नुयात् ।

समाजदर्शनम्

गान्धिनः समाजदर्शनमीशोपनिषदः साम्यवादस्याधारे प्रतिष्ठितमस्ति । अस्य महात्मनः समाजदर्शने द्वैतं नास्ति, एकतामात्रं विद्यते । अहिंसया धनिकेषु संरक्षणभावनां प्रतिष्ठाप्य सर्वेभ्यः समानरूपेणार्थिकविकासस्य द्वारोद्घाटनं गान्धिनः समाज दर्शनस्यैका प्रमुखमान्यतास्ति । विशेषरूपेण मानवजातेः सामाजिकसंघटनाभिमुखं मानवध्यानं केन्द्रितं विधाय तेन सह सामाजिकपक्षानां महत्त्वस्य व्याख्यानं समाजदर्शनमस्ति । गान्धिनास्मिन् विशेषरूपेण जीवनस्य मूल्यानाम्, उद्देश्यानामादर्शनाञ्चाध्ययनं कृतम् । स प्रत्येकजनस्य आर्थिक्याः, सामाजिक्याः, राजनैतिक्याश्च समस्यायाः समाधानं स्वकीये समाजदर्शने समुपस्थापयति । सर्वे मनुष्याः समानाः समानरूपेणोत्पन्नाः सन्ति । अतस्तेभ्यः विकासाय समानावसरो लभ्यो भवेत् । अहिंसात्मकसमानतायाः मूलमन्त्रोऽस्ति—आर्थिकस्वतन्त्रता । सत्यामार्थिकविषमतायां स्वस्थसमाजस्य स्थापना न भवितुमर्हति । अल्पतमाः जनाः धनाढ्याः भवेयुः समूहश्च च बुभुक्षया मृतो भवेत्, एतादृशः समाजः कल्याणकारी भवितुं न शक्नोति । गान्धिनः समाजदर्शनस्य प्रथमः मन्त्रोऽस्ति—सरलजीवनमुच्चविचारश्च ।[1] एतस्य व्याख्यां कुर्वन्नुक्तवान्—"अहमेतादृशभारताय चेष्टां करिष्यामि, यस्मिन् निर्धनाः, हीनतमाश्चापि ज्ञास्यन्ति यदयं तेषां देशोऽस्ति; यस्य निर्माणे तेषां वाण्याः महत्त्वमस्ति । अहमेतादृशाय भारताय यतिष्ये, यस्मिन्नुच्चनीचयोर्वर्गभेदो न स्थास्यति तथा यस्मिन् विविधसम्प्रदायेषु परस्परं प्रेमभावना निहिता भविष्यति । एतादृशे भारतेऽस्पृश्यतायाः मद्यस्य तथान्यमादकपदार्थानामभिशापाय किमपि स्थानं न भविष्यति । न वयं कस्यापि शोषणं करिष्यामः न वा केनापि कृतं स्वशोषणं वक्ष्यामः ।[2]

महात्मागान्धी "सबै भूमि गोपालकी" वाक्ये विश्वसिति । समस्ता भूमिः जनताया अस्ति । पुञ्जपतिभ्यः हिंसकरीत्या पुञ्जस्यापहरणमविधायाहिंसकरूपेण

---

१. youg India 30।5।3।

२. वही, १०।९।३। तथा हरिजन, दिसम्बर १९४०,

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

तस्योपयोगो विधातव्यः प्रतिस्पर्द्धायाः स्थानं गान्धिनः समाजदर्शने नास्ति । गान्धि-समाजदर्शनस्य सम्यक् ज्ञानाय तस्य निम्नांकिततत्त्वानां ज्ञानमावश्यकमस्ति ।

१ समानतायाः स्थापना न केवलमार्थिकक्षेत्रेऽपितु जीवनस्य प्रत्येकक्षेत्रे विधातव्या । संसारस्य सर्वे प्राणिनः समानशक्तिमन्तस्सन्ति । सर्वेभ्यः स्वतिरोहित-शक्तिविकासाय समानाधिकारः प्राप्तो विद्यते । कस्यापि वर्गस्य समाजस्य सम्प्रदायस्य वा सर्वेभ्यः मानवेभ्यः समानरूपेण स्वावश्यकतातृप्त्यै अधिकार उपलब्धोऽस्ति । फलतः वर्णभेदस्य जातिभेदस्य वा क्वापि स्थानं नास्ति । गान्धीलिखितवान्— "वर्णेषूच्चावचाः सन्त्येव नहि । स तु पतित एतदर्थं कथ्यते यत् स स्वपतितताम् विहाय परावृत्य ब्राह्मणो भवितुं शक्नोति । उच्चावचवार्त्तां परित्यज्यैतदेव मन्यताम् यत् वर्द्धकिः वर्द्धकित्वं विहाय यदि मलस्वच्छतायाः कार्यं कुर्यात् तदा किं गीता तम्प्रति व्यक्ति यत् स धर्मच्युतो जातः—"स्वधर्मे निधनं श्रेयः" तक्षकः स्वर्णकारस्य कार्यं यदि न कुर्यात्, वेदाध्ययनमेव करोतु, तदात्वहं तं पतितमेवतक्षकं वक्ष्यामि । धर्मकर्मणोः समन्वयः कर्त्तव्यो विद्यते । जनान् साहसिनः कर्त्तुं व्यवस्येत् वदेच्चयत् सर्वेव्यापारं कुर्युस्तदा किं चलिष्यति ? अतएवानुवंशिकानिकर्माणि सन्ति । वयं तु वक्ष्यामो यत् स्वबुद्धेः समाजस्य नित्यकल्याणायोपयोगं कुर्यात् । अद्य कञ्चनजङ्घो-पर्यारोहकाणां प्रशंसा भवति । मम हृदयं तेषां प्रशंसां न करोति, प्रत्युत निन्दां विदधाति । अस्माकं देशे समाजप्रतिष्ठापनार्थं मानवीयमूल्यानामन्वेषणं परमावश्य-कमस्ति । पतञ्जलिरहिंसायाः शास्त्रीयमन्वेषणमकरोत् ।[1] गीतायां वाङ्मयतपसः लक्षणं प्रतिपादितमनेन लक्षणेन समाजस्थापनार्थं वचनशुद्धिरपि परमावश्यकी, इत्यनु-मीयते । यथा—

अनुद्वेगकरं वाक्यं सत्यं प्रियहितं च यत् ।
स्वाध्यायाभ्यासनं चैव वाङ्मयं तप उच्यते ॥—गीता०१७।१५

दरीदृश्यते लोके, मनुष्याः परमकल्याणमजानन्तो] विषयभोगेच्छया परस्परं वैरमुत्पाद्याल्पसुखस्य हेतोः पर्वतप्रायदुःखमनुभूय दुखस्य कारणं जिज्ञासन्ते, परन्तु सम्यक्तया न जानन्ति ।[2] परन्त्वनेककल्पनाः कुर्वन्तः सुखदुःखकारणविषये विव-दन्ते । केचन स्वमेव स्वकीयदुःखस्य कारणतया वर्णयन्ति, परे दैवम्, अन्ये कर्म,

---

१. महादेव भाई की डायरी, तृतीय भाग, नवजीवन प्रकाशन मन्दिर, अहमदाबाद, पृ० ६१

२. लोकः स्वयं श्रेयसि नष्टदृष्टिर्योऽर्थान् समीहेत निकामकामः ।
अन्योन्यवैरः सुखलेशहेतोरनन्तदुःखं न च वेद मूढः ॥—भागवत ५।५।१६

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

केचित् स्वभावम्, एके परमेश्वरं च निरूपयन्ति ।[1] वस्तुतो विचारदृष्टयाऽहङ्कार एव दुःखकारणमस्ति, स्वस्वरूपज्ञानं सुखस्य कारणञ्चास्ति ।[2] गान्धिना स्वस्वरूपज्ञानेनात्मालोचनं स्वीकृतम् । योऽहिंसात्मकदृष्टिमवलम्ब्यात्मालोडनं करोति, स स्वदोषं स्वयमेव पश्यति । स्वदोषानामवलोकनमेव सामाजिकदृष्टयाऽहिंसाऽस्ति । अत इन्द्रियविजयपूर्वकं स्वकार्ये प्रवृत्तिर्विधेया । इन्द्रियविजयं विना निःस्वार्थवृत्तेरुत्पत्तिः नस्यात् । निःस्वार्थवृत्यभावे वर्गहीनसमाजस्य कल्पनापि न सम्भवति ।

स्पष्टमस्ति यत् गान्धी प्राचीनवर्णव्यवस्थां न मनुते स्म तद्दृष्टयाद्यसर्वे कर्मचाण्डालाः सन्ति । सर्वाः जातयः समानाः तुल्यधर्मादिकाः तुल्यगुणाश्च सन्ति । गान्धी स्वयमात्मानं कर्मानुसारं शूद्रं वैश्यं क्षत्रियं ब्राह्मणं वा कथयति स्म । मनुष्यः यथा कर्म करोति तथा तस्य वर्णः मन्यते । जन्मतो मरणपर्यन्तमेकएव वर्णस्तिष्ठतीति मान्यता गान्धिदृष्टया समीचीना नास्ति । स हरिजनानुच्चैरुत्थापितवान्, तेषां शिक्षादीक्षयोः प्रवन्धं विहितवान् तथा तेभ्यः स्वसमानसामाजिकाधिकारप्रदानस्य वार्तां कृतवान् ।

(२) गान्धिनः समाजदर्शनस्यैकोऽन्यः पक्षः सांस्कृतिकमूल्यानामाध्यात्मिकमूल्यानाञ्चास्ति । सम्पूर्णं भौतिकं नैतिकं वौद्धिकं कलाजगतश्च मूल्यमार्थिकशक्तिभिः नियन्त्रितं भवति । एवम्प्रकारेण तस्य समाजदर्शनं केवलमार्थिकसिद्धान्तोपर्येवावलम्बितं नास्ति, प्रत्युत सम्पूर्णजीवनेन सम्बद्धाः विचाराः कार्याणि च तत्र समाविष्टानि सन्ति । वस्तुतः समाजस्य समस्याः न शुद्धार्थिकाः सन्ति, नार्थप्रधानाः न चार्थिकोपपत्तिमूला एव । ताः केवलं जीवनस्यांशभूताः सन्ति । एतस्यांशस्य प्रभावः जीवनस्य विविधदिशास्ववश्यमेवापतति । परन्तु केवलमेकोंऽशएव सर्वस्वं नास्ति, सर्वाङ्गीणता विकासायापेक्षिता वर्त्तते । अतः आर्थिकक्षेत्रेण सह जीवनस्यान्यक्षेत्रेष्वपि मूल्यानां परिवर्त्तनमावश्यकमस्ति । जीवनस्य प्रत्येककार्यं विवेकसम्मतं भवेत् । समस्यानां समाधानं केवलरोटिकाभिः सम्भवं नास्ति । यतः रोटिकोत्पादकानां साधनानां शुद्धिरावश्यकी विद्यते । साधनानि चेच्छुद्धानि सन्ति, तदा प्रासरोटिकाअपि शुद्धाःभविष्यति । अतः साधनसाध्ययोरेकरूपता गान्धिनः समाजदर्शनस्यैका महत्युपलब्धिरस्ति ।

वर्तमानसमाजवादः यत्र केवलं साध्ये दृष्टिं रक्षति, तत्र गान्धिदर्शनं साधनाना-

---

१. केचिद्विकल्पवसना आहुरात्मानमात्मनः ।
दैवमन्ये परे कर्म स्वभावमपरे प्रभुम् ॥—भागवत १।१७।१९

२. भागवत ३।२६।६-७

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

मपि परीक्षणं मनुते। निस्सन्देहं साधनानां महत्त्वं कार्यसिद्धावधिकमस्ति। यदि साधनानि शुद्धानि स्युस्तदा दीन-हीन-शोषितजनानां समाजे दर्शनमेव न भवेत्।[1] एवं महात्मा गान्धी समाजस्य पुनर्घटनाय तथा आर्थिकसामाजिकभीषणविषमतानां निराकरणाय साधनशुद्धौ विशेषं ध्यानं ददाति। समाजस्य सर्वे सदस्याः समानाः सन्ति, सर्वे चैकस्यैव परमात्मानोऽशाः सन्ति। अतः प्रत्येकजनस्य सामूहिकरूपेणोत्थानमपेक्षितमस्ति।

समूहं विना व्यक्तिर्न काचित्, व्यक्तिं विना च समूहोऽपि न कश्चिदस्ति। यदि समूहोऽहिंसको विद्यते, तदा तस्य प्रतिकूलप्रभावः सामजिकजीवनेऽवश्यमेव पतति। अनैतिकव्यक्तिद्वारेण नैतिकसमाजस्य स्थापना नैव भवितुं शक्नोति। अतो गान्धिनः समाजदर्शनं व्यक्तिशुद्धेः दर्शनमस्ति। अस्पृश्यतानिवारणस्य श्रमस्य च तेनावश्यकता प्रतिपादिता। कुटुम्बस्य तत्प्रचलद्व्यवहाराणाञ्चादर्शः प्रतिपादितो विद्यते। अतएव गान्धिनः समाजदर्शनं न कार्लमार्क्सस्य समाजदर्शनसदृशं साम्यवादद्यस्ति, न वा प्राचीनविचारधारानुसारं भोगवावाद्यस्ति।

गान्धिनार्थिकक्षेत्रे संरक्षकतायाः सिद्धान्तं प्रतिपाद्यार्थिकक्रान्तिस्तु कृतैव, परं धार्मिकसामाजिकस्वतन्त्रतायाः प्रतिपादनं विधाय तेन नवमूल्यानामपि स्थापना कृता। गान्धी वर्गविहीनसमाजस्य स्थापनां वाञ्छति स्म; यस्यां शोषण-शोषितयोः पीडक-पीडितयोर्भेदोन स्यात्। सहयोगाधारे संघटितसमाजे सर्वे उन्नतेः समानमवसरं प्राप्नुवन्तु तथा सर्वे पवित्रजीवनं यापयन्तु। संयमद्वारेण स जनसंख्यावृद्धयवरोधं समीहतेस्म; येनोपभोगसाधनानां न्यूनता न भवेत्। प्रेम्णा, करुणया, मानवतया सद्भावनादिभिः शाश्वतगुणैः व्यक्ति-समाजयोः सम्बन्धं संस्थाप्य जीवनं नवीनरूपे परिणतं द्रष्टुं वाञ्छतिस्म। तस्याभिमतमासीत् यत् श्रमजीवि-बुद्धिजीविनोरुभयोः समतापेक्ष्यते। शारीरिकश्रमं विना केवलं बौद्धिकश्रमः सर्वोदयस्य कारणं भवितुं नार्हति। महात्मा गान्धी प्रमुखरूपेण शारीरिकश्रमस्य महत्त्वं प्रतिपाद्य समाज उत्पादकस्य प्रतिष्ठां स्थापितां चिकीर्षतिस्म। निस्सन्देहं बौद्धिक श्रमः आवश्यकोऽस्ति; परमसावनिवार्यरूपेण प्रमुखस्थानं ग्रहीतुन्न शक्नोति। यो

---

१. गान्धीजी के मतानुसार—प्रत्येक मनुष्य अपनी श्रम-शक्ति, बुद्धि शक्ति, साधन शक्ति, सम्पत्ति-शक्ति का प्रयोग पूर्ण निष्ठा एवं योग्यता से करेगा। अपनी आवश्यकतानुसार उपभोग करने के पश्चात् शेष समाज के लिए छोड़ देगा। अधिकतर पुरस्कार मुद्रा में न होकर वस्तु में होगा।

—महात्मा गान्धीजी का आर्थिकदर्शन, पृ० ११४

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

बौद्धिकश्रमद्वारेण शारीरिकश्रमस्य शोधनं चिकीर्षति, तस्य स विरोधं करोति। तस्य दृष्ट्या शारीरिकश्रमः सर्वोपरि वर्त्तते।

गान्धिनः समाजदर्शनमहिंसोपर्याधृतमस्ति। तदनुसारं रोगो दरिद्रता च वास्तविकसमाजे न स्थातुं शक्नुतः। यदा समाजस्य प्रत्येकजनोऽहिंसकः श्रमिकश्चाभविष्यत्, तदा सर्वाः विषमताः स्वयमेव समाप्ता अभविष्यन्। न वर्गयुद्धं भविष्यति न वान्या काचन प्रतिक्रियैव।

सत्यमेतदस्ति यत् शाश्वतमूल्याधारे गान्धिनैकस्य शान्तिमयस्य मानवसमाजस्य परिकल्पना कृता। समाजस्य विपन्नान् दीनान् जनान् समाजस्य समृद्धिशीलः जनः स्नेहेनालिङ्गेत्। एषा तस्य संरक्षकतायाः व्याख्या वर्त्तते। प्रत्येकजनः स्वावलम्बी भूत्वा परस्परावलम्बिनः कौटुम्बिकसमाजस्य सदस्यो भवेत्। जीवनदायीनि वस्तूनि अन्नवस्त्रादीन्यापणे क्रीतानि विक्रीतानि वा न स्युः। मानवश्रमो मनुष्यस्यार्थिकावश्यकता न भूत्वा सांस्कृतिकावश्यकता भवेत्। तस्य समाजः भौतिक-नैतिक-सांस्कृतिकसुखानामागारमस्ति। स्वस्थमनुष्यस्य स्वस्थसमाजस्य च लक्ष्यं तदैव पूर्णं भविष्यति, यदा स्वस्थसाधनानां प्रयोगो भविष्यति। त्यागस्य, संयमस्य, सहानुभूतेः, परोपकारितायाश्च वैयक्तिकगुणानां समाजीकरणं गान्धिनः समाजदर्शनस्य सर्वप्रमुखमङ्गमस्ति। अपरिग्रहः संरक्षकता, शारीरिकश्रमश्चैतादृशाः गुणाः सन्ति, ये समाजस्य शोषणं व्यक्तिद्वारेण व्यक्तेः वा शोषणं रुन्धन्ति। समर्पणं त्यागः निर्धनान्प्रति तादात्म्यस्य वा भावनाः प्रत्येकजने जायेरन्।

गान्धिनोऽभिमतमस्ति यत् प्रत्येकजनः समाजस्यान्तिमजनेन सह स्वजीवनयापनस्याभ्यासं कुर्यात्। एतेन तस्य भोगाकाङ्क्षाःस्वयमेव समाप्ताः भविष्यन्ति।

१. बेकारी, शोषण, दरिद्रता, वितरण की विषमता, प्रतिस्पर्धा, साम्राज्य-लिप्सा इत्यादि का अन्त गान्धीजी बड़े सरल तरीके से करा देते हैं। सामाजिक रोगों को समूल नष्ट करने में ये पूर्ण सफल होते हैं। आजतक कोई ऐसा अद्भुत व्यक्ति विश्व में उत्पन्न नहीं हुआ, जो गान्धी जी की भाँति समग्र मानवजीवन के प्रत्येक पक्ष का पण्डित हो। भारतीय सार्वजनिक जीवन में उनका प्रवेश देश की दरिद्रता को देखकर ही हुआ। मध्यकालीन भूमि-व्यवस्था, रुढिग्रस्त सामाजिक पद्धति, भारतीय जनता की दरिद्रता, ह्रासोन्मुख उद्योग आदि आर्थिक समस्याओं को लेकर गान्धीजी ने अपना कार्यक्रम निश्चित किया। अर्थशास्त्र के उपभोग, उत्पादन, विनिमय, वितरण तथा राजस्व के सभी पहलुओं पर इन्होंने प्रकाश डाला।—महात्मा गान्धी जी का आर्थिक दर्शन, पृ० १०७

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

इन्द्रियनिग्रहो भोगाकाङ्क्षाशमनार्थमत्यन्तमावश्यकोऽस्ति । यावत् समाजस्यैकोऽपि-जनोऽन्यस्य शारीरिकश्रमस्योपरि—अवलम्बितो भविष्यति, अन्यस्य शारीरिकश्रमेण स्वजीवनयापनं करिष्यति तावदालस्यस्य शोषणस्य चावरोधो न भवितुं शक्नोति । विनोत्पादनमुपयोगः, अधिकोपभोगः, अन्यान् बुभुक्षितान् त्यक्त्वोपभोगः, अन्याश्रितत्वञ्चैतत्सर्वमार्थिकहिंसा विद्यते ।

ग्रामीणजीवनस्य श्रेष्ठतोत्पादकस्य श्रेष्ठतास्ति । कृषकाः श्रमिकाश्चोत्पादकाः सन्ति । अतस्तेभ्यः पूर्णा प्रतिष्ठा देया । आधिकारिकशक्तिरपि तेभ्यो देया । सर्वविधा समता—राजनैतिको, आर्थिकी, सांस्कृतिकी वा सर्वेभ्यः प्राप्या भवेत् । एवं महात्मा गान्धी वर्गविहीनां राज्यहीनां शोषणहीनां मानवतायाः सर्वोत्कृष्टशासिकां सामूहिकसमाजव्यवस्थां ग्राह्यामकथयत् । अनयैव व्यवस्थया व्यक्तेः समाजस्य च सर्वाङ्गीणो विकासो निर्धारितोऽस्ति । तस्य समाजदर्शने उपनिषदां चिन्तनं, रामायणस्य समाजशास्त्रीयसिद्धान्ताः, बौद्धस्य जैनदर्शनस्य चाध्यात्मवादिनोऽहिंसकसिद्धान्ताः पाश्चात्यसिद्धान्तानां नवीनविचाराश्च सम्मिलिताः सन्ति ।

गान्धिदृष्ट्या संक्षेपेण समाजदर्शनस्य निम्नाङ्किताः तथ्याः आदर्शाः वर्तन्ते—

१. भय-द्वेष-हिंसा-स्तेय-परिग्रहादीनामभावः, एतेषां स्पष्टीकरणं वा । २. करुणयावृतमहिंसादर्शनमालम्बनीयम् । ३. आत्मशक्तेः पूर्णविश्वासः । ४. समाजोत्थानाय सप्तव्रतानामाचरणम् । ५. स्वदेशं प्रति दृढास्था । ६. जीवनस्य प्रत्येकक्षेत्रेऽहिंसाचरणं परमावश्यकम् । ७. जातिभेद-वर्गभेद-रंगभेदानां सर्वथा त्यागः । ८. प्रेम-त्यागानन्दैक्यादीनां जीवने प्रयोगः । ९. सर्वोदयविचारधारां प्रति निष्ठा । १०. आर्थिक समता । ११. संरक्षणसिद्धान्तस्योपयोगः (ट्रस्टीकरणं का व्यवहार) १२. सहकारितायां विश्वासः । १४. नैतिकचेतना । १५. ग्रामोद्योगानां महत्त्वम् । १६. सर्वेषां शक्तिविकासस्य पूर्णविसरः । १७. सम्पत्त्यर्जनार्थमुपलब्धसाधनानां यथार्थः उपभोगः । १८. भोग्यवस्तूनामुपयोगिवस्तूनां च वैयक्तिकस्वमित्वस्याभावः । १९. संयमपूर्णजीवनम् । २०. प्राथमिकावश्यकतानां तृप्त्यनन्तरं यद्द्रव्यमवशिष्टं तस्य विनियोगः समाजकल्याणार्थं करणीयः । २१. शोषणविहीनसमाजस्य स्थापना । २२. श्रम-समता-संयमाधारे समाजविकासस्य कल्पना । २३. अहिंसकार्थव्यवस्था । २४. जनतान्त्रिककप्रणाल्यां विश्वासः । २५. निर्धनानां, भूमिहीनानां कृषकाणां सेवकानाञ्चाभ्युत्थानार्थं यतनीयम् । २६. सहयोगपद्धत्या ग्रामीणविकासो विधेयः । २७. प्राकृतिकचिकित्सायाः प्रयोगः । २८. मद्यमांसादीनां त्यागः । २९. स्वकार्यं स्वेनैव हस्तेन करणीयम् । ३०. विकेन्द्रितोत्पादनम् । ३१. व्यक्तिश्रेयः समष्टिगतश्रेयसि निहितमस्ति । ३२. सर्वकार्याणां समानमहत्त्वमस्ति,

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

न किमपि कार्यं श्रेष्ठं न च निम्नम्। ३३. श्रमिकस्य जीवनं यथार्थम्, सर्वोत्कृष्टञ्चास्ति। ३४. प्रत्येकजनाय सेवकगुणाः अपेक्षिताः। ३५. सत्य-अहिंसा-ब्रह्मचर्य-अस्वाद-अस्तेय-अपरिग्रह-अभय-अस्पृश्यतानिवारण-शरीर-श्रम-सर्व-धर्मसमभाव-स्वदेशि-भावना, इत्येकादशव्रतानामाचरणम्।

उपसंहारः

महात्मा गान्धी युगद्रष्टा, क्रान्तिकारो शिक्षकः, कल्याणकारी समाजप्रतिष्ठापकः तथा पुरातनजीवनमूल्यानां पुनर्मूल्याङ्कक: समाजशास्त्र्यासीत्। स मानवजीवनस्य विश्वसम्बद्धानां समस्यानाञ्च समाधानमेकस्यचिन्तकस्य दार्शनिकस्य च रूपेणोपस्थापितवान्। यद्यपि दर्शनशास्त्रस्य प्राचीनमान्यतानामाधारे गान्धि-साहित्येऽत्यल्पाः सिद्धान्ताः उपलब्धाः सन्ति। परं नवीनदृष्ट्या नवचिन्तनस्यानेकतत्त्वानि तस्मिन् समाविष्टानि सन्ति। सत्याहिंसयोः, अस्तेयस्य, ब्रह्मचर्यापरिग्रहयोश्च ग्रहणं तेन श्रमणसंस्कृतेः कृतम्। श्रमणसंस्कृतेः प्रधानतत्त्वं श्रमञ्च स सर्वाधिकं महत्त्वपूर्णं स्वीकृतवान्। निश्चयतो महात्मा गान्धी एकस्तत्त्वचिन्तक एतादृशो दार्शनिकोऽस्ति यः स्वस्थस्य सवलस्य च मङ्गलपुरुषस्य कल्पनया पारिवारिकगुणाधारे नवस्यैकस्य, समाजस्य निर्माणं चिकीर्षति स्म। तस्यैष समाजः न देशविशेषस्य कृते हितकारी अभविष्यत् प्रत्युत विश्वस्य कृते।

अन्तिमनिवेदनम्

गान्धि-शताब्दिसमारोहावसरे 'मगध'स्य गान्धिदर्शन-विशेषाङ्कप्रकाशनप्रेरणा भारतीयसंस्कृतिसाहित्ययोरनुरागिणो, विदुषो मगधविश्वविद्यालयस्य माननीयोपकुलपतेः श्रीविश्वमोहनकुमारसिन्हामहोदयात्तथारास्थस्य एच. डी. जैनकालेजस्य प्राचार्यात् डा० श्रीपरमहंसरायात् प्राप्तातोऽहमुक्तोभयोरपि वरिष्ठविदुषोराभार्यस्मि। युगपुरुषः श्रमणतपस्वी महात्मा गान्धी देशायास्मै केवलं स्वतन्त्रतामेवं न दत्तवान् परमेकस्य नवसमाजस्य कल्पनामप्ययच्छत्। तदीयादर्शाधारे निर्मितः समाजः विश्वस्य समस्तचिंतकैः कल्पितस्य समाजस्यापेक्षयाधिकः श्रेष्ठः आनन्दमयश्च भविष्यति। आर्थिकविषमता धनवितरणद्वारेण दूरीकृता न भविष्यति। एतदर्थमहिंसाचरणं सत्यं च प्रति निष्ठावश्यकी वर्तते। अस्मिन्नवसरेऽहं तं श्रमणतपस्विनं प्रति श्रद्धां भक्तिञ्च समर्पयामि। धन्योऽयं महानुभावः, येनाहिंसक सर्वोदयसमाजव्यवस्थाविष्कृता।

अध्यक्षः
संस्कृत-प्राकृत-विभागः
आरास्थितः एच० डी० जैन कालेजः
मगध विश्वविद्यालयः

नेमिचन्द्र शास्त्री

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

गांधी-विचारधारायामाधृतमर्थशास्त्रम्

डॉ० परमहंसराय, एम० ए०, पी-एच० डी० (लन्दन)

सर्वप्रथमं महात्मा गांधी एक आध्यात्मिकोऽन्वेपक आसीत्। तस्यैक एवासंग आसीत्तथा स आसंग एष आसीत्, यत् भगवतो दर्शनं कथं भवेत्। भगवत्साक्षात्कारः केन प्रकारेण स्यात्। स स्वयं लिखितवान्—'यदहं प्राप्तुमिच्छामि, एतेभ्यस्त्रिंशद्वर्षेभ्यो यं प्रयत्नमहं कुर्वन्नागच्छामि तथा यदर्थमहं लालायितोऽस्मि, सोऽस्त्यात्मसाक्षात्कारः, ईश्वरस्य परस्परस्य पुरतो दर्शनम्, मोक्षप्राप्तिः।'[1]

अर्थशास्त्रस्य भाषायां महात्मनो गान्धिनः प्रमुखावश्यकतासीदीश्वरस्य परस्परस्य पुरतो विलोकनम्। ईश्वरमसौ सत्यरूपेऽन्वेष्टुं प्रारब्धवान् तथा कथितवान् यदीश्वरः सत्यमस्ति। स्वाध्यात्मिकान्वेषणस्योत्तरार्द्धे स एवमनुभूतवान् यत् सत्यमेवेश्वरोऽस्ति। पुनः सत्यान्वेषणे तेन प्राणा अपि न गणिताः। एष एव तदीयः स्वार्थ आसीत् तथानयैव स्वार्थभावनया प्रेरितोऽसौ स्वेष्टवस्तुप्राप्त्यर्थं प्रयत्नमकरोत्। नियमतः स प्रथमं सत्यस्य स्थूलपरिभाषां कृतवान् तथोक्तवान् यत् अस्माकं जीवनस्य समस्यायाः सम्बन्धेऽस्माकमन्तरालं यत्किमपि समाधानं प्रस्तौति, तदेव सत्यमस्ति। तस्यान्तरालस्य तात्पर्यं तदन्तःस्थितध्वनि (Inner voice) गतमासीत्, यद्वाह्यप्रभावशून्यमस्ति, तथा सत्यवदनं यस्य स्वभाव एव विद्यते। अतः सत्यान्वेषणे स स्वान्तरालं वाह्यप्रभावशून्यं कर्त्तुं प्रारब्धवान् तथा स्वभावतस्तत् सत्यं वदेत् तथाभ्यासं कर्त्तुं तेनारब्धम्।

एतदाध्यात्मिकान्वेषणकृते तस्मै प्रयोगशालाया एकस्या आवश्यकतासीत्। स्वसंस्कृतेः स्वसंस्कारस्य चानुरूपं स परम्परागतविधिभूतं पूजापाठादिकं व्रतादिकञ्च स्वीकृतवान्। परन्तु तस्य सर्वश्रेष्ठा विशेषतैषासीत्, यत् स वनगिरिगुहां निर्जनस्थानञ्च परित्यज्य स्वार्थपीडितं संघर्षपरिपूर्णमशान्तं मानवसमाजं सत्यान्वेषणार्थं प्रयोगशालारूपं स्वीकृतवान्।

---

1. The Selected works of Mahatma Gandhi–Vol I Page XIX Nawjeewan Publishing House, Ahmadabad,

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

मानवसमाजस्य यो हीनतमः अभावग्रस्तः, शोषितः, पददलितोऽस्पृश्यत्वेन घोषितो वर्ग आसीत्, तस्यैव समस्यानां समाधानान्वेषणे तेन जीवनं यापितम्। उल्लिखितवर्गं स स्वस्मादभिन्नममन्यत तथा यत्रासावुल्लिखितवर्गाद्भिन्नोऽमन्यत तत्रैव स स्पष्टं विद्रोहं चकार तथा स्वदृढास्थायाः कारणात् विरोधिनां हृदयपरिवर्त्तनं कृतवान्। गजेरा (गुर्जर) गुजरात-ग्रामे यदैकस्यां सभायामस्पृश्याः पृथगुपवेशिताः अभवन् तदैतत् तस्मा असह्यं जातम्। तदा च तेन यदुक्तं तत् स्वामिना भगवदाचार्येण स्वकाव्यग्रन्थ एवमुक्तवान्—

भिन्नो भवेयं भुवि खण्डशोऽहं तथा परावृत्य निजाश्रमाय,
गच्छेयमेतन्न परं समीहे, पराभवेद् दुर्वलमत्र कोऽपि ॥१॥[1]

मानव-समाजात् उल्लिखितदुर्वलतानां निवारणाय स विचारितवान् यत् अन्यकारणातिरिक्ता पराधीनतैव भारतीयानां चतुर्दिग्ग्रासस्य मुख्यमाधारभूतं कारणमस्ति। यदि पराधीनतां निर्मूल्य भारतीयेभ्यः स्वतन्त्रवातावरणं प्राप्येत तदेहत्यानां निवासिनां दुःख-दैन्यादिकं विनष्टं भविष्यति। एतदेव विचार्य तेन राजनीतिरेव स्वप्रयोगशाला कल्पिता, यतो राजनीतावधिकारादृतेऽर्थात् वैदेशिकशासनमपामृज्य स्वदेशीयशासनस्थापनं विना देशदैन्यं निर्धनत्वञ्च नापगते भविष्यतः। स विलोकितवान् यदस्यां परिस्थित्यामेतदेव सत्यमस्ति यत् स्वतन्त्रताप्राप्तिं विना देशे लोक-संग्रहस्य कार्यं भवितुं न शक्नोति। निर्धनता नापगता भवितुं शक्नोति, देशश्च नोत्थितुं शक्नोति। एतादृशस्य सत्यस्यान्वेषणं राजनैतिकप्रयोगशालायामेव सम्भवमासीत्। फलतः महात्मा गांधी राजनीतिनेतृत्वं स्वहस्ते गृहीतवान्। राजनीतिनेतृत्वं कुर्वन्, एतन्न विस्मर्तव्यं यत्, स सत्यान्वषेणमेवाकरोत्। तस्य स ईश्वर एवाभीष्ट आसीत्, यदर्थं स उत्कण्ठित आसीत्।

राजनीति-प्रयोगशालायां पराधीनतायाः मूलप्रश्नस्य समाधानान्वेषणन्तु तस्मै परमावश्यकमासीदेव परमेतदपि चिन्तनमभीष्टमासीद्यत् निर्धनतायाः रोगः कथमपगतो भवेत्। शोषित-शोषणं कथं समाप्तं स्यात्। अस्पृश्यतायाः व्याधिः कथं नश्येत्। राजनैतिकप्रयोगस्यापि सीमा निर्धारित आसीत्। प्रथमा वार्त्तेयमासीद्यदेतदन्तः शस्त्रास्त्रयोः वर्जनमासीत्। मनसा, वचसा, कर्मणाऽहिंसकोभूत्वा राजनीत्यां भागग्रहणमावश्यकमासीत्) द्वितीया वार्तेयमासीद्यत् साध्यं यावत्पवित्रमासीत् तदनुकूल साधनमपि पवित्रं रक्षणीयमभवत्। राजनैतिकस्वतन्त्रताप्राप्तिः यदि प्रथमं पवित्रं-

---

१. भारत-पारिजातम्, प्रथमो भाग; अष्टादशसर्गः, श्लोक-संख्या—१२, पृ० ३५१

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

लक्ष्यमासीत्तदा सत्याहिंसात्मकसाधनैः तत्प्राप्तिरपि प्रथमं पवित्रंलक्ष्यमासीत् । असत्यस्य हिंसायाश्च प्रयोगः पूर्णतया वर्जित आसीत् । ऋते शास्त्रयोः प्रयोगात् वैदेशिकशासनस्य वहिष्कारः परो नवीनमार्ग आसीत् । महात्मा गान्धी स्वप्रयोगेण सामूहिकाभ्यासद्वारेण चैनं नवं मार्गं सक्रियमापादितवान् । देशार्थं राजनैतिक स्वतन्त्रताप्राप्तौ स सफलतामपि प्राप्तवान् । परमार्थिकस्वतन्त्रतायै अहिंसकमार्गस्यानुसन्धानमिदानीमवशिष्टमासीत्, परं महात्मन इहलीला समाप्ता । तस्यार्थिकविचाराः तस्य जीवनेन, लेखैरेवं तद्द्वारेण पालितानामार्थिकसंस्थानां कार्यकलापेनैकत्र कर्त्तुं शक्यन्ते, यदाधारेऽहिंसामूलकस्यार्थशास्त्रस्य प्रारम्भिकशिलास्थापनं कर्त्तुं शक्यते । संक्षेपेणात्र तस्य तेषामेव विचाराणामुल्लेखोविधीयते ।

(१) पाश्चात्त्यमर्थशास्त्रमावश्यकतायाः चिन्तनेष्वाधृतमस्ति । तदनुसारं व्यक्तेरावश्यकतायाः संवर्द्धनेन तत्प्राप्तुं तदनुरूपः प्रयत्नोऽपि वर्द्धते, येन वस्तुन उत्पादनं जायते । अभावो नश्यति । जीवनस्तरश्चोच्चैरुत्थितोभवति । महात्मा गान्ध्यपि मानवेन क्रियमाणस्योत्तरोत्तरवृद्धिशीलस्य प्रयत्नस्य पक्षेऽस्ति । परं तदर्थमावश्यकता सा विद्यते या धर्माविरुद्धा भवेत् । 'धर्माविरुद्धावश्यकता वर्द्धताम्' एतदेव तदीयं मन्तव्यं विद्यते । तदनुसारमावश्यकतासंवर्द्धनातिरिक्तं तन्नियन्त्रणं सभ्यता वर्त्तते । नियन्त्रणार्थमेव तेनावश्यकता-सीमा निर्धारिता । स च सीमारेखोल्लिखितधर्माविरुद्धशब्देन व्यक्ता कृता विद्यते । एतादृश्यावश्यकतया प्रेरितो यः प्रयत्नो भविष्यति, तस्यैवाध्ययनं गांधिविचारधारायामाधृतमर्थशास्त्रंकरिष्यति । स्पष्टमस्ति यदेतदर्थशास्त्रमन्यादृशमर्थशास्त्रंभविष्यति ।

(२) अर्थशास्त्रं विज्ञानन्त्वस्ति परं तेन व्यावहारिकार्थशास्त्रेण भाव्यम् । यतः भारते प्रमुखप्रश्नो निर्धनता-निवारणस्यास्ति तथार्थशास्त्रस्यैतेनोद्देश्येन भवितव्यं यत् तदीदृशमध्ययनं कुर्यात् यदस्य प्रश्नस्य कृते किमपि समाधानं निःसृतं भवेत् । महात्मनः दृष्ट्यार्थशास्त्रं सोद्देश्यं भवेत्, यदभावत्रस्तमानवं दरिद्रतायाः कर्दमात् हस्तमादाय सादरं वहिरानयेत् । जनकल्याणं लोकसंग्रहो वा तस्योद्देश्यं भवेत् ।

(३) तद्दृष्ट्या सहजे ग्रामीणार्थिकसंघटने मानव-विकासकस्यार्थिकवातावरणस्य रचयितृणां मानवप्रयत्नानामध्ययनमर्थशास्त्रस्य विषयो भवेत् ।

(४) पदार्थानामुत्पादनं वृद्धिगंतं स्यादेवंविधो यत्नोऽवश्यं भवेत्, परन्तु समस्तवस्तूनामुत्पादनमेककलाकारद्वारेण स्यात्, येन कलायाः कलाकारस्य चोभयोरुत्तरोत्तरो विकासो भवेत् तथा कलाकार आत्मसंतोषस्यात्मगौरवस्य सुखं

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

प्राप्नुयात् । सर्वप्रकारस्योपभोक्तुर्वस्तूनामुत्पादनमस्मिन्नाधारे भवेत्, येन मानवता सुरक्षिता स्यात् ।

(५) व्यवसायस्य संघटनं लघ्वायतं स्यात्, येन मानव-मानवयोः मध्यस्याथवा सेवकमध्यस्य विप्रकर्षो न्यूनो भवेत्, तथा मानवः परस्परं सहानुभूतेः व्यवहारं रक्षेत् । लघ्वायतव्यवसायस्य संघटनेन पारिवारिकभावनायां वृद्धिः सम्भाव्यते तथा पारिवारिकाकस्मिकविकृतेः निराकरणमपि संभवमस्ति ।

(६) प्रत्येकार्थिकप्रयत्ने शारीरिकं श्रमं प्रतिष्ठितं मन्यमानस्य प्रत्येकजनस्यैतत् कर्त्तव्यं भवेत् यत् स प्रतिदिनं स्वावश्यकतापूर्त्यर्थं शारीरिकश्रममवश्यं कुर्यात् । एतेन मानवविकासः शीघ्रं सम्भाव्यते ।

(७) नापणे विक्रयार्थं किन्तु स्वप्राथमिकावश्यकतानां पूर्त्यर्थमुत्पादनं कर्त्तव्यम् । उपभोगादवशिष्टस्यैव विक्रयं कुर्यात्, अद्य त्वर्थशास्त्रमापणस्यैवार्थशास्त्रमस्ति; परन्तु यस्मिन्नापणे केवलं लाभस्यैव (बचत) वस्तूनो विक्रयोभविष्यति, तदापणोऽद्यतनापणापेक्षया नितान्तं भिन्नो भविष्यति तथा तस्यार्थशास्त्रस्य स्वरूपमपि भिन्नं भविष्यति ।

(८) यन्त्रस्य (मशीनस्य) तावत्येवप्रतिष्ठा भवेत्, यावत्यावश्यकी वर्त्तते । तदुपयोगश्च तत्रैव स्यात् यत्र तदीयावश्यकता विद्यते । यन्त्रस्य सर्वत्रोपयोगः लाभकरो न भविष्यति । यत्र श्रमिकाः निरर्थका उपविष्टाः भवेयुस्तत्र यन्त्रस्य प्रतिष्ठापनं मितव्ययिताया उदाहरणं न भविष्यति । यत्र श्रमिका न भवेयुस्तत्र यदि यन्त्रस्योपयोगो भवेत्तदा नात्र विप्रतिपतिः स्यात् ।

(९) फाटकापणो (Dealings of future) न प्रोत्साहितो विधेयः । तेनैकस्यैतादृशस्य समूहस्याविर्भावो जायते यो विना शारीरिकश्रमं नानाप्रकारैरशोभनैः साधनैः धनार्जनं करोति तथा स्वान्तःस्थितं मानवं यन्त्रे परिवर्त्तितं विदधाति, यस्सदा भावस्यापचयोपचयविषये शोचति तथा स्वस्वार्थसिद्ध्यर्थमावश्यकमपचयोपचयौ कारयति येन जनसाधारणस्याल्पं कल्याणं भवति, कष्टस्य च मात्रा वर्द्धते ।

(१०) यथाविधि मुद्राव्यवहारो न्यूनो विधेयः । यत्र लाभ-विक्रयस्यैवादेशो भवेत्, अथवा तदाधार एव व्यावसायिकं व्यापारिकं वा संघटनं भवेत्, तत्र मुद्राव्यवहारः स्वभावतः न्यूनो भविष्यति । परमेतदाधारे देशीयः, विदेशीयोऽन्तर्देशीयो वा व्यापारः संघटनीयः । यत एतदाधारे विश्वव्यापिनि संघटने जात एव मुद्राव्यवहारः न्यूनो विधेयः शक्यते । एवन्तु सम्प्रति देशीयान्तर्देशीयमुद्राणामावश्यकता

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

दिनानुदिनं वर्द्धत एव तथा वर्द्धिष्यते। यतो नवप्रकारेण चिन्तनाय कार्याय च कोऽपि समर्थोजनः तत्परोनास्ति ।

(११) ग्रामं ग्रामसमूहं वैकांकं मत्वार्थिकयोजनायाः विकेन्द्रणप्रणाल्या कार्यान्वियनेनाल्पव्ययेनाल्पसमयेनचाधिकं कार्यं भवितुमर्हति तथा साधारण जनताधिकं लाभान्वितानुप्राणिता च भविष्यति। तत्पश्चात् महत्यायते विकेन्द्रित-संस्थानां सहायतार्थं केन्द्रितसंघटनस्योपलब्धिः कर्त्तव्यो भविष्यति । यत्र विकेन्द्रितैकांका एव प्रमुखां सदस्यतां प्रदातुं समर्थाः भविष्यन्ति ।

गांधिन एतस्यामेव विचारधारायामाधृतस्यैकस्य नवीनार्थशास्त्रस्य रचना भवितुं शक्नोति, मदनुसारमार्थिकप्रयत्नानामेतादृशं संघटनं संपत्स्यते, यदहिं-सात्मकं भवेत् तथा मानवस्य सुखसौविध्येन सह तन्नैतिकस्तरमुच्चैः रक्षितुं समर्थो भवेत् ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

तन्त्रयन्त्रदर्शनम् (चर्खादर्शनम्)

डा० राजाराम जैनः, एम्० ए० (द्वय), पी-एच० डी०

राष्ट्रपिता गान्धी आधुनिकयुगस्य युगपुरुषो मन्यमानोऽस्ति। किमेतस्य कारणम् ? किमेतदर्थं यतोऽसौ भारतीयस्वतन्त्रतासंग्रामस्य नेतासीत् ? यद्येतावन्मात्रमेव कारणं विद्यते तदात्वस्मिन् युगे बह्वो देशाः स्वतन्त्रा अभूवन् तथा तेषामपि नेतार आसन्, परन्तु ते युगपुरुषाः कथं न मन्यन्ते । कियन्तो वदन्ति यदहिंसासंदेशदानकारणात् गांधी युगस्यास्य महापुरुषो मन्यते । परन्त्वहिंसा-शब्दस्तु परं प्राचीनोऽस्ति तथा बुद्धमहावीराभ्यामद्यारभ्य द्विसहस्रवर्षपूर्वमस्य महत्त्वस्य प्रचार-प्रसारौ कृतौ। पुनः गान्धिनोऽहिंसायामीदृशी का वार्ता विद्यते, यस्याः कारणात् गान्धी महात्मा गान्धी सञ्जातः ।

यथार्थतो युगपुरुषोऽसौ कथ्यते यः संसाराय कामपि नवां वार्त्तामुपदिशति । सा च वार्त्ता युगसमस्या-समाधानसमर्था भवति। अहिंसाशब्दो यद्यपि प्राचीनोऽस्ति, तथापि गान्धी तमेकस्मिन् नवे रूपे विश्वसम्मुखे समुपस्थापितवान् । इदानीं यावत् 'अहिंसा' वैयक्तिकजीवनस्य साधनारूपे आसीत् परन्त्वसौ तामाधुनिकविश्वस्यैकां राजनैतिकीं सामाजिकीञ्चावश्यकतामकल्पयत्। अधुना यावत् साधका अहिंसां नैतिक जीवनस्याध्यात्मिकजीवनस्य पाथेयमुक्तवन्तः परं गान्धी तामन्यायस्य प्रतिकाररूपेण धर्मयुद्धस्य च शस्त्ररूपेण गृहीतवान् । एतदेव गान्धिनो नवीनमन्वेषणमासीत् । इदानीमेष प्रश्न उत्थितो भवति यदेतन्नवीनमन्वेषणं युगसमस्यायाः समाधानरूपेण कथं गृह्यते । तदा ह्येतदेवं शोचनीयं विचारणीयञ्चास्ति यत् अद्य प्रायः सर्वे जना एतन्मन्यन्ते यत् संसारे युद्धस्यावश्यकता नास्ति, प्रत्युत शान्तेः स्थापनापेक्षिता विद्यते। एतत्कथं चेत् ? दृश्यते हि मानवस्य निरन्तरं सांस्कृतिकविकासो जायमानोऽस्ति, परन्तु किमद्यतनायाः विश्वव्यापिन्याः शान्तेराकांक्षा केवलमनुष्यस्य सांस्कृतिकोन्नतेः कारणादेवास्ति। किञ्चित्त्वेतादृशमवश्यमस्ति, परन्तु मुख्यकारणमेतदेव नास्ति। अस्य मुख्यकारणं तु विज्ञानस्योन्नतिरस्ति। अतः शान्तेराकांक्षा सांस्कृतिकविकासकारणात् तावती नोत्पन्ना यावती वैज्ञानिकविकासकारणाज्जाता ।

शिक्षितसमाजस्य सम्मुखे यदा गान्धिनो वार्त्ता रक्ष्यते तदा तस्य व्यक्तित्वस्य

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

समादरं कुर्वन्नप्यसौ तामवैज्ञानिकीं ब्रवीति। स विस्मरति यदयं समयः विज्ञानस्यास्ति, अतः मानवसमाजाय गान्धिन आवश्यकता जाता तथा युगावश्यकतैव युगपुरुषाणां जननी जायते। युगेऽस्मिन् सहास्तित्वस्य वार्ता साधारणवार्त्ता जाता विद्यते। परं मानवः निःसन्देहं ज्ञातवानिदं यत् स्यान्नामान्यवस्तुसहास्तित्वं परं विज्ञान-हिंसयोः सहास्तित्वमवाञ्छनीयमस्ति। यत एवं सति मानवस्यास्तित्वमेव समाप्तं भविष्यति। अतो मानवेन विज्ञान-हिंसयोः कस्याप्येकस्यैकस्याः वा चयनं क्रियमाणमावश्यकं जायते। स्वभावतो बुद्धिमान्मानवः मानवकल्याणाय विज्ञानं संरक्ष्य हिंसां त्यक्तुमिच्छति। अर्थादस्मिन् वैज्ञानिकयुगेऽहिंसा केवलं नैतिकी वाध्यात्मिक्यावश्यकतैव नास्ति, प्रत्युत मानवस्यात्मरक्षायै भौतिक्यपि जाता विद्यते। अर्थात् येन विज्ञानेनैकदाहिंसात्मकप्रवृत्तीः नैतिकीः तथाध्यात्मिकीरुक्त्वा मानव एता अनादृत्य एताभ्योऽहिफेनपुटिकाकथनाय शिक्षितः, तेनैव विज्ञानेनाद्य मानवसमाजोऽहिंसास्वीकरणाय वाध्यः क्रियमाणोऽस्ति।

अतएव गान्धिनो जन्माहिंसायाः एतन्नववार्त्ताकथनायापि नाभूत्। अजातेऽपि गान्धिन्येषा वार्त्तेतिहासस्यानिवार्यावश्यकतावशात् शोचनीयाभविष्यदेव जनेभ्यः। तैः वाध्यै हिंसामुक्तिमार्गोऽन्वेषणीयोऽभविष्यत्। गांधिजन्मैतन्मार्गप्रदर्शनायैवाभूत्। अतएव गान्धिदानं गान्धि-दर्शनं न, प्रत्युत गान्धिमार्गो विद्यते। एतदेव कारणमस्ति यदितः पञ्चत्रिंशतिवर्षपूर्वं 'गान्धिजयन्ती' कृते याचिते संदेशे स उक्तवान् यत् अयं दिवसः 'गांधीजयन्ती' नास्ति, प्रत्युत चर्खा—(तांतव चक्र) जयन्ती वर्त्तते। स एतन्नोक्तवान् यदेष दिवसोऽहिंसाजयन्तीरूपेण मान्यो भवेत्। यतः तस्य विशेषसंदेशः 'अहिंसा' न वर्त्तते, प्रत्युत तांतव (चर्खा) चक्रमस्ति। तस्मै तांतव-(चर्खा) चक्रमेवाहिंसाप्रतीकमासीत्। अर्थात् तांतवचक्रमेवाहिंसामार्गोऽस्ति। एतत्कथमिति विचारणीयं वस्त्वस्ति।

एतत्सत्यमस्ति यदद्य विश्वमानवाः हिंसामुक्तये व्याकुलाः सन्ति। तेऽन्ताराष्ट्रियसम्मेलने शान्तेः संकल्पं विदधति। ते निरस्त्रीकरणस्य वार्त्तां कुर्वन्ति, परन्तु विश्वस्य प्रत्येकदेशस्य व्याकल्प (वजट) दर्शनेनानुमीयते यत् संसारस्य प्रायः सर्वे देशाः सैनिकशक्तिसंवर्द्धने संलग्नाः सन्ति। इदानीमेषा विचित्रा वार्त्ता विद्यते। चिन्तनस्यावश्यकतास्ति यत् शान्त्यन्वेषणे युद्धसज्जता कथं? एतस्याः मुख्यं कारणद्वयमस्ति। प्रथमं कारणमेतदस्ति यत् मानवबुद्धिः हिंसामुक्तये स्यान्नाम यावती व्याकुला, परं तस्याः संस्कारे हिंसा बद्धमूला वर्त्तते। द्वितीयंकारणमेतदस्ति यत् मनुष्य एतद् ज्ञातवान् यत् अद्यतनयुगे कस्या अपि समस्यायाः समाधानं हिंसात्मकरीत्या न भवितुं शक्नोति। यतः यदि हिंसया मनुष्यस्य कस्या अपि समस्यायाः

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

समाधानस्य चेष्टा भवेत् तदा समस्यायाः अन्तः स्यान्नवा परं येषां समस्यास्ति तेषामन्तस्तु भविष्यत्येव । परन्तु समस्यायाः समाधानेऽहिंसायाः शक्तौ तेषां विश्वासो न भवति । एतदेव कारणमस्ति यत् अद्यतनः मानवः किंकर्त्तव्यविमूढोऽस्ति । किंकर्त्तव्यविमूढोमानवः अवश्यं भाविनं नाशं पश्यन्नपि प्राचीनं मार्गं त्यक्तुं साहसं न करोति । एतदेव कारणमस्ति यत् प्रत्येकदेशस्य राष्ट्रनायकः अन्ताराष्ट्रियायाः महत्या अशान्त्याः स्पर्द्धां कर्त्तुं "गुलिका चालनं" निषिद्धमस्ति—इत्येवं वदति, परन्तु स्वराष्ट्रस्यान्तरिकाशान्ति-स्पर्द्धायां गुलिकां चालयति । एतदेव च कारणमस्ति यत् ये सम्पूर्णदेशे शान्तिप्रतिज्ञा-पत्रे हस्ताक्षरं कारयन्ति, ते मुम्बय्यां, प्रयागे, वाराणस्यामहमदाबादे वा इष्टिका-पाषाण-वर्षणारम्भं कुर्वन्ति । यदि वयमस्माकं कस्यामपि याञ्चायामस्वीकृतायामिष्टिका-पाषाण-वर्षणं कुर्मः, तदा मिस्रेण, हंगरी द्वारेण चास्वीकृतायां याञ्चायां रूसः, इङ्गलैण्डो वा यदि स्वहस्तगतं पदार्थं प्रक्षेप्तुं वाञ्छति तदा तयोः कथं निन्दा ?

अधुनावशिष्टा वर्त्तते संस्कारवार्त्ता । सहस्रवर्षेभ्यो मनुष्या आत्मोन्नतिकृते एकस्य विशिष्टस्य दर्शनस्य सृष्टिं कृतवन्तः । ते मन्वते यत् संघर्ष एव जीवनमस्ति तथा प्रतिद्वन्द्वितैवोन्नतिमूलमन्त्रो विद्यते । एतादृशस्य जीवनस्य स्वाभाविकपरिणतिः हिंसैवास्ति । यदा प्रतिद्वन्द्वितायां विजयः मानवलक्ष्यतां व्रजेत् तदा मानवो येन केनापि प्रकारेण प्रतिद्वन्द्विपराजयमेव चेष्टिष्यते । अन्ततः हिंसात्मकशस्त्रास्त्राणां प्रादुर्भाव एव कथं जातः ? प्रतिद्वन्द्वितायां विजयप्राप्तेराकांक्षायाः पूर्त्यर्थमेव नु ? अतएव यदि मानवः हिंसायाः मुक्तिं कामयते तदा स प्रथममेव जीवनदर्शने मौलिकं परिवर्त्तनं कुर्यात् । स जानातु यत् संघर्षे जीवनं नास्ति न वा प्रतिद्वन्द्वितायामेवोन्नति-प्रेरणा वर्त्तते । यदा जीवनदर्शन एव मौलिकपरिवर्त्तनं जायते तदा सम्पूर्ण समाजस्य व्यवस्थायां संस्थानां स्वरूपे तथा जीवनक्रमेऽप्यामूलचूडपरिवर्तनं करणीयं भविष्यति । अतएव मानव-समाजायेदमन्वेषणीयं भविष्यति यत् मनुष्यान्तर्वृत्तिषु प्रतिद्वन्द्वितायाः आहारः काभ्यः काभ्यः संस्थाभ्यो लभ्यते । यतः कोऽपि मानवः एतज्ज्ञानस्यावश्यकतां नापेक्षते यत् सत्ता सम्पद् च द्वे एव संस्थे मुख्यरूपेण प्रतिद्वन्द्वितावृत्तेः जनन्यौ स्तः । सत्ताप्राप्तौ तद्रक्षायाञ्च प्रतिद्वन्द्वितायाः कियद्भयङ्करं बीजं सन्निहितमस्ति, एतस्य साक्ष्यं संसारस्येतिहासो विद्यते । सम्पत्कारणात् प्रतिद्वन्द्वितायाः दर्शनं प्रत्येकपरिवारे, प्रत्येकग्रामे प्रत्येकसमाजे च नित्यं जायते । अतो मानवोऽस्मिन् युगे यदि स्वास्तित्वं कामयते तदा स एतयोः द्वयोरपि प्रतिद्वन्द्वितामूलकसंस्थयोः मूलोच्छेदनं कुर्यात् । अतएव गान्धिमहोदयोऽब्रवोत् यदहिंसकसमाजाय राज्यसत्तायाः लोपोऽवश्यं विधेयः । सोऽहिंसासाधनायामपरिग्रहाय मुख्यं स्थानं ददाति स्म । तथैतदेव कारणमस्ति यद्गान्धिनो महान् शिष्यःआचार्यं 'विनोवा

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

भावे'-महोदयः विश्वशान्त्यर्थं शासनमुक्तसमाजस्य स्थापनायाः लक्ष्ये सम्पत्ति-विसर्जनान्दोलनं करोति ।

अत्रैष प्रश्न उत्थितो भवति यत् किं पूर्णशासनमुक्तिः व्यावहारिकी वर्त्तते किम् ? व्यवहारः आदर्शश्च पृथक् वस्तुनी न स्तः । मनुष्यः आदर्श-प्राप्त्यर्थं व्यवहारं करोति, तदा व्यवहार आदर्श-प्राप्तेः मार्ग एवास्ति । प्रथमत एतत्स्पष्टमस्ति यत् शासनमुक्तिपथे प्रथमसोपानं शासननिरपेक्षतास्ति । अर्थात् संधिकाले यदि कमपि सीमानं यावत् शासनसंस्थाया आवश्यकता भवेदपि तदा समाजस्य नित्यजीवने मनुष्यः एतन्निरपेक्षः तिष्ठेत् । अर्थात् समाजस्य नित्यजीवने शासनसंस्थाया अस्तित्वस्यानुभवो न भवेत्, सा समाजजीवने पुष्पमालानां सूक्ष्मसूत्रवत् स्थास्यति । पूर्णविकसितकुसुमानां मालाग्रन्थनाय सूत्रस्यावश्यकता भवति । परन्तु जनाः तामेव मालां मालासंज्ञया व्यवहरन्ति, यस्यां सूत्रं न दृश्येत । यदि तत् दृश्येत तदा मालायाः वैरूप्यं कल्प्यते । तथैव शासननिरपेक्षसमाजे पूर्णस्वावलम्बिन एकांकस्यैकसूत्रे बन्धनं विधाय राष्ट्रनिर्माणं कियत्कालकृते संभवं भविष्यति । परन्तु यदि मानवः नित्यजीवने राज्यसंस्थाया अस्तित्वस्यानुभवं कुर्यात्, तदा ज्ञातव्यं भविष्यति यत् समाजो नीरसोजातः । स्पष्टमस्ति यत् यदि मानवकृते जीवनं राज्यसंस्थानिरपेक्षं विधेयमस्ति, तदा तेन स्वकीयानां नित्यावश्यकतानां पूर्तिः स्वयं विधेया भविष्यति । प्रकृतेः साधने श्रमार्थव्ययेनोत्पादनं भवति । अद्य संसारस्योत्पादनस्य प्रक्रिया सञ्चितसम्पत्ति-(पूँजी) मूलिकास्ति । अर्थात् श्रमसंचितसंपदोः सञ्चितसंपद् मुख्या स्वामिनी वर्त्तते, श्रमश्च तदधीनो गौणोवर्त्तते । शासनसंस्थाया मुक्त्यर्थं गान्धी सञ्चितसंपदाधृतोत्पादनपद्धतिं परावर्त्य श्रमाधृतोत्पादनपद्धतिं प्रवर्तितां वाञ्छति स्म । स कामयते स्म यत् प्रकृतिसाधने प्रत्यक्षश्रमेणैवोत्पादनं भवेत्, तदैव मनुष्यः स्वावलम्वी भूत्वा स्वतन्त्रो भवितुं शक्नोति । एतदेव कारणमस्ति यत् गांधी तान्तवचक्रमहिंसायाः प्रतीकं मनुते स्म । अतएवाहिंसकसमाजप्राप्त्यर्थं मानवाय शासनमुक्तस्य तथा सञ्चितसम्पत्ति-निरपेक्षसमाजस्य स्थापनमेकमात्रं मार्गं विद्यते । एतादृशी गान्धिनो मान्यता विद्यते स्म ।

मानवसंस्कारे तथा समाज-व्यवहारे हिंसोत्पादनस्य द्वितीयं कारणं वर्गविषमता वर्त्तते । एवं गम्भीरतया विचारेण स्पष्टतया प्रतीतं भविष्यति यत्, वर्गविषमतायाः स्थितिः काचन स्वतन्त्रा स्थितिः नास्ति । राज्यसञ्चालितव्यवस्थायास्तथा सञ्चितधनाधृतोत्पादनपद्धत्याश्च परिणतिरेव वर्गविषमतायाः परिस्थितिरस्ति । पुरातनशास्त्राणामृषीणां कथनमस्ति यत् सत्ययुगे एक एव वर्ण आसीत् । मानवसमाजस्य प्रारम्भे मनुष्यः द्वयोः वर्गयोः विभक्तोनासीत् । सर्वे मनुष्याउत्पादकवर्गीया आसन् ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

ते प्रकृति-साधनेषु स्वश्रमं कुर्वन्त आसन् तथा उत्पाद्य खादन्ति स्म तथा परस्परं मिलित्वा स्वसमाजस्य व्यवस्थामकुर्वन्। पश्चात् राज्यप्रथायाः सञ्चितार्थवादिन्या अर्थनीतेः कारणात् समाजे सेवकनामधारिणएकस्यानुत्पादकस्योपभोक्तृवर्गस्य सृष्टिर्जाता। प्रारम्भे त्विमेवर्गाः पुरोधोनाम्ना सामन्तनाम्ना चाविर्भूताः। मनुष्यो यदा तं सम्यक् ज्ञातवान्, तदा तं वर्गं विघटितवान्।

परन्तु शीघ्रमेव तत्स्थाने रूपान्तरितो भूत्वा स संचितार्थवादिवर्गनाम्नाविर्भूतः। मानवसमाजोऽद्येममपि विनाशयितुं संलग्नो विद्यते। परन्तु सेवका इमेऽद्य तत्स्थाने व्यवस्थापकवर्गरूपेण संघटिताः भवन्तः सन्ति। अस्य वर्गस्य यथा-यथा पुनर्जन्म भवदस्ति, तथा तस्य कलेवरः प्रवर्द्धितो भूत्वा तस्य व्यापकतापि वर्द्धमानास्ति। सामन्तवादापेक्षया सञ्चितधनवादोऽधिकः व्यापकोऽभवत् तथाद्य सञ्चितधनवादापेक्षया व्यवस्थापकवादस्य विस्तारः शतगुणाधिको भूत्वा समाजस्याङ्ग-प्रत्यङ्गेषु एवं प्रकारेण प्रविशन्नस्ति, यत् वर्त्तमानजगतः समक्षे मुख्या भीतिः सर्वाधिकारवादस्यैव भवन्ती विद्यते, यः जनमतस्यापेक्षां विनैव सम्पूर्णविश्वं ध्वंसोन्मुखं नयन्नस्ति।

एतदेवकारणमस्ति यद्विनोवाः राज्यस्य सञ्चितधनस्य च विघटनचेष्टायां प्रथमचरणं श्रेणी-विषमता-निराकारणं स्वीकृतवान् तथैतदेव कारणमस्ति यत् गान्धी शरीरश्रमेणोत्पादकानां स्वावलम्बिसमाजस्य स्वप्नं पश्यति स्म। स स्वकीयसमस्त-कार्यक्रमेपूत्पादकश्रमाय मुख्यं स्थानं ददाति स्म।

कांग्रेसस्य विधाने सूत्रकर्त्तनम्, सदस्यतायाः नियमरक्षायाः चेष्टा, चर्खासंघे हस्तनिर्मित-वस्त्र-विक्रयार्थं सूत्रसंकेतनियमः, यः स्वहस्ताभ्यां नोत्पादयेत् स भोजनाधिकारवञ्चितः, एतन्मान्यतायाः प्रचारः, स्वाश्रमेषु मलस्वच्छीकरणादारम्य कृषेरुद्योगस्य चादिसकलकर्मणां स्वहस्तैः सम्पादनस्य नियमः—इत्यादिकार्यक्रमा-एतस्यैव सिद्धान्तस्य पूर्त्यर्थं रक्षिता अभवन्।

स्पष्टमस्ति यत् समाजे चेत्व्यवस्थापकवर्गस्योत्पादकवर्गस्य च सृष्टिरभविष्यत्तदा तदुन्मूलनं विधाय यद्येकवर्गीयस्य समाजस्य स्थापना विधेयास्ति तदा स वर्गः उत्पादकवर्ग एव भवितुं शक्नोति।

इदानीं प्रश्न एषोऽस्ति यत् समाजस्यैतद्व्यवस्थापकवर्गरूपानुत्पादकोपभोक्तॄणां विघटनं कथं भवेत्? एतस्य द्वे एव मार्गे भवितुं शक्नुतः वर्णसंघर्षो वा वर्गपरि-वर्त्तनम्। मानवसमाजस्य यस्मात् हिंसावादान्मुक्तिरद्यतनविश्वस्य लक्ष्यमस्ति, तत्सिद्धौ वर्गसंघर्षस्य चिन्तनं विडम्बनामात्रमस्ति। अतोद्यतनपरिस्थितौ वर्ग-परिवर्त्तनादृते श्रेणीनिराकरणस्य नान्यः कश्चन मार्गोऽस्ति। अर्थादद्यतन

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

समस्यासमाधानेत्वेतदावश्यकमस्ति यद्बुद्धिजीविनामधारी शासकवर्गः श्रमजीवो उत्पादकः भवेत् । बुद्धिः जीविकायाः साधनं न भूत्वा श्रमस्य पूरकं तथा समाजस्योत्पादनं भवेत् । एतस्यैवोद्देश्यस्य पूर्त्यर्थं गांधी यत्र प्रत्येकमानवाय शरीरश्रमस्यावश्यकतामवदत्, तत्रैव सम्पूर्णसमाजं सुसंस्कृतं बुद्धिमन्तमुत्पादकं श्रमिकं च विधातुं शिक्षायामामूलपरिवर्त्तनस्यमन्त्रमददात् । वस्तुतः गान्धिनः 'नई तालीम' नवशिक्षैव अद्यतनसमाजस्य समस्यायाः समाधानस्य स्थायी तथैकमात्रं मार्गोऽस्ति । यतः समाजस्य प्रत्येकव्यक्तिः शैशवावस्थाया एवोत्पादकश्रममाध्यमेन बुद्धेः संस्कृतेश्च विकासं करिष्यति । तदा अद्य योऽनुत्पादकवर्गोऽस्ति तस्य संतान उत्पादकवर्गे परिणतो भविष्यति । तथैव सत्यामुत्पादनप्रक्रियायां शिक्षामाध्यमभूतायामद्ययोवर्ग-उत्पादनकार्ये संलग्नतया पूर्णशिक्षार्थमवकाशं न प्राप्नोति, सोऽपि बुद्धेः संस्कृतेश्च विकासायावसरमधिगमिष्यति । एवं गान्धिप्रतिपादितशरीरश्रममूलकवर्गपरिवर्त्तनस्य सामाजिकक्रान्तिः तथा (नई तालीम) नवशिक्षायाः शैक्षणिकक्रान्तिः मिलित्वा वर्तमानयुगस्य सृष्टिसमस्यायाः समाधानमुपस्थितं कुरुतः ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

महात्मगान्धिनः शिक्षादर्शनम्

श्री वाचस्पति द्विवेदी, एम० ए० (द्वय) एम० एड०, साहित्याचार्यः

शिक्षाक्षेत्रे भारतेतिवृत्तं गौरवास्पदम् । अस्मत् प्राच्यशिक्षाशास्त्रिभिः शिक्षायाः प्रत्येकं मूलभूततत्त्वमनुशीलयद्‌भिरुपनीतशिक्षासरणिर्व्यक्तित्वस्य सर्वांगविकासस्य, सभ्यतायाः संस्कृतेश्चोन्नयने भृशं प्रमापिता । पौरस्त्याचार्यकुलगौरवमय्याः परम्परायाः परिपाकस्वरूपं ज्ञानविज्ञानक्षेत्रेऽग्रणीत्वमादधौ । परं वैदेशिकाक्रमणेन मिथो वैमनस्येन विभक्तत्वमनापन्नमखण्डं भारतं स्वैक्यमेव व्यनाशयत् । कथं कथमप्यस्मदृषयः स्वमूलं संररक्षुः ।

प्रगतिरवरुद्धा, केनापि प्राचीनज्ञाननिधिः संरक्षितः । एतदन्तरेवाङ्गल-विज्ञान प्रगति-भरितमानसं संक्षोभयामास । आङ्गलदेशीया अस्माकमुपरि शैक्षिकव्यवस्थान्ययोजयन् । "मेकाले" महाशयैः शिक्षायाः प्रारुपं विहितम् । तेषामेतदेव वचोयत् प्राच्यग्रन्थानामवमूल्यं तद्ग्रन्थपत्रमूल्यमपि न, किं सीराविधः क्वोपलभ्यते ? केवलं लोमप्रतिलोमात्मकमेव वचो वेदपुराणादिषु विहितमस्ति । तत्पाठनस्थाने आङ्गलशिक्षापद्धतिरेव प्रचालिता । तैरेव सुनिश्चितं यद्रवतेन भारतीया अपि मानसेन विचारेण च पाश्चात्याः स्युरिति । तैः स्वोद्देश्ये साफल्यं संलब्धम् । यदा आङ्गलदेशीयशासनपद्धतौ सहायकाः सहस्रशो भारतीयदासा उच्चतरविद्यालयेभ्यो महाविद्यालयेभ्यश्च संपन्नास्तदानीमेव भारतीयजनजीवनं पतनगर्त्ताद्बहिर्निष्कासयन्त अस्मत्समक्षं समायाता महात्मगान्धिनः एतद्दुरवस्थामसहमाना भारतीयानां विलुप्तात्मविश्वासमुद्बोधयन्तो गौरवमयं प्राच्यस्मृतिचरं स्मारयन्तः पौरस्त्यशिक्षादर्शनमाधारीकृत्य नूतनमेकं शिक्षादर्शनं व्यरचयन्, यद्धि व्यक्तेः सर्वाङ्गीणविकासं वर्तमानावस्थास्वपि सहायकं स्यादिति, एवं वर्तमानातीतयोः सामञ्जस्यं संस्थाप्य नवा शिक्षा समस्थापि । तैरेव स्वसम्मुखं शिक्षायाः केवलमेतुमेवोद्देश्यन्न व्यवस्थापितम् । वर्तमानस्थित्यनुकूलं तद्विचारा अपि परिवर्त्तनतांययुः, किन्तु कानिचिद् वचांसि सर्वत्र समानानि स्थितानि । जनाः स्वावलम्बिनो भवेयुरिति तदेव शिक्षायाः परमं लक्ष्यं मन्यन्ते स्म ।

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

चेच्छिक्षा मानवजीविकायै न सर्जनात्मिका तदा साऽपार्था। तैरेव कथितम्—

हरिजन—सेप्टेम्बर—११-१९३७

शिक्षा सज्ञानाऽपि अर्थप्रापिका स्वीकृता। सकृद्भाषमाणेन प्रोक्तं यन्मया शैक्षिकसांस्कृतिकपक्षाय भृशं महत्त्वं वितीर्यते। तदनुसारं संस्कृतिरात्मगुणः, या प्रत्येकं व्यवहारं परिपोषयेत्।

सारतो व्यक्तित्वस्य, शरीरमानसयोरेवमात्मनः सर्वाङ्गविकास एव शिक्षाया उद्देश्यम्।

भारतस्य प्राच्यसिद्धान्ताप्रतिकूलं सच्चारित्र्यमेव शिक्षाया मूलभूतआधारः।
गांधीजी जीवनी — पृ० ४०८

देशस्य स्वातन्त्र्यानन्तरं शिक्षाया उद्देश्यं किं स्यादिति पृच्छायां त्वरितमेवोत्तरितंचरित्रनिर्माणमिति। तेन युगपद्रष्ट्रा विज्ञातमिदं यद्भारतसविधे चरित्रनिर्माणसमस्यैव सर्वाग्रजा भविष्यति। अस्मन्नेतृभिश्चेदभ्युपगम्येत तदाऽस्मच्छिक्षाव्यवस्था एतत्दुरवस्थामाप्नुयात्। लेखनाध्ययनादिभ्योऽप्यधिकं शक्त्यादिगुणेभ्यो वलप्रदानम्। चरित्रनिर्माणमेव शिक्षायाः साध्यमिति।

गान्धिनः शिचादर्शनस्य मूलं भारतस्य प्राच्यविचारदर्शनमेव न पाश्चात्यविचरस्रोतः। अत्रादित एव चारित्र्यप्रस्फोटनमेव शिक्षायाः परमं साध्यं मतम्।

एतदनन्तरमात्मचिन्तनस्यैवावश्यकत्वमप्युपगतम्। "या विद्या सा विमुक्तये" इति राद्धान्तावलम्बिनाऽध्यात्मचिन्तनस्यानिवार्यत्वमभिहितम्। व्रह्मचारिपदं व्रह्मगवेषणपरमिति प्रयुज्यते।

इतीत्थं जीवनाय वृत्तिसाधनेन सह सांस्कृतिकविकासस्य, चारित्र्यनिर्मितेरध्यात्मचिन्तनस्य च प्रामुख्यमापादितम्। व्यक्तेः समाजस्य चावश्यकत्वं मनसि विचार्य शिक्षासरणिर्व्यवस्थापि।

तद्युगानुसारं विद्याऽर्थप्रापिकैव वेशिकशिक्षाया स्तम्भः। अतः कुटीरोद्योगप्रोत्साहनाय श्रमादेश्च श्रैष्ठ्यप्रतिष्ठापनाय वेशिकशिक्षाम् (बुनियादी शिक्षा) आविरकरोत्।

एतेन केनचित् क्रियात्मकप्रयोगेण ज्ञानावाप्त्योत्पादनाय बुद्धेर्विकासाय स्वावलम्बनाय चैषा परमोपयोगिनी आसीत्। शिक्षा मातृभाषामाध्यमेनैव भवितव्या सामवायिकजीवनाय नागरिकताया अपि शिक्षाऽऽवश्यकी। इतीत्थं शिक्षास्थाने

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

यथारुचि यथाप्रतिभं क्रियात्मकज्ञानादिना बालकानां स्वावलम्बित्वाधानमेवैतच्छि-क्षाया उद्देश्यमासीत् ।

प्रारम्भेऽस्य विस्तृतिरजनि परं स्वातन्त्र्याधिगत्यनन्तरमस्माभिरेतन्मूलभावनैव विनाशिता । एतेन केवलं सूत्रयन्त्रेण सूत्रोत्पादनन्तेन खादीवस्त्रोत्पादनमिति-संकीर्णएवार्थोऽवबुद्धः । एतेन स्वावलम्बित्वस्थाने परमुखापेक्षित्वनेवालम्बितम् । एतच्छिक्षादर्शनमवबुध्यमानैरस्माभिर्निःसहायानां समाजस्यनिर्धनानामुपेक्षितवर्णा-नाञ्च शिक्षा आपादिता । परिणामतः प्राचीनव्यवस्था तु विनष्टैव, नूतनशिक्षा-व्यवस्थाभावे समस्तभारतस्य शिक्षानीतिर्नैराश्यमुपागमत् । अद्यतनं भारतस्य शिक्षादर्शनं किं स्यादिति न निश्चीयते । अस्त्वेवं गान्धिनः शिक्षानीतिर्नाद्य सम्भवेत्, परं तच्छिक्षादर्शनमिदानीमप्युपयुक्तमेव । तदाधारीकृत्य चेन्नूतनशिक्षा-सरणिर्व्यवस्थाप्येत तदा गत्यवरोधः दूरीकर्त्तुं शक्यत इति । शिक्षाया अभिन्नाङ्गं धार्मिकशिक्षेति स्वीकृतम् । धर्मो न मानववृत्तीनां संकीर्णत्वमपि तु मानवताया स्तद्धरातलं प्रतिष्ठाप्यते, तत्रगते मानवानामौत्सर्गिकन्नैर्बल्यं सहजत एव दूरी भवति । एतद्धि आत्मविश्वाससंबलमुद्बोधयति ! जीवने नवा दीप्तिः समायाति । तस्य धर्मोऽतिदेशकालः सार्वजनीनश्चासीत् । आदितश्चेदुच्चतमादर्शभावना वितीर्येत तदा तन्निर्मर्यादवृत्तिरपि समाजोपयोगितामाधातुं शक्यत इत्येतदर्थमेव धर्मशिक्षा परमोपयोगिनी । किन्त्वद्यास्मन्नीतिनिदेशका धर्मनाम्ना रक्तवसनेन वृषदइवोद्विग्ना भवन्ति । परं छात्राणामननुशासनत्वं तदौदण्डचभूतां महदतिमहतीं समितिन्निर्माय प्रस्तुतीकरणम् । युवकर्ममूलन्नैव परिज्ञायते, फलत उत्तरोत्तरं समं शिक्षाकेन्द्रं दोषाणां केन्द्रमेव सुसम्पन्नम् । गान्धिनो ऽन्तर्ज्योतिर्भविष्यदवस्थामीक्षते स्म । अतो मानवधर्मस्यैव शिक्षायाः स्वजीवने महत्त्वं प्रादात् ।

कतिपयप्रचालितशिक्षादर्शनसन्तुलनायां गान्धिमहाशयः सर्वस्मात् पृथगेव प्रतीयते । प्रकृतिवाद्यनुकूलमयमपि सौवलसैद्धान्तिकज्ञानविरोधि—"इन्सो" महाशयानुसारं पारम्पर्यरूढिगतशिक्षाविरोधिनाऽपि प्रकृतिवाद्यनुकूलन्न सर्वथा तस्य हेयत्वमवबुद्धम्' । अपित्वादर्शवादस्यैव प्राबल्यं प्रत्तम् । अत आदर्शवादिभ्यस्तदधिकं साम्यम् । आदर्शवादी सहजतो मानवमध्यात्मवादिनमभ्युपगच्छति । मानवाना-माध्यात्मिकप्रवृत्तयः संस्कृति-कला-धर्मनैतिकादिरूपेऽभिव्यज्यन्ते । गान्धिमहाशयः चारित्र्यनिर्मितिं सांस्कृतिकाभ्युदयमिष्यमाणोऽपि आदर्श-याथार्थ्ययोः समन्वयबोधाय पक्षपाती आसीत् । याथात्म्याद् प्रभिन्नो ह्यादर्शोनोपयोगी । अतो व्यक्ति-समाजयो-र्याथार्थ्यसमस्या यदा समाधीयेत सैव शिक्षा आदर्शानुकूला भवेत् ।

प्रकृतिवादादर्शवादयोर्मध्ये उपयोगितावादो राद्धान्तः । "दिवी" महाशयानुसारं

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

गान्धिनाऽपि क्रियैव ज्ञानस्य केन्द्रमिति स्वीकृतम् । क्रिययैव ज्ञानाधिगतिर्यथारुचि वालकानामधिकमनुकूलतां याति ।

अतो वेशिक (बुनियादी) शिक्षैव क्रियाकेन्द्रिता समस्थापि ।

इतीत्थं समेषां प्रचलितशिक्षादर्शनानां साद्गुण्यं संगृह्यमाणे नैकं स्वकीयं शिक्षादर्शनं प्रदत्तं यद्धि मानवानां सर्वाङ्गीणविकासाय परमोपयोगि ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

महात्मगान्धिनामीश्वरदृष्टिः

डॉ० जगन्नाथ पाठकः, साहित्याचार्यः, एम० ए० (द्वयम्)
पी-एच० डी०

यद्यपि महात्मगान्धिनां जीवनस्योद्देश्यभूतं सर्वाङ्गीणं भारतीयं स्वातन्त्र्यमासीत् तथापि तेन सुमहत्या सत्यान्वेषिण्या निजमनीषासूक्ष्मेक्षिकया समग्रमेव भारतीयं जीवनं गोचरीकृतमित्यत्र नास्ति संशीतिलवोऽपि। यथाऽऽधुनिका नेतारः केवलां राजनीतिमेवावलम्बमाना देशस्य ऐहिकमभ्युदयमेव सर्वस्वमाकलयन्तो वाह्यदृष्टयोऽवलोक्यन्ते, न तथासन्महात्मानः। तदीया दृष्टिः देशस्याध्यात्मिकदृष्ट्याऽपि समुदयमाकाङ्क्षमाणासीत्। भारतं तु तस्य कर्मक्षेत्रमासीत्, किन्तु तदीयस्य प्रयत्नस्य प्रत्येकस्यैव सम्पूर्णा मानवजातिरेव विषयतामवलम्बते स्म। राजनीतिदृष्ट्या भारतस्य स्वातन्त्र्ये संसिद्धे तेन सर्वथा निजजीवनमध्यात्मपरमेव यापितम्। तदीयाध्यात्मिकी दृष्टिः वोधिसत्वानामिवासीत्, ते न केवलमात्मनो देहस्य मुक्तये प्रयतन्ते, परन्तु समग्रस्यापि लोकस्य मुक्तिमाकाङ्क्षमाणा भवन्ति।

मानवसमाजस्य कृते यद् यदेव हितकरश्चिन्तनीयश्चासीत् महात्मगान्धिभिस्तत्र तत्र सूक्ष्मेक्षिकया विचारः कृतः। एवं सत्यान्वेषणशालिनी स्वतन्त्रा च तदीया बुद्धिर्दार्शनिकानां रूढिग्रस्तां सरणिं नापेक्षते स्म, यया ते केवलं परम्परया विवादमात्रोपजीविनो व्युत्पत्तिप्रदर्शनमेव कुर्वते। एवं महात्मा गान्धी दार्शनिककोटौ परिगणनीयतामभजमानोऽपि विचारकदृष्ट्या तद्भिन्नोऽपि तत्सदृश आसीत्। ईश्वरविषयकं प्रश्नमवलम्ब्य महात्मनां विचारो हि प्रायः सर्वविदितः, परं तदीयप्रभावस्याकलनं क्रियेत तदा तदीयं महत्त्वं स्पष्टीकृतं स्यात्।

महात्मगान्धिनां समग्रस्यापि सिद्धान्तस्याधारभूतं यदस्ति तत् सत्यम् एव, तदेव सत्यं तद्दृष्टौ 'ईश्वरः', यथा च स्वकीयात्मकथाया भूमिकायां तैर्लिखितम्—

But for me, truth is the sovereign principle, which includes unmerous other principles. This truth is not only truthfulness in word, but truthfulness in thought also, and

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

not only the relative truth of our conception, but the absolute truth, the Eternal Principle, that is God.[१]

इदमेव सत्यं महात्मनां राजनीतिकेषु वा सामाजिकेषु वा धार्मिकेषु वा सिद्धान्तेषु मणिगणेषु सूत्रमिवानुस्यूतमित्यत्र जीवने घटितानां घटनानां वातावरणस्य च प्रभावोऽपि तदीयविचारनिर्माणे प्रवर्तत इति मत्वा यदि महात्मनां जीवनस्यारम्भः परिशील्यते तदा स्पष्टं भवति यत् तस्मिन् ईश्वरः सगुणरूपेण बाल्य एव प्रतिष्ठितो बभूव। प्रभूतधार्मिकभावनाप्रवणा तन्माता 'हवेलीं' (श्रीकृष्णोपासकवल्लभसम्प्रदायमन्दिरं) गच्छति स्म। बाल्य एव च कयाचिद् धात्रा भयं जेतुं रामनाम्न उपदेशः कृतः। एवं संस्काररूपेण तदीयं चित्तमीश्वरसहगतं बाल्यादेवासीत्। परं यथा यथा तेषां चिन्तनं गम्भीरतरमात्मगतं च बभूव तथा तथा तस्मिन् 'रामे' संशोधनं जातम्। अन्ततो महात्मनां रामः ऐतिहासिकत्वं परित्यज्य पतितपावनोऽजन्मा किञ्चिदेकं तत्त्वमासीत्। एवं तदीयो रामः माहम्मदानां 'अल्लाहत्:' ख्रिस्तीयानां च 'गौडतः' अभिन्नः कश्चिद् विलक्षण एव जातः।

वस्तुतो रामतत्त्वस्येदं सामाजिकं विलक्षणं सार्वजनीनञ्च रूपं गान्धिनां न तावन् बुद्धिविलसितम्, किन्तु प्रत्यक्षीकृतमासीत्। सत्यपि विश्वस्मिन् प्रभावशालिनि शाङ्करवेदान्तविचारे इयमीश्वरदृष्टिः प्रभाविता नाभवत्। वेदान्तविचारस्य प्रतिपादनं स्वामिविवेकानन्दमहाशयेन देशे विदेशेषु च कृतम्, तदवगच्छतामपि महात्मनामीश्वरो विलक्षण एव बभूव। तैः स्वविचारस्य प्रकाशनं दार्शनिकानामेव पद्धत्या तत्प्रयुक्तपारिभाषिकशब्दप्रयोगपुरःसरं कृतम्, तथा च तैरेकत्र स्पष्टमुक्तम्—

'I am an Advaitist and yet I can support Dvaitism. The world is changing every moment, and is therefore unreal, it has no permanent existence. But though it is constantly changing, it has a something about it which bersists and it is therefore to that extent real. I have therefore no objection to colling it real and unreal, and thus veing colled and एकान्तवादिन् or स्याद्वादिन्। But my स्याद्वाद is not the स्याद्वाद of the bearned it is peculiarly my own.[२]

---

१. पृष्ठम् XV (My Experience with truth')
१. 'Young India' जनवरी २१-१९२६ ई०

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

एवं यद्यपि महात्मानोऽपि सृष्टिजालं 'माया' इति सम्भावयन्ति, तथापि वेदान्तिनामिव तदीयविचारे जगन्मिथ्या नास्ति। वेदान्तिनां मुक्तिर्यथा ज्ञानविधया भवति (ऋते ज्ञानान्न मुक्तिः), परं महात्मानो मुक्तिलाभे आत्मसमर्पणं कृपालाभं च हेतुं परिकलयन्ति स्म।

इत्थं विलक्षणोऽपीश्वरो यथाकथञ्चित् सामीप्येन वा सादृश्येन वा प्रकारान्तरेण समालोच्यते तदा तस्य वैष्णवानामीश्वरदृष्टिरेव तुलनां समारोहति। यथा च श्रूयत एव यत् 'वैष्णव जन तो तेणे कहिये जे पीर पराई जाणे रे' इत्यादि पद्यं तेषां प्रियतरमासीदिति। यथा च महात्मना स्वयमेकत्र निर्दिष्टं यत् तदीया विचाराः कथञ्चित् 'वाद' बुद्ध्या न स्वीकर्तव्या इति। इत्थं निर्देशेन तदभिमतमित्येव प्रतीयते यत् तदीयं चिन्तनं सत्यान्वेषणपरम्। सत्यस्य च स्वरूपं सर्वथा मानवोंऽशतयैव प्रत्येतुं शक्नोति। यथाऽन्धाः कतिपये कस्यचिद् गजस्य विभिन्नमङ्गं स्पृशन्तो भिन्नतया स्वस्पर्शानुकूलमेव मतमात्मनः प्रकाशयन्ति तथैव मानवानां सत्यस्य विनिर्णये पक्षपातो भवति। अतएव महात्मभिः साम्प्रदायिकानामिव इदमित्थमित्याग्रहबुद्धिं परित्यज्य विश्वजनीनभावनानुगतैरेव स्वातन्त्र्येण ईश्वरचिन्तनं कृतम्।

महात्मान ईश्वरास्तित्वविषये सन्दिहानैर्नास्तिकैर्नैव विवदन्ति स्म। यद् वस्तु प्रत्यक्षमिव यस्य गोचरीभवति तस्य साधने व्यर्थः श्रम इति मत्वा ततो वैमुख्यमङ्गीकुर्वन्ति स्म ते। ईश्वरोऽस्ति संसारे, तथापि स ततः पारे स्थितः, स हि सर्वात्मना स्वात्मानं न प्रकाशयति, यथा कश्चित् कविः सम्पूर्णतया स्वरचनाभिर्न व्यक्तो भवतीति तदभिमतम्।

एवमीश्वरविषये महात्मनां स्वतन्त्रं सहजं च चिन्तनं सर्वथा भारतीयाया विश्वजनीनाया आध्यात्मिकदृष्टेरेव परमः प्रसादः, यो हि तदीयव्यक्तित्वं परिशीलयतां बुद्धौ सामान्येन परिस्फुरति। तदीयेश्वरदृष्टिः सहजा स्वाभाविकी, न तत्र प्रदर्शनस्य कश्चिदवसरः। तया साधारणोऽपि कश्चित् आत्मनः प्रयत्नेन ईश्वरसाम्मुख्यमनुभवितुमर्हति।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

महात्मगान्धिन ईश्वरदर्शनम्

श्री श्रीरञ्जनसूरिदेवः, साहित्याचार्यः

भारतीयविचारधारा प्रायेण दर्शनपरिवेशप्रचुरा वरीवर्त्ति। प्रमाणेन प्रमेयसिद्धिरिति भारतीयदर्शनानां समुद्देश्यम्। ईश्वरवादिदर्शनानां प्रमेयसिद्धिरन्ततोगत्वा हीश्वरतत्त्वसिद्धावेव पर्यवसितेति सुविदितम्। राष्ट्रपिता महात्मा गान्धी परम ईश्वरवादीति को न जानीते। तस्येश्वरः खलु गीतोक्तदिशा सर्वव्यापक[1] आसीद्यतो हि स बहुव्यापके सामान्ये विश्वसिति स्म। अपरञ्च, महात्मा गान्धी रामभक्तिविषये दृढविश्वास आसीत्। परं तु रामापेक्षया रामनाममहिम्नि तस्यास्था सुदृढेति तद्विचारमौक्तिकसंग्रहे 'मेरा नाम'[2] संज्ञके पुस्तके बहुधा व्याकृतमस्ति।

हिन्दूधर्मे हीश्वरस्यानेकानि नामानि सन्ति। अनेके जनाः रामं कृष्णञ्चैतिहासिकपुरुषत्वेन समाद्रियन्ते, अथ च रामं दशरथपुत्रं मन्यन्ते। स एव रामः ईश्वररूपेणेह मर्त्यभूमाववततार। तमेव पूजयित्वा नरा दुर्लभां मोक्षपदवीमायान्ति। इयमेव धारणा कृष्णविषयेऽप्यस्ति। अत्र हि कल्पनेतिहासशुद्धसत्यानामेवंविधः परस्परानुबन्धो विद्यते यदेतेषां पृथक्करणं नितरामसम्भवम्। विषयेऽस्मिन् 'ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यह'—मिति[3] मन्यमानो महात्मा गान्धी स्वमनोभावं प्रकटयन्निगदति "यन्मया सर्वाण्यभिधेयानीश्वरस्य स्वीक्रियन्ते, परं तेषु हि निराकारः सर्वगतो राम एव मन्मनोलोचनगोचरो भवति। मत्कृते मद्रामः सीतापतिदशरथनन्दनेत्याख्याभ्यां विश्रुतोऽपि सन् सर्वशक्तिमानीश्वर एवेति, यन्नाम्नि हृद्गते सति सर्वदुःखानि विनश्यन्ति।"[4]

अहमदाबाद-स्थितेन नवजीवनट्रस्टेत्याख्येन संस्थानेन प्रकाशितायां 'गान्धीजी' संज्ञक ग्रन्थमालायां[5] स्पष्टतयोट्टङ्कितमिदं यन्महात्मा गान्धी जनताजनार्दनयो-

---

१. 'ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति।'—गीता, १८।६१।

२. मेरा राम : गान्धी, प्र० मातृभाषामन्दिरम्, दारागञ्जः, प्रयागः, द्वितीयं संस्करणम्, दृष्टम् ७।

३. गीता, ४।११।

४. मेरा राम, उपरिवत्, पृष्ठम् ८।

५. खण्डम् ११, भागः २, पृष्ठम् १०५।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

रैकत्वमनुभवति स्म। नरे नारायणत्वं प्रतिष्ठितमस्तीति मन्यते स्म। यतो हि शरीरभिन्नत्वेऽप्यात्मनोऽभिन्नत्वम्। सूर्यस्यैका मरीचिः परावर्त्तनवैविध्यादनेकत्वमधिगच्छति। परं तु तदुद्गमस्त्वेक एवास्ति। अतएवोक्तं वेदान्तवादिना—'जीवो ब्रह्मैव नापरः।' जीवे ह्यंशांशिभावेन ब्रह्मत्वप्रतिष्ठैव गान्धिन ईश्वरतत्त्वदृष्टिः। मानवव्यतिरिक्तो न हि कोऽपीश्वरस्तन्मते इति निश्चप्रचम्। मानवहृदयस्थमीश्वरमतिक्रम्य न हि कोऽपि गच्छेज्जगदीश्वरपदम्। वर्त्तते चोपनिषद्वाक्यम्—'मृत्योर्माऽमृतं गमय।'

श्रीमच्छङ्कराचार्यस्य तत्परवर्त्तिनो रामानन्दकवीर-गुरुनानकादेः परम्परायां महात्मा गान्ध्यपि अद्वैतवादस्यैकेश्वरवादस्य वा समर्थक इत्यत्र नास्ति विचिकित्सावसरः। गान्धिनो मतानुसारेण[1] वस्तुतस्त्वीश्वर एक एव। ईश्वरस्त्वगमागोचरः, बहुजनसमाजानां कृते नितान्तमज्ञातं वस्तु चेति। स खलु सर्वव्यापकः। स हि विना नेत्रं पश्यति, कर्णं विना च शृणोति। स हि निराकारो भेदाभेदरहितोऽजन्मा च। यद्यपि न सन्ति तस्य मातृपितृप्रभृतयः स्वजनाः, तथापि सः मातृपितृपत्नीसन्तानादि बहुरूपैः पूजां स्वीकरोतीति तस्यानेकान्ताग्रहः। किञ्च स खलु काष्ठपाषाणादिरूपैरपि स्वार्चनामङ्गीकरोति। वस्तुतस्तु स खलु नैव काष्ठं नापि प्रस्तरम्। स खलु हस्ताभ्यां सुतरां दुर्द्धरः। किन्तु यदा स प्रत्यभिज्ञायते तदास्माकमतिशयं समीपस्थो जायते। उक्तञ्च गोस्वामिना महाकवितुलसीदासेन—

'सोइ जानै जेहिं देहु जनाई। जानत तुमहिं तुमहिं होइ जाई।'

अतो हीश्वरस्य ऋते सर्वव्यापकत्वज्ञानान्नानुभूयते तत्सान्निध्यम्। व्यापकत्वानुभवं विना तद्दूरत्वभानं स्वाभाविकमेव। सत्स्वप्यनेकेषु देवेषु वेदो ह्येकमेवेश्वरं भजत इतीश्वरतत्त्वप्रतिपादने महात्मगान्धिनो वाचोयुक्तिरिति सुधीभिर्विभाव्यम्।

गान्धिनो मते[2] ईश्वरविवृताविदमपि ज्ञेयं यन्महात्मा गान्धी वेद कुरानयोरीश्वरकर्तृत्वस्वीकरणे नानुभवति सङ्कोचशङ्कालुत्वम्। एवमेव 'जेन्दावस्ता'-'बाइबिल'-'ग्रन्थसाहब' प्रभृतीनां धर्मग्रन्थस्वीकारे नास्ति किञ्चिदपि कार्पण्यं तन्मानसे। तन्मते हीश्वरीयः प्रकाशः कस्यापि राष्ट्रस्य जातेर्वा नास्ति स्वीया सम्पत्। ईश्वरव्यापकत्वस्वीकारादेव हिन्दूधर्मः समायोजकत्व-व्यापित्वसनातनत्वादिगुणैरुपेतः परिस्थित्यनुसारं वैकल्पिकत्वं वोढुं क्षमश्च। हिन्दूधर्मे प्रतिष्ठितस्येश्वरस्य विषये नास्त्यन्धानुगमत्वं गतानुगतिकत्वं वा। हिन्दूनामीश्वरस्यावबोधे पर्याप्तस्तावत्तर्का-

---

१. गान्धीजी-ग्रन्थमाला, उपरिवत्, पृष्ठम् १०९।
२. उपरिवत्, पृष्ठम् ११०।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

वसरः परिकल्पनाप्रकारश्च । भारतीयदर्शनानां विचारवैविध्यस्य मतवैभिन्न्यस्य चेदमेव कारणम् ।

महात्मा गान्धी हिन्दूयवनयोरीश्वरवुद्धि-विषयके विचारवैभिन्न्ये एकत्वोपस्थापनाय कृतप्रयत्नो दरीदृश्यते । तेन हि सर्वस्मिन् धर्मे सत्याहिंसयोः पारमार्थिकी सत्ता मृग्यते स्म । स खलु सर्वथा भगवदर्पितेन व्यक्तित्वेन विलसति स्म । स हि वाह्यतोऽभ्यन्तरतश्च ईश्वराधीनं जीवनं यापयति स्म । अतो हि तेनोक्तम्—'अहं हि निन्दास्तुती सर्वशक्तिमति परमात्मनि न्यस्य स्वमार्गे गतिशीलोऽस्मि ।'[१] महात्मा गान्धी हीश्वरस्याखण्डसत्तां प्रति भृशं विश्वासशील आसीत्, यतो हि स साम्प्रदायिकविवादसन्दर्भे सततं कथयति स्म—'ईश्वरकृतमखण्डत्वं न हि कोऽपि मनुष्यो खण्डितुं शक्नोति ।'[२]

महात्मगान्धिनो मते[३] हीश्वरस्य नास्ति पुरुषाकृतित्वं नास्ति च व्यक्तित्ववैशिष्ट्यम् । किञ्चिद्विशेषणञ्चापि नास्ति । ईश्वरस्तु सर्वतन्त्रस्वतन्त्रः । स हि स्वयमेव नियमरूपेणावस्थितः, स्वयं नियामको न्यायकर्त्ता च । ईश्वरस्य साङ्गोपाङ्गवर्णनमद्यावधि न हि केनापि कृतम् । सर्वे दार्शनिकाश्चिन्तकाश्च तस्य विराट्रूपमनुभवन्तो नेति नेति तद्विषये प्रवदन्ति । अदृश्योऽदृष्टश्च भगवान् खलु त्रिकालद्रष्टा सर्वदा पूर्णश्चास्ति । एतत्प्रसङ्गे प्रसिद्धञ्चेदमुपनिषद्वाक्यम्—

पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते ।
पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते ॥

रामनाममाहात्म्यं प्रकटयता महात्मगान्धिना ईश्वर-प्रतिनिधिभूतं रामनाम स्वीकृतम् । रामनामद्वारेण हि स ईश्वरं भजते स्म । तन्मते ईश्वरकृतस्य नियमस्य पालनमेवेश्वरजयः । तात्त्विकदृष्ट्या यो हीश्वरनीत्या साकं तदाकारतामधिगतो नास्ति तत्कृते जपस्यावश्यकता । जपः नामोच्चारणं वा यस्य श्वासोच्छवासीभूतं स खल्वीश्वरमय इत्यत्र नास्ति कोऽपि सन्देहः । ईश्वरमयत्वं तावदीश्वरनीत्यभिज्ञाने सहजवुद्धित्वं तन्नीतिपालने सहजभावत्वञ्च ।

ईश्वरसामीप्यार्थं प्रार्थनाया सातिशयं महत्त्वमङ्गीकरोति एव महात्मगान्धिमहोदयः । राष्ट्रस्वतन्त्रतायै तत्प्रतिष्ठारक्षायै चात्मसमर्पणविधिप्रशिक्षणस्य प्रथमः पाठः प्रार्थनैवास्ति । प्रार्थनायै ईश्वरे सत्यपूता श्रद्धा नितान्तमावश्यकी । विनाश्रद्धां सत्याग्रहस्य साफल्यमाकाशकुसुमसदृशम् ।

---

१. उपरिवत्, खण्डम् ११, भागः ३, पृष्ठम् २३८ ।

२. उपरिवत्, पृ० २७४ ।

३. मेरा राम, उपरिवत्, पृ० १९ ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

ईश्वरस्य सत्ता मानवेन प्रतिष्ठिता, अथवा ईश्वरो हि मानवेन निर्मित इति कुतर्कविषयं खण्डयन् महात्मा गान्धी ईश्वरस्य स्वयंसर्गसर्जकत्वमुपपादयति सतर्कं कथयति च[1] यदीश्वरो हि स्वयमेव सृष्टिः स्वयमेव स्रष्टा। अतो हि कुतस्तन्निर्माणस्य प्रश्नः? अणोरणीयसो महतो महीयसो हीश्वरस्य क्षुद्रमानवेन निर्माणस्य विषय एवोपहास्यतामधिगच्छति। अभियन्ता मानवो हि सेतुरचनायां क्षमः परं नदीप्ररचनायां नास्ति तस्य किमपि सामर्थ्यम्। पीठिकाकरणे क्षमो वर्धकिः काष्ठोत्पादने सर्वथा सामर्थ्यरहितः। मानवा ईश्वरस्य परिकल्पनाप्राचुर्यं कर्तुं शक्नुवन्ति, परं यो नदीकाष्ठयोरुत्पादने सामर्थ्यविरहितः स ईश्वरस्य निर्माणे कथं समर्थो भविष्यति। अनेन विचारवैदग्ध्येन निश्चितमिदं यदीश्वरेणैव मानवो निर्मित इति शुद्धसत्यम्। मानवेनेश्वरो विनिर्मित इति तु सत्याभासमात्रम्। मानवस्य रचनापक्षे ईश्वरस्य कर्तृत्वम्, ईश्वरस्य मानवद्वारा रचनापक्षे तस्याकर्तृत्वम्। अतः सिद्धमिदं यदीश्वरः कर्तुमकर्तुमन्यथाकर्तुञ्च क्षमः। निर्गुणत्वात्तस्याकर्तृत्वं सगुणत्वाच्च तस्य कर्तृत्वं सुस्पष्टमेव। एतद्विपरीतं कर्तृत्वाकर्तृत्वयोरुदासीनोऽपीश्वरः परिकल्पनायामायाति। निषेधात्मकत्वं विध्यात्मकत्वं तदुभयनिष्ठत्वञ्च सर्वं खलु ईश्वराधीनमेवेति महात्मगान्धिनः प्रवचनप्रकर्षः।

महात्मगान्धिनः प्रार्थनासभायां ईशोपनिषदः निम्नाङ्कितः प्रथमो मन्त्रः प्रत्यहं पापठ्यते स्म—

ईशावास्यमिदं सर्वं यत्किञ्चिज्जगत्यां जगत्।
तेन त्यक्तेन भुञ्जीथा मा गृधः कस्यस्विद्धनम्॥

अस्यायमाशयो यन्मया सर्वं खलु भगवते समर्पितव्यं, पुनश्च स्वीयावश्यकतानुसारं तदुपयोगः करणीयः। विशेषतया ध्यातव्यमिदं यदस्माभिः परद्रव्येषु किञ्चिन्मात्रमपि लोभो न करणीयः।

अनेन हि परिज्ञायते यत्स्वकीयं सर्वस्वमीश्वरार्पितं कृत्वा तत्प्रदत्तवस्तूनां व्यवहारः तत्सेवार्थमेव कर्त्तव्यः। इदमित्थमत्र महात्मगान्धिनो हीश्वरार्पितभावनाया एव समर्थनं सञ्जायते। ईश्वरार्पितो मानव एवेदृशीं घोषणां कर्तुं प्रभुः—

न त्वहं कामये राज्यं न स्वर्गं नापुनर्भवम्।
कामये दुःखतप्तानांप्राणिनामार्त्ति - नाशनम्॥

राष्ट्रपितुः महात्मगान्धिनो राष्ट्रस्वातन्त्र्यपरिप्रेक्ष्ये ध्यातव्येयमीश्वरतत्त्वविवृतिः। दुःखतप्तानां प्राणिनां दुःखं शारीरिकं मानसञ्चापि भवेत्। परं स्वमनो-

---

१. मेरा राम, उपरिवत्, पृष्ठम् ४१।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

विकार-पारतन्त्र्याद्‌दुद्भूतमात्मदुःखं शारीरदुःखादपि समधिकं कष्टकरं भवति। ईश्वरस्तु स्वयं दुःखविनाशार्थं नहि समागच्छति, अपि तु स कमपि मानवं निमित्त-रूपेण प्रेषयति प्रेरयति वा। अतो हि भगवत्सकाशात् परपीडाविनाशशक्तिप्रार्थ-नाया अयमेवाशयो यद् वयं स्वयमेव तन्निमित्तं यतेम। प्रार्थनेयं जातिसम्प्रदायादि-भेदाभेदरहिता सर्वेषां समानरूपेण हितावहा। अस्यां हि सर्वे जनाः सम्मिलिता भवितुं समर्थाः। मनुष्यमात्रस्य कृतेयं प्रार्थना। यदेयं प्रार्थनाविधिः साङ्गतां गमिष्यति तदा जगदिदं स्वर्गराज्ये परिणतं भविष्यतीत्यत्र नास्ति सन्देहावसरः।[1]

महात्मगान्धिन ईश्वरभावना भारतीयौपनिषदिकचिन्तनाधृता वर्त्तते। ईशोप-निषदः प्रथममन्त्रमाश्रित्य तत्कथनमिदं भाव्यमस्ति यत् समग्रमिदं जगदीश्वराच्छा-दितम् (ईशावास्यमिदं सर्वम्)। सर्वं खल्विदं ब्रह्म, न हि किञ्चिदपि मामकीनम्। अतो हि मानवैः सर्वं स्वकीयं वस्तुजातं भगवते समर्पितव्यम्। एतद्भावनाया एवानुध्वनिः श्रीमद्भगवद्गीतायामस्ति—

'सर्वधर्मान्परित्यज्य मामेकं शरणं व्रज।'[2]

रामनाममहिमानं वर्णयता महात्मगान्धिना वावद्यते यद्रामनाम स्वात्मसंयमे साहाय्यं प्रकुरुते। अस्मिन्हि एतादृशी शक्तिर्वरीवर्त्ति या कामवासनामीश्वरदर्शनस्य पवित्रेच्छायां परिणमयति। राष्ट्रपितुर्विचारेण कामवासना तावत्कुण्डलिनीशक्त्याः पर्यायात्मिका। या स्वयमेव निरन्तमेधमाना तिष्ठति। यथा मानवः प्रारम्भत एव प्रकृत्या सार्द्धं प्रतिद्वन्द्वितामाप्नुवन्नास्ते तथैवानया कुण्डलिन्या सह मानवस्य स्वाभा-विकी प्रतिद्वन्द्विता भवितव्या। अथ च बलात्तामूर्द्ध्वगांकृत्वा मानव ऊर्द्ध्वरेता च भवेत्। यदा मानव उर्द्ध्वरेता जायते तदा तस्य बाह्याभ्यन्तरं सर्वं जगदीश्वरमयं प्रतिभाति।[1] उर्द्ध्वरेतस्त्वं तु निर्मलेन सबलेन मनसा लभ्यम्। अत उक्तम्—
'नायमात्मा बलहीनेन लभ्यः।'

अनुक्षणमीश्वरासक्तमनसो महात्मगान्धिन ईश्वरविषयका निम्नाङ्किता गीतानुगीता विचारा अपि महार्घाः सन्ति। तेऽत्र समुपन्यस्यन्ते—

हिंसायाः प्रतिरोधक ईश्वर एवास्ति। मानवस्तु तत्प्रतिरोधे निमित्तमात्रम्। वयं हीश्वरस्य सर्वनियमैरनभिज्ञा स्मः। अतोहि स्वकीयबलबुद्ध्यनुसारेण कर्मणि प्रयतितव्यम्। ईश्वरे निश्छला श्रद्धा निश्चला निष्ठा च स्यात्। विनेश्वरश्रद्धां न कोऽपि निश्चिन्ततामाप्नुयात्। मद्भाग्यं मदायत्तम्। स्वयमेवाहं स्वभाग्यस्य

---

१. मेरा राम, उपरिवत्, पृष्ठम् ४७।
२. गीता, १८।६६।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

विनाशको विकासकश्च भवामि। ईश्वर एवास्माकं तमोलोकाज्ज्योतिर्लोकं प्रेरयति।[1] ईश्वरो ह्यपरमाणुपर्वतं सर्वत्र सर्वदा प्रतिष्ठितोऽस्ति। स्वात्मशुद्ध्यर्थं हृदयाभ्यन्तरे तद्विद्यमानतानुभूतिर्गम्भीरतया प्रकर्त्तव्या। स्वात्मबलप्राप्त्यर्थं एतदतिरिक्तो नान्यः कोऽप्युपायः। अतोहि स्वात्मशक्त्यै ईश्वरानुभूतमहौषधमिव फलप्रदेति। ये केऽपि ग्रामवासिनः स्युरुतनगरवासिनः, सर्वेषामादर्शरचनायामीश्वर एव मध्यबिन्दुर्भवितुमर्हति। साम्प्रतम्, राम एव जनतायां जनार्दनरूपेण प्रतिष्ठितः। भारतीयजनताया जीवनस्याधिकतमो भागो विशेषतस्तु रोगशोकादिपीडाघातक्षणे उपायशून्यतावस्थायामीश्वरमेव मध्यबिन्दुरूपं परिकल्प्य स्वां निष्कृतिं निर्वृतिञ्च लभते।[2]

अतोहि भारतीयजीवनस्य कृते ईश्वरसत्तायाः स्वीकृतिरनिवार्या वरीवर्त्ति। किन्तु स्मरणीयमिदं यदीश्वरो हि न कोऽपि व्यक्तिविशेषः, स हि जीवच्छक्तिरूपेण सर्वत्र रमते। सर्वं जगत्तस्मिन्नेव समाहितमस्ति, अत एव स ईश्वरो मानवबुद्धि-सीम्नो दूरं दूरतरमिति किं बहुना प्रजल्पितेन।

---

१. मेरा राम, उपरिवत्, पृष्ठम् ५१।
२. विशेषविवरणार्थं 'मेरा राम' (उपरिवत्) पुस्तकं द्रष्टव्यम्। एतत्सन्दर्भे गीताया गान्धिकृता आनासक्तियोगव्याख्यापि पर्यवलोकनीया।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

गान्धि-ज्ञानमीमांसा

श्रीदशरथसिंहः, एम० ए० (लब्धस्वर्णपदकः,)

गान्धि-दर्शने ज्ञान-मीमांसायाः महत्त्वपूर्णं स्थानं विद्यते। ज्ञान-मीमांसा दर्शन-शास्त्रस्य सा शाखा वर्त्तते यस्याः सम्बन्धः ज्ञानविषयकान्वेषणेन सहास्ति। तत्त्व-वादिभिरतत्त्ववादिभिः, विश्लेषणवादिभिर्वा समग्रवादिभिः, सर्वविधैः दार्शनिकैः ज्ञानस्य स्वरूपे, प्रकारे, नाम्नि, साधने, सत्यतायामसत्यतायाञ्च प्रत्यक्षरूपेण परोक्ष-रूपेण वावश्यमेव विहितो विचारः। गान्धिमहोदय एकः समग्रवादी दार्शनिक आसीत्। सोऽपि ज्ञान-विषये स्वविचारं प्रस्तुतवान्।

गान्धिनो ज्ञान-मीमांसा दार्शनिकानां ज्ञानमीमासभ्यो भिन्नास्ति। प्रायो-व्यवसायिदार्शनिकाः विभिन्नशाखासु दर्शनस्य बौद्धिकस्तरे चिन्तनं कुर्वन्ति। तेषु क्रमशः स्वसिद्धान्तं प्रस्तुवन्ति। गान्धि नैतादृशो व्यवसायी दार्शनिक आसीत्। स दर्शनस्य न कस्यामपि शाखायां वादनिर्माणस्य चेष्टां कृतवान्। अतो ज्ञान-सम्बन्धे-ऽपि क्रमशः स न कमपि स्वसिद्धान्तं प्रस्तुतवान्। स व्यावहारिकदार्शनिकरूपेण केवलं सत्येन सह प्रयोगं कृतवान्। एतस्यैव प्रयोगस्य परिणामस्वरूपः प्रकाशः ज्ञानस्य विभिन्नशाखासु समागतः, तस्य ज्ञानमीमांसाया अप्येष एवेतिहासोऽस्ति। ज्ञानस्य स्वरूपे, सीम्नि, साधने प्रकारे च स पृथक्-पृथक् गम्भीरतया विचारं न कृतवान्। परन्तु दैनिकजीवने संभवसमस्यानां समाधानान्वेषणे तथा जनैः दृष्टाणां प्रश्नानामुत्तरदाने ज्ञानस्य वास्तविकस्वरूपे, सीम्नि प्रकारे च पूर्णः प्रकाश आपति-तोऽस्ति। अतो गान्धि-ज्ञानमीमांसायां विचार-प्रसंगेऽस्माकमत्रावधानं परममनि-वार्यं विद्यते।

द्वितीयं वस्त्ववधेयमेतदस्ति यत् गान्धिनो ज्ञानविषयको विचारः तस्य तत्त्वविष-यकविचारेष्वाधृतोऽस्ति। अतोऽस्य ज्ञानसिद्धान्तः चरमतत्त्व-स्वरूपसन्दर्भे एव बोद्धव्योऽस्ति।

उपनिषत्सु कथितमस्ति यत्—"ऋतेज्ञानान्न मुक्तिः"। अन्येऽपिभारतीयाः दार्शनिका इमं सिद्धातं सत्यं मन्वते। गान्धिमहोदयोऽपि सत्यज्ञानाभावे मुक्तिं संभवां न मनुते। प्राचीनयवनदेशीयदार्शनिकसुकरातसदृशः सोऽपि ज्ञानमेव

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

सद्गुणं स्वीकृतवान् । तस्यै पदृढो विश्वासोऽस्ति यत् सत्यज्ञानाभावे नोचितं कार्यं भवितुं शक्नोति । उचितकार्यं सत्यचिन्तनस्यैवाभिव्यक्तिर्विद्यते । स उक्तवान्—"A man is but the product of his thought; what he Thinks he becomes." ? अतोनैतिकजीवनकृतेऽनिवार्यं उचितज्ञानस्यसद्भावोऽस्ति ।

इदानीं प्रश्नः समुत्थितो भवति यत् यथार्थज्ञानं किमस्ति ? गान्धिदृष्ट्याध्यात्मिकज्ञानमेव यथार्थज्ञानमस्ति ।

एतादृशेनैव ज्ञानेन व्यक्ति : समाजश्च मुक्तिप्राप्तौ सफलौ भवतः । तदनुसारं मानवः अज्ञानकारणे न वद्धोभवति । अज्ञानेनैव सोऽनैतिककार्याणि कुरुते तथा सर्वविधदुःखैः पीडितो जायते ।[२] अज्ञानकारणादेव स आत्मानं सत्यस्येश्वरस्य वांशं न मत्वा क्षणभङ्गुरं शरीरं मनुते । शरीरस्वीकृत्या तस्मिन्नैहिकसुखस्य लालसा जागर्ति तथैतेन तस्य जीवनं संकीर्णं जायते । स निजस्वार्थलोक एव रतो निवसति तथा सामाजिकजनानां प्रेम्णा वञ्चितो भवति । स प्रेम शिक्षते एव न । परन्तु प्रेम विना न व्यक्तेः कल्याणं भवितुं शक्नोति नवा समाजस्यैव । गान्धिहोदयोऽनुभूतवान् यत् प्रेमक्षेत्रमेव व्यापकं विधाय व्यक्तिसमाजौ स्ववास्तविकस्वरूपं प्राप्स्यतः ।

प्रेम्ण उत्पत्तिरकस्मात् मानवमनसि न जायते । एतस्य विकासः आध्यात्मिकज्ञानस्य विकासेन भवति, यद्धि यथार्थज्ञानमस्ति । एतेनैतत् स्पष्टमस्ति यत् मानवस्य चरमलक्ष्यप्राप्तौ यथार्थज्ञानस्य प्रमुखं स्थानमस्ति ।

यथार्थज्ञानसम्बन्धे गान्धिनो दृष्टिकोणो व्यापकोऽस्ति । केचन पाश्चात्यविचारकाः यथार्थज्ञानमन्यज्ञानात् पूर्णतः पृथक् विधाय शोचन्ति । पाश्चात्या अनुभववादिनः इन्द्रियानुभवप्राप्तप्रत्ययैः निर्मिताण्येव वाक्यानि यथार्थज्ञानसीम्नि स्थापितवन्तः । एतद्विपरीतं बुद्धिवादिनः बौद्धिकप्रत्ययैः निर्मितान्येव वाक्यानि यथार्थज्ञानरूपेण स्वीकृतवन्तः । 'कान्ट'-सदृशः समीक्षावादी ज्ञानमस्वाभाविकरूपेण बुद्धिप्रत्ययानामनुभवप्रसूतसामग्रीणाञ्च समन्वयममन्यत । विश्लेषणवादिनो यथार्थज्ञानं सार्थकवाक्यपर्यन्तमेव सीमितं रक्षितवन्तः । यत् संश्लेषणात्मकविश्लेषणात्मकवाक्यं यावदेव सीमितमस्ति ।[3]

रहस्यवादिनः रहस्यात्मकानुभूतेः प्राप्तं ज्ञानमेव वास्तविकं ज्ञानममन्यन्त ।[४]

---

1. Selection from Gandhi, N. K. Bose. P. 24.
२. गांधीजीने १९३४के भूकम्पको मनुष्यके द्वारा छुआछूतके रूपमें किये गये पापका परिणाम माना था ।
३. Ianguage Truth and loic, Ayer
४. Bradley, Bergson, इत्यादि विचारकोंने रहस्यात्मक अनुभूतिसे प्राप्त ज्ञानको ही वास्तविक माना है ।

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

द्वितीयरूपेणैवं वक्तुं शक्यते—यदनुभववादिनः भौतिकंविज्ञानं बुद्धिवादिनः गणितं तर्कशास्त्रञ्च समीक्षावादिनः मध्यममार्गं तथा रहस्यवादिनोऽलौकिकज्ञानं वास्तविकमादर्शं मन्वते ।

गान्धिनोदृष्टिकोण उपर्युक्तसमस्तविचारापेक्षया व्यापकोऽस्ति । एतद्दृष्ट्या चरमतत्त्वं सत्यं वर्त्तते, शाश्वतमस्ति । एतस्य शाश्वतसत्यस्यानेके पक्षाः सन्ति । तेषामपि स्वेषु पर्याप्तं महत्त्वं विद्यते । सत्यस्य समग्रपक्षाणां ज्ञानाय कस्यापि विशेषप्रकारस्य साधनस्याग्रहो नापेक्ष्यते । अतः शाश्वतसत्यमिन्द्रियानुभवसीमायां बद्ध्वा संरक्षणमसम्भवं विद्यते । न तद्बुद्धि-तर्कयोः संकर्णिश्रृङ्खलासु संयमनीयं भविष्यति । तत्केवलंसार्थकवाक्यानां पिहितप्रकोष्ठे एव रक्षितुं शक्यते । तद्लौकिकानुभूतिभ्यः पृथक् रहस्यात्मकानुभवस्य शून्ये विलीनं कर्त्तुं न शक्यते । सत्यस्य विभिन्नपक्षाणां ज्ञानं विभिन्नसाधनैरेव कर्त्तुं शक्यते । पार्थिववस्तूनां ज्ञानमिन्द्रियानुभवेन, दूरस्थवस्तूनां ज्ञानं बुद्ध्या तथा विवेकेन, परमसूक्ष्मवस्तूनां ज्ञानमन्तरनुभूत्या तथा कियतां वार्त्तानां ज्ञानमाप्तवाक्यैः संभवमस्ति ।

सत्यप्येतस्मिन् नैतत्कथयितुं शक्यते यत् सम्पूर्णसत्यस्य ज्ञानमस्मभ्यं पार्थिवेनानेन शरीरेण भवितुं शक्यते । सम्पूर्णसत्यसम्बन्धेऽस्मभ्यं श्रद्धा-विश्वासयोः साहाय्यं प्राप्तव्यं भवति ।[1]

स उक्तवान्—

It is imposible us to *realize* perfect truth so long as we are imprisoned in this mortal frame. We can only Visualize it in our imaginatian. We can not through the instrumentality of this ephemeral body. See base to base Truth which is eternal. That is why in the lost resort we must depend an faith.

सत्यस्याभिव्यक्तिरसीमातोगान्धिदृष्ट्या ज्ञानमप्यनन्तं विद्यते । अतो ज्ञानं सीमितं कर्त्तुं न शक्यते । तदनुसारं दैनिकानुभवेन यदस्माभिर्ज्ञानं प्राप्यते, तेनास्माकमात्मशक्तेर्ज्ञानस्य विस्तारो जायते । एतादृश्येव प्रक्रियाग्रेऽपि कार्यशीला तिष्ठति । नवाभिर्नवाभिरनुभूतिभिराध्यात्मिकज्ञाने वृद्धिर्जायते । तथास्मासु नवनवानां कर्त्तव्यानामुदयो भवति । परन्त्वेतेन सत्ये किमपि परिवर्त्तनं न जायते । सत्यं सदा एकसदृशमेव तिष्ठति । स उक्तवान्—

---

१. यर्वदा मन्दिर, पेज. (१) Selections from Gandhi N. K. Bose P. 8

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

Knowledge is limitless and So also the application is truth every day we add to our Knowledge of the Power of the Atman and we shall keep on doing ever the same. New experience will Teach us New duties. But Truth shall ever be the same."[1]

एवं प्रकारेणैतादृशं प्रतीयते यत् सर्वेऽनुभवाअस्मानन्ततो गत्वात्मज्ञानाश्रयोन्मुखमेव नयन्ति । अतः सर्वप्रकाराणि ज्ञानान्यात्मानुभवस्यैव साधकानि सन्ति । येन प्रकारेण सर्वेषां चिद्विन्दूनां क्रियाः ईश्वरलक्ष्यस्य साधिकाः मता सन्ति, तेनैव प्रकारेण गान्धी सर्वप्रकाराणि ज्ञानान्यात्मज्ञानस्य साधकानि स्वीकृतवान् ।

गान्ध्यनुसारं किमपि ज्ञानं पूर्णं नास्ति । यतोऽद्ययावत् यत्किमपि ज्ञानमस्माभिर्वैज्ञानिकमाध्यात्मिकं वावासं तत्सर्वं सम्पूर्णज्ञानस्य परमसूक्ष्मांशोऽस्ति । अतः स उक्तवान्—

"We do not know all tne lows of God nor their working. Knowledge of tne tallest Scientist or the greatest spritulist is like a particle of dust.[2]"

अत्र सर्वाधिकं महत्त्वपूर्णं वृत्तमवधेयमिदमस्ति यत् गान्धी ज्ञानमाध्यात्मिकमपि पूर्णं नामन्यत । अद्वैतवेदान्तवादिभिराध्यात्मिकज्ञानं पूर्णं स्वीकृतम् । परं गान्धिमतेनास्मिन् दैनिकः विकासो भवति । पूर्णाध्यात्मप्राप्तिरसम्भवा विद्यते । सन्तविनोवाभावे महोदयोऽपि तथ्यमेतत् स्वीकृतवान् । स उक्तवान् यत् येन प्रकारेण विज्ञाने नव-नवनियमानामनुसन्धानं भवति, तथैवाध्यात्मज्ञानेऽपि नव-नवशोधस्यावश्यकतास्ति ।[3]

यतः सम्पूर्णज्ञाने विजयप्राप्तिरसम्भवास्ति, अतः सर्वप्रकारेभ्यः प्रमादेभ्योऽपि मुक्तिलाभो मानवकृतेऽसम्भवोऽस्ति । सर्वप्रकारेभ्योऽपराधेभ्योमुक्तिलाभोऽपीश्वर कृपयैव सम्भाव्यते । एवं प्रकारेण गान्ध्यनुसारं ज्ञानमेव सद्गुणो विद्यते । 'आध्या-

---

१. यंग इण्डिया, ८–४'२६ पेज १३१ Selection from Gandhi N. K. Bose P. 13

२. Harijan, 16.

३. हरिजन, 16-2 1934 P. 4 (3) Science and self Knowledge P. 22.

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

त्मिकज्ञानमेव श्रेष्ठतमज्ञानमस्ति। ज्ञानमनन्तमस्ति तथा प्रमादेभ्यो मुक्तिरीश्वर-कृपयैव भवितुं शक्यते।

गान्धिनो ज्ञान-मीमांसायामाप्तवाक्यस्य, बुद्धेरन्तर्बोधस्य च विवरणमायात-मस्ति। अत एषु प्रत्येकमवलम्ब्य विचारः क्रियते।

आप्तवचनम्

गान्धीअन्यभारतीयदार्शनिकसदृशमेव शब्दप्रमाणं ज्ञानस्य साधनं स्वीकृतवान्। परन्तु तदनुसारमाप्तवचनं स्वस्मिन् पूर्णं नास्ति। साधारणतया जनाः धर्मग्रन्थानां प्रामाणिकजनानां च वचनानि विनातर्कं विवेकं चोद्धृतानि कुर्वते। गान्धी महोदय एतस्य विरोधं कृतवान्। स उक्तवान् यत् सर्वप्रकाराण्याप्तवचनानि बुद्धिविवेकाभ्यां परीक्ष्याणि भवेयुः। अत आप्तवचनं तावदेव सत्यमस्ति यावत् तद्बुद्ध्यनुकूलं स्यात्। ऋते तर्कविवेकाभ्यामेतत्स्वीकृतिः उर्वरमस्तिष्कस्य लक्षणमस्ति।[1]

आप्तवचनस्योपयोगः प्रत्येकावस्थायां कर्त्तव्योऽपि नास्ति। यत्र बुद्धेः प्रवेशः सरलतया संभवेत्, तत्रोत्तमोत्तमस्याप्याप्तवचनस्यावश्यकता न भवति।

स कथितवान् यत् कोऽपि धर्मग्रन्थः यदि सौम्यबुद्धेरेवमात्मनः आदेशस्य विरुद्धोऽस्ति, तदासौ सरलतया त्यक्तुं शक्यते। स उक्तवान्—

"I would regreat all excriptural othority if is in conflict with sober reason or the dictates of the heart.'

परमेतस्यैतत् तात्पर्यं नास्ति यदाप्तवचनात् किमपि ज्ञानं प्राप्यते) यत्र बुद्धेः प्रवेशो न भवितुमर्हति, तत्राप्तवचनस्य, श्रद्धाविश्वासयोश्च साहाय्यं ग्राह्यं भवति। यथेश्वर-सम्बन्धे ज्ञानं नेन्द्रियानुभवैः जायते न वा बुद्धिसाहाय्येन। एतत्कृते तु वयं शास्त्राणामेवं प्रामाणिकव्यक्तीनामनुभूतेरेवाश्रिताः भवामः। अत ईश्वरीयं ज्ञानं विश्वाससहायेनैव भवितुं शक्नोति।

प्रश्न एष उत्थितो भवति यदाप्तवचनं विना तर्कः कथं न ग्राह्यो भवेत्? किं शास्त्राणि नेश्वरवचनानि सन्ति। यदि तानीश्वरवचनानि तदा का तर्क-स्यावश्यकता? गान्धी मनुते यत् शास्त्रवचनमीश्वरप्रेरितमस्ति परमेतस्मिन् सत्यपि स नैतन्मनुते यत् शास्त्रं साक्षात्रूपेणेश्वरकृतमस्ति। तदनुसारं शास्त्ररचना धर्म-प्रवर्त्तकैरीश्वरदूतैः वा क्रियते। तदनन्तरं तदुपरि विभिन्नटिप्पणयः क्रियन्ते। एत-

---

१. यंग इंडिया, ६-१९'२६, पेज ३४७

२. यंग इंडिया, ७-१०-१९२६ पेज ३४७

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

त्प्रक्रियानन्तरं तज्ज्ञानमस्माभिः प्राप्यते । अत एतादृशं ज्ञानं साक्षात्रूपेणेश्वरप्रदत्तं न वक्तुं शक्यते । एतादृशे ज्ञाने प्रमादशङ्का भवति । अतः प्रत्येकधर्मग्रन्थस्य वार्त्तासु जनः निर्णयाधिकारं गृह्णीयात् ।[१]

गांध्यनुसारं शास्त्रं बुद्धेः पूरकमस्ति । अतो यद्येतत् बुद्धेरतिक्रमणं कुर्यात्तदा तस्यां परिस्थित्यां तस्य परित्यागो विधेयः । योगवाशिष्ठस्य न्यायप्रकरणेऽपि कथितमेव । गान्धी ततः प्रेरणां गृहीतवान् ।[२]

अपि पौरुषमादेयं शास्त्रं चेद्युक्तिबोधकम् ;
अन्यत्त्वार्षमपि त्याज्यं भाव्यं मायैकसेविनाम् ।
युक्तियुक्तमुपादेयं वचनं बालकादपि,
अन्यत्तृणमिव त्याज्यं व्युक्तं पद्मजन्मना ।

अर्थात् मानवनिर्मितं शास्त्रं तदैव स्वीकार्यं यदा तद् विवेकानुकूलं स्यात् । यदा तद् विवेकानुकूलं नास्ति, तदा तद् बहिष्कार्यं स्यात् । तथापि तदीश्वरप्रेरणया स्वत्वप्रतिपादनं करोति । सदैवास्माभिरौचित्यभावनया परिचालितैः भाव्यम् । यदि बालकोक्तय एव युक्तिपूर्णाः स्युः तदा ता अपि ग्राह्याः भवेयुः । यदि किमपि ब्रह्मणेरितमपि वाक्यं भवेत्, परंतत् विवेकपूर्णं न स्यात्, तदा तत्सर्वथा त्याज्यं भवेत् ।

गान्धी स्वानुभवेनैतदुक्तवान् यत् तत्र बुद्धेः प्रवेशः सरलतया स्यात्, तत्र कस्यापि प्रमाणिकजनस्योक्तेरुद्धरणं हानिकरमसंगतं च वर्तते ।[3]

कारणं स्पष्टमस्ति यत् यदा वयं कस्यापि प्रामाणिकजनस्य कथनमनुमानस्याधारंविना मन्यामहे, तदा तत् अनुकूलप्रतिकूलयोरुभयोरपि पक्षयोरुद्धृतं कर्त्तुं शक्नुमः । अर्थात् व्यक्तिः स्वपूर्वधारणानुकूलं तस्मान्निष्कर्षं निष्कासयितुं शक्नोति । अतः एतादृशे ज्ञाने सत्यस्यान्वेषणं न जायते । अतएव गान्धी महापुरुषाणामुक्त्याधारे निगमन-प्रक्रियामसंगतामुक्तवान् ।

एवमेतत् स्पष्टमस्ति यत् यद्यपि गान्धी शास्त्रं प्रमाणं स्वीकृतवान्, परन्त्वेतस्य सीमामप्यङ्गीकृतवान् । बुद्धेरात्मविश्वासस्य च विरोधिनः शास्त्रवचनस्य तस्य ज्ञानमीमांसायां न किमपि स्थानमस्ति ।

---

१. हरिजन ५-१२-१९३६ पेज ४
२. In search of the supreme, Kheyo P. 108,
२. Young India 8-13-128 P. 75 & bid, p. 316

१०

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

उपरि वयं गान्धिनः शब्दप्रमाण-सम्बन्धे एतद्दृष्टवन्तो यत् तदीया सत्यता तदैव तिष्ठति, यदा सा बुद्धेरकूला भवति । परमेतस्य तात्पर्यमेतत् कदापि नास्ति, यद्बुद्धिरेव ज्ञान-प्राप्तेः श्रेष्ठतमं साधनमस्ति । यथा शब्दज्ञानस्यात्मीया मर्यादा विद्यते, तथैव बुद्धेरपि स्वीया सीमास्ति । गान्धी महोदय एतत्स्वीकृतवान् । बुद्धेः सीमोपरि विचारात्पूर्वं बुद्धेः स्वरूपस्य तथा तस्याः भावनया सह सम्बन्धस्य ज्ञानमनिवार्यमस्ति ।

बुद्धिः गान्ध्यनुसारमस्माकं मस्तिष्केन सम्बद्धा वर्त्तते तथा भावनायाः सम्बन्धोऽस्माकं हृदयेन सहास्ति ।[1] तथापि बुद्धिभावनयोः कश्चनान्तर्विरोधो नास्ति। वस्तुतः सततं विवेकपूर्णे जीवनयापने कोऽपि विचारः भावनायाः विश्वासस्य वा रूपं दधाति ।[2] यदि कस्मिन्नपि विश्वासे बुद्धितत्त्वं विद्यमानं न भवेत् तदा तादृशो विश्वासोऽन्ध विश्वास एव उच्यते । अन्धविश्वासस्य च जीवने किमपि महत्त्वं नास्ति । स विश्वासरूपं कदापि न गृह्णाति ।[3]

अतएवैतद्युक्त्याधार एवैतदपि कथयितुं शक्यते यत् बुद्धिहीना भावना वासनातिरिक्तमपरं किमपि नास्ति। अतो बुद्धि-भावनयोर्मध्ये गम्भीरः सम्बन्धो विद्यते। विनोवामहोदयः स्पष्टरूपेण एतदुक्तवान् यत् भावना बुद्धेरेव परिणामोऽस्ति । यदा बुद्धिः परिपक्वा भवति, सा परिनिष्ठिता भवति । तदैतादृशी बुद्धिरेव भावना कथ्यते ।[1] एवं प्रकारेणैतत् स्पष्टमस्ति यत् बुद्धिभावनयोः कोप्यन्तर्विरोधो नास्ति । तथापि द्वयोरैक्यं स मन्यते । एतद्भेदं हृदये निधायेदानीं बुद्धि-सीमा-परिज्ञानं विधेयम् ।

गान्ध्यनुसारं बुद्धिः ज्ञानप्राप्तेः साधनमवश्यमस्ति, परमेतन्मर्यादा वर्त्तते यदा बुद्धिः स्वसीमातिक्रमणं करोति, तदा सा भयङ्करी राक्षसी जायते । अतो बुद्ध्या सत्यस्य सर्वेऽशाः न ज्ञातुं शक्यन्ते । अतोः बुद्धेः सर्वशक्तिमत्ता न स्वीक्रियते ।

इदानीमेष प्रश्नो जायते यद् बुद्धिः स्वसीमाया अतिक्रमणं कदा करोति ? यदा बुद्धिः नैतिककार्याणां सम्पादने बाधां समुपस्थापयति, तदा सा स्वसीमाया अतिक्रमणं करोति । अधिकाधिकाः बुद्धिवादिनः प्रत्येककार्यारम्भात् पूर्वं तर्कं न कुर्वन्ति, ते भावनया कार्यं विदधति ।अतो महत्त्वपूर्णकार्याणां सम्पादनकृते भावनाया

---

१. I bid 11/10 '28 P. 340

२. I bid 14, 4. 1927 P. 120

3. I bid 14.4. 1927 P. 20

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

एवावश्यकता भवति। बुद्धिः सदा सन्मार्गमानेतुमिच्छति। परमनया कार्यं न सम्पाद्यते। कार्यसम्पादनार्थं भावनायाः विश्वासस्य संकल्पस्य चापेक्षा भवति। इदानीं गान्ध्यनुसारं जीवनं कर्त्तव्यानुसारं कार्यानुसारं वा किमपि नास्ति। अतो यदा कस्यापि कार्यस्य सम्पन्नतायां बुद्धिः बाधिका भवति, तदा तत्रैषा सीमातिक्रमणं करोति। अतोबुद्धिः सदा निर्देशिकास्वरूपैव ग्राह्या भवेत्। तया हृदयकार्याणामतिक्रमणं न विधेयम्।

बुद्धिद्वारेण सत्यस्य बाह्यरूपमेव ज्ञायते। अनया वयं मनुष्यस्यान्तःस्थामनुभूतिं न ज्ञातुं शक्नुमः। अन्तःस्थानुभूतीनां प्राप्त्यर्थं मस्तिष्कधरातलमपहाय हृदयधरातलस्य प्राप्तिरपेक्षिता भविष्यति। असह्यपीडास्वनुभूतास्वेवात्मगह्वरे गन्तुं शक्यते। अतः स्पष्टमस्ति यद् बुद्धिरन्तःकरणे प्रवेष्टुंनार्हति। परन्तु महत्त्वपूर्णकार्यकृतेऽस्माभिः तत्रापि प्रवेशो वाञ्छनीयो भवति।

गांधिमहोदय एतदुक्तवान् यत् बुद्धिः रहस्यात्मकशक्तेः ज्ञानमस्मभ्यं दातुं समर्था न भवति। एतत्तात्पर्यं नैतदस्ति यद्रहस्यात्मकमबौद्धिकमस्ति। अत एतादृशे ज्ञानेऽबौद्धिके स्वीकृते न तद्विकृतं कल्प्यते। एतादृशस्य ज्ञानस्य यथार्थता महापुरुषाणामनुभूतिभिस्तथा तेषां परिवर्तितव्यक्तित्वेनैव ज्ञायते। अत एतत् स्पष्टमस्ति यत् सर्वप्रकाराणि ज्ञानानि बुद्धेर्मापदण्डेनैव न मीयन्ते। किञ्चिदेतादृशं ज्ञानमस्ति, यदस्माभिरन्तर्ध्वनिभिः प्राप्यते। यस्मै गान्धिनान्तरात्मनः संज्ञा प्रदत्ता। अतोऽस्य ज्ञानस्य सम्बन्धेऽपि तस्य विचाराः ज्ञेयाः स्युः।

अन्तरनुभूतिः

गान्धी स्वजीवनकालेऽनेकधा स्वान्तरात्मानुसारं महत्त्वपूर्णं निर्णयं कृतवान्। अत एतादृशज्ञानस्य तस्य ज्ञानमीमांसायां परं महत्त्वपूर्णं स्थानमस्ति। एतादृशं ज्ञानं दार्शनिकभाषायामन्तरनुभूतिशब्देनान्तर्बोधशब्देन वा व्यवह्रियते।

अन्तरात्मनो ध्वनिविषये गान्धी कथितवान् यत् एषोऽस्माकं मध्ये प्रभोरीश्वरस्य ध्वनिरस्ति। अस्माकमन्तश्शक्तिरेतादृशी विद्यते या यदा कदा स्ववेदनाप्रकाशाय प्रेरयति। एषा शक्तिः कदापि न वञ्चनां करोति। इयं कदाचित् संसारस्य समस्तप्रियजनानां निर्णयानां विरोधे कथनाय कथयति। अस्याःसम्बन्धोऽस्माकं हृदयस्य विशेषभागेन भवति। इयं शक्तिरस्मान् महाकार्येभ्यः सदा प्रेरयति।

एतस्याः शक्त्याः प्राप्तिः सततप्रयत्नेन भवति। केवलमिच्छया नैषा नीयते। बालकेषु, पशुषु, मूर्खेषु च नैषोत्पद्यते। एनां प्राप्तुं कठिनानुशासनस्यावश्यकता भवति।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

अन्तर्ध्वनिः व्यक्तिसमाजयोः भेदरूपेऽपि नो मन्यते । योध्वनिः व्यक्तिकृते सत्योऽस्ति स एव समाजकृतेऽपि तथास्ति । अतो वैयक्तिक-सामूहिकात्मनोर्भेदगणना नोचिता विद्यते ।

येनैषा शक्तिरुपलब्धा, स जनः कातरो भवति । यतः स आत्मानं कदाप्यन्येभ्यः श्रेष्ठं न मनुते । तस्मिन् पूर्णा विनम्रता तथान्यवाक्श्रवणाय तत्परता भवति । स सदा स्वापराधश्रवणाय सज्जो भवति ।

प्रायो वैज्ञानिका एतादृशं ध्वनिमात्मसंसूचनसंज्ञया समलङ्कुर्वन्ति । तथाहि तं यथार्थज्ञानकोटौ न गृह्णन्ति । परं गान्धी तं विशेषार्थे—आत्मसंसूचनं स्वीकृतवान् । एतदात्मसंसूचनमस्ति, यतोऽस्माकमन्तःकरणेष्वीश्वरध्वनिरस्ति । एषध्वनिः न दैत्यध्वनिः वक्ष्यते, यथाहि वैज्ञानिकाः मन्यन्ते । इमं ध्वनिं प्रत्येकजनः श्रोतुं शक्नोति यदा सः एतदर्थं निर्धारितनियमान् पालयति ।

अन्तरनुभूतेरुल्लिखितविवरणेनैतत्स्पष्टमस्ति यत्सर्वविधज्ञानेष्वस्य महत्त्वपूर्णं स्थानमस्ति । अन्यैरप्यध्यात्मवादिभिः दार्शनिकैरेतज्ज्ञानं सर्वोत्तमं स्वीकृतम् । यस्य ज्ञानं वयं बुद्धया न प्राप्नुमः, तस्य ज्ञानमन्तरनुभूत्या सरलतया जायते । गान्धिनैतादृशमपि ज्ञानं नावौद्धिकं कथितम् । अतोऽस्य ज्ञानस्य बुद्धया सह न कोऽपि विरोधो विद्यते । डा० राधाकृष्णनोऽपि बुद्ध्यन्तरनुभूत्योर्मध्ये विरोधं न स्वीकृतवान् । स कथितवान् यदेषानुभूतिः बौद्धिकज्ञानानुशासनेनैव लभ्यते । गान्धिनेऽप्येतन्मान्यमस्ति । गान्धिन एतज्ज्ञानस्य विशेषतैषास्ति यदेतस्य ज्ञानस्योपयोगः केवलमात्मज्ञाने ब्रह्मज्ञाने वा न भविष्यति । प्रत्युतास्योपयोगः दैनिकसमस्यानां समाधानेऽपि भविष्यति । यदि गान्धिनः ज्ञानसम्बन्धि-विचारस्य समीक्षा क्रियेत तदैतत्, स्पष्टरूपेण प्रतीयते यत्तस्य ज्ञानसम्बन्धिविचाराः केवलबौद्धिकव्यायामार्थमेव न सन्ति, प्रत्युत जीवनस्य निपुणतायै । स एतदुक्तवानपि—"तद्दर्शनं यस्य सम्बन्धः जीवनेन सह नास्ति, मृतशरीरसदृशं विद्यते"[1] सम्प्रति विशेषतः आमेरिकाः दार्शनिकाः ज्ञानसम्बन्धे मार्गान्वेषणे तथा सिद्धान्तस्थापने व्यस्ताः भवन्ति । तेषां विचारेषु शास्त्रीयता, सूक्ष्मता तथा स्पष्टतावश्यमेव प्राप्यन्ते परं तेषां सम्बन्धः सम्पूर्णजीवनस्य विकासेन सह नास्ति । तेषां स्थितिः केवलमस्माकं मस्तिष्कधरातल एव भवति । चरित्रे तस्य प्रभावो न लक्ष्यते । परमेषा गान्धिन एव विशेषता विद्यते यत् ज्ञान-मीमांसायामपि सम्पूर्णजीवनस्य सफलता वाञ्छिता ।

---

1. young India, 14-4-1927. P. 120

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

गान्धिनो ज्ञानमीमांसा जैनदार्शनिकानां स्याद्वादस्यानेकान्तवादस्य च परं समीपेऽस्ति। अतएतेषां विचारेषु विवादस्यालोचनायाश्च न किमपि स्थानं वर्त्तते। एतेषां ज्ञानसम्बन्धिविचारेषूपयोगितायाः सर्वथा सद्भावो वर्त्तते।

एतेषां विचारस्यैका द्वितीया विशेषतेयमप्यस्ति यत् सर्वाणि ज्ञानान्यध्यात्मवादेन सह सबद्धानि सन्ति। अतस्तैरस्मभ्यं चरमलक्ष्यप्राप्तौ सहायता लभ्यते अतः किमपि ज्ञानं नानुपयोगि विद्यते।

गान्धी ज्ञानं शक्तिस्वरूपं ज्ञातवान्। सर्वाः शक्तयोऽन्त आध्यात्मिकशक्तावेव परिणताः जायन्ते। अतः सर्वविधानि ज्ञानान्यन्तत आध्यात्मिक ज्ञान एव परिणतानि भवन्ति। परमेतेन व्यावहारिकजीवनस्याल्पापि क्षतिर्न जायते।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

गान्धि-नीतिदर्शनम्

प्राध्यापकः कन्छेदीलाल, एम० ए०, साहित्याचार्यः

महात्मा गान्धी तेषु महात्मसु एक आसीत् यैः प्रतिपादितानां सिद्धान्तानां पालनं स्वजीवने कृतम्। महात्मा गान्धी तं सिद्धान्तं सिद्धान्तरूपेण न मनुते स्म, यस्य सिद्धान्तस्य पालनं जीवनेऽशक्यं भवेत्।

नीतिकाराः कथयन्ति "शठे शाठ्यं समाचरेत्" किन्तु महात्मनो नीतिर्विपरीतासीत्। स कथयति स्म यत् विरोधिगुणेनैव प्रस्तुतगुणस्य परिमार्जनं शक्यम्। यथाऽन्धकारस्य नाशः अन्धकारेणैव न भवति, किन्तु प्रकाशेन भवति, पापप्रक्षालनं पापकर्मणा न भवति, किन्तु पुण्यकर्मणा पापप्रक्षालनं भवति। मलप्रक्षालनं मलेन, पङ्कप्रक्षालनं पङ्केन न भवति किन्तु जलेन पङ्कादिप्रक्षालनं भवति। अनेनैव प्रकारेण शठस्य शठता शाठ्याचरणेन न दूरीभवति अपितु विनयाचरणेन शठता दूरीभविष्यति।

जातककथासु राजोवादजातकनाम्नी एका कथा विद्यते। वाराणस्यां ब्रह्मदत्तकुमारो राजा स्वदेशेऽतिलोकप्रिय आसीत्। स चिन्तितवान् मम देशस्य जना मम शासने निवसन्ति, अतएव ते मम नियन्त्रणभयात् मम प्रशंसां कुर्वन्ति। अन्यदेशं गत्वा स्वसम्बन्धे जनानां कीदृशी सम्मतिर्विद्यते इति ज्ञातव्यम्। रथमारुह्य सारथिं निवेश्य देशान्तरं प्रचलितः। तथैव कोसलदेशात् मल्लिकाख्यो नृपः स्वसम्बन्धेऽन्यदेशस्यजनानामभिप्रायान् ज्ञातुमागच्छन्नासीत्। एकस्या नद्याः सेतौ उभयोः रथावन्योन्यस्य समक्षमास्ताम्। सेतोः संकीर्णत्वात् रथयोः कस्यापि रथस्याग्रे गमनं शक्यं नासीत्। उभयोः रथयोः सूतौ स्वकीयस्य रथस्य पश्चात्करणे स्वकीयस्य राजकुमारस्यावमानं मत्वा पश्चात्कर्तुं तत्परौ नास्ताम्। उभौ सूतौ निर्णयं कृतवन्तौ यत् यो राजकुमारः अन्यापेक्षया हीनः स्यात् तस्य रथ एव पश्चात्करणीय इति। वयसि, राज्यविस्तारे, विद्यायामन्यासु च कलासु उभावेव राजकुमारौ समानावास्ताम्। कस्य रथः पश्चात्करणीयः इति समस्याऽऽसीत्। अन्ते कोसलराजकुमारस्य सूतोऽवदत्—"मम राजकुमारः मानिनं मानेन, शूरं शौर्येण, शठं शाठ्येन जयति।' ब्रह्मदत्तस्य सूतेन कथितम्—'यदि इमे गुणाः तर्हि अवगुणाः के? मम राजकुमारस्तु लुब्धं दानेन, अभिमानिनं विनयेन, क्रोधिनं क्षमया, दुर्जनं सज्जन-

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

तयाऽसत्यवादिनं सत्येन जयति ।' ब्रह्मदत्तस्य गुणान् श्रुत्वा मल्लिकस्य सूतः ब्रह्मदत्तं प्रशस्य स्वकीयं रथं पश्चात् कृतवान् । तथैव महात्माऽपि दुर्जनान् सुजनतया दुर्गुणान् च गुणैर्जेतुं यतते स्म । अनया नीत्या तस्य विजयः न केवलं विपक्षाणां शरीरेषु अपितु हृदयेषु अभवत् ।

अहिंसापरोपकारविषये गान्धिनो दर्शनम्—सामान्यतः जनानामियं धारणा विद्यते यदुपकारकर्त्ताऽन्येषां जनानां हितं सम्पादयति । अहिंसकोऽपि परपीडानिवारको भवति । परन्तु महात्मनः सिद्धान्तः नितरां भिन्न एवासीत् । महात्मा गान्धी मनुते स्म यत् परोपकारकर्ता परस्य हितं सम्पादयति किन्तु प्रथमं स्वस्य हितं करोति । यदि स्वकीये शरीरे कस्मिन्नपि अवयवे पीडा भवति तर्हि आत्मप्रदेशसम्बन्धात् सर्वमेवाङ्गं पीडायुक्तं भवति, ततः सर्वतः पीडां दूरीकर्तुं यतते । यस्यात्मा महान् भवति तस्य प्रेम व्यापकं भवति । यदि स्वसमक्षं कोऽपि प्राणी दुःखी भवति तर्हि तस्य दुखं स्वात्मनि संक्रामति । यथा पुत्रस्य पीडां दृष्ट्वा माता व्यथिता भवति, पुत्रस्य व्यथा यदा दूरीभवति तदा मातुर्वेदनाऽपि दूरीभवति । यः स्वहृदये संक्रान्तस्य परस्य दुःखस्य दूरीकरणाय यतते, सः प्रकारान्तरेण स्वहृदयस्य दुःखं दूरीकर्त्तुमेव यतते । अहिंसकः परस्य वेदनां दृष्ट्वा विकलः व्यथितश्च भवति, स्वस्य व्यथां दूरीकर्तुमेव परस्य वेदनां दूरीकरोति, यदा परस्य वेदना दूरीभवति तदा अहिंसकस्य हृदये शान्तिर्भवति, गान्धिनो जीवनस्य बहूनि उदाहरणानि विषयेऽस्मिन् सन्ति । एका कथा विद्यते यत् एकस्य पुत्रस्य विषये द्वयोः मात्रोः कलह आसीत् । ते पुत्रं स्वं स्वं प्रति कर्षतः, यदा कर्षणेन पुत्रः दुःखी आसीत् तदा तस्य पुत्रस्य यथार्था जननी पुत्रस्य दुःखेन दुःखिनी भूत्वा पुत्रं त्यजति, कथयति च इमं पुत्रं त्वमेव पालय, यतः पुत्रस्य यथार्था जननी तस्य पुत्रस्य वेदनां सोढुमसमर्थाऽऽसीत् ।

समाजसंशोधनाय स्वसंशोधनमावश्यकम्—जनाः कथयन्ति यत् समाजस्य समूहस्य वा हितं सम्पादनीयम्, समाजस्योद्धाराय समाजदोषाणां परिमार्जनमावश्यकं वर्तत इति । किन्तु गान्धिनः सिद्धान्तोऽयमासीत् यत् व्यक्तेरुद्धारेण समाजस्योद्धारः भवति । अन्येषां दोषपरिमार्जनार्थं स्वदोषान् परिमार्जय । यदा गान्धी कुत्राऽपि कस्यापि अकार्यं पश्यति स्म तदा स्वसंशुद्ध्यर्थमुपवासं करोति स्म । तस्य विश्वास आसीत् यदात्मसंशोधनेन परेषां शुद्धिः स्वयमेव भवति ।

सैन्यशक्त्यपेक्षयाऽऽत्मशक्तिर्बलीयसी—महात्मनः कथनमासीत् यद् यदि कस्यापि देशस्य जनता स्वात्मशक्तिमवबुध्येत तर्हि कोऽपि वैदेशिकः शासकः तस्या उपरि शासनं कर्तुं न प्रभवेत् । सैन्यशक्तिबलेन यदि सर्वा जनता नश्यति तर्हि जनानामभावे कस्योपरि शासनं करिष्यति । सैन्यबलं भयमुत्पादयति, किन्तु सैन्य-

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

बलस्य हृदये कोऽपि प्रभावो न भवति । आत्मबलं सैन्यबलात् प्रभावकरं भवति ।

नीतिधर्मविषये महात्मनः प्रशस्ताभिप्रायाः—(क) परोपकारः सज्जनस्य भोजनम्—महात्मना गान्धिना नीतिधर्म इत्याख्ये पुस्तके लिखितं यत् कोऽपि सत्पुरुषः कीर्तिकामनामात्रेण परोपकारं न करोति अपितु परोपकारं विना स व्याकुलः भवति, यथा जनः भोजनं विना न जीवति तथैव परोपकार-करणं सज्जनस्य भोजनं वर्तते ।

(ख) नीतिकार्ये विफलाऽपि नीतिर्न दोषकारिणी—न्यायमार्गस्य नीतिमार्गस्य वाऽऽचरणं कुर्वन् जनः यदि विफलो भवति तथापि नीतेर्न्यायस्य वा दोषो नास्ति अपितु ये जनाः नीतिं न्यायं वा त्यजन्ति त एव दोषभाजनानि सन्ति ।

(ग) नीतिकार्यं सदभिप्रायेण कर्तव्यम्—नीतेः न्यायस्य ज्ञानमात्रं न पर्याप्तमपितु नीते र्न्यायस्य सज्ज्ञानानन्तरं नीतेः न्यायस्य वा पालनं जीवने आवश्यकं वर्तते । नीतियुक्तं कार्यं यद्यपि सत्कार्यं भवति किन्तु सत्कार्यकरणमात्रं पर्याप्तं नास्ति, अपितु तत्कार्यं सदभिप्रायेणापि कृतं न वा इत्यपि विचारणीयम् । द्वौ जनौ एकमेव कार्यं कुरुतः, एकस्य कार्यं नीतियुक्तमन्यस्य च नीतिरहितं भवेत् । एको जनो दयया द्रवीभावमवाप्य दीनेभ्यो भोजनं ददाति, द्वितीयो मानं कीर्तिं वा लब्धुं दीनान् भोजयति । उभयोः कार्यं तुल्यं वर्तते किन्तु प्रथमस्य कार्यं नीतियुक्तं विद्यते ।

(घ) नीतिकार्यं निर्भयं कर्तव्यम्—नीतियुक्तं कार्यं सदभिप्रायेण कृतमपि यदि निर्भयतापूर्वकं कृतं, परेषां नियन्त्रणं विना कृतं च भवति, तदेव कार्यं नीतियुक्तं भवति । यदि किमपि सत्कार्यं परेषां नियन्त्रणेन भयेन वा कृतं तर्हि तत्कार्यं नीतियुक्तं न भति । यथा कोऽपि श्रेष्ठी सेवकस्य मासिकवृत्तिं कर्त्तव्यबुद्धया वर्धयति, तदा तत्कार्यं नीतियुक्तं भवति अथ च स्वामी जानाति यदि सेवकायाधिका वृत्तिर्न दीयते तर्हि सेवकः कार्यं त्यक्ष्यति, तेन चाहं दुःखी भविष्यामि, अतएव तस्य सेवकस्य वृत्तिं वर्धयति तर्हि वृत्तिवर्धनं नीतियुक्तं न भवति । इंग्लैंडस्य राज्ञः द्वितीयरिचर्डाख्यस्य समीपे यदा कृषकाणां समूहः क्रोधवशात् स्वाधिकार-याचनार्थं प्राप्तः तदा भयात् राजाऽधिकारपत्रे हस्ताक्षरं कृत्वा कृषकेभ्यः दत्तवान् किन्तु यदा कृषकेभ्यो भयं दूरीभूतं तदा तेन राज्ञा स्वप्रदत्तमधिकार पत्रं निरस्तम् । तस्य द्वितीयरिचर्डस्येदं कार्यं कथमपि नीतियुक्तं नासीत् । नीतिमार्गः वीराय महावीराय वा भवति । भीरवो जनाः नीतिमार्गे चलितुं न प्रभवन्ति ।

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

नीतिषु धर्मस्य सम्बन्धः—महात्मनो गान्धिनः स्पष्टं मतमासीत् यत् नीतेर्धर्मेण सहाभिन्नः सम्बन्धो वर्तते। नीतिबीजं धर्मजलेन यदि न सिञ्चेत् तर्हि फलार्थं बीजे प्ररोह एव नोद्भविष्यति। धर्मजलेन विना नीतिबीजं शुष्कतां याति। अथ च नीतिरूपा मूलभित्तिर्न स्यात् तर्हि धर्मरूपस्य भवनस्य उच्छेदः स्यात्। अतएव सर्वे धर्मप्रचारका धर्मेण सह नीतिं संयोजयन्ति।

नीतिबलं महत्तमम्—शरीरबलेन बुद्धिबलं महत्तरं भवति, मनुष्यः पशुभ्यः शरीरेण बलवत्तरो नास्ति, तथापि स श्रेष्ठो वर्तते। शरीरबलेषु ऋक्षाः, महिषाः, गजा इत्यादयः मनुष्यापेक्षया बलवत्तराः सन्ति, यदि जनास्तैः सह शरीरयुद्धं करिष्यन्ति तर्हि जनानां पराजयोभविष्यति, किन्तु बुद्धिबलेन जनाः बलवतः पशून् स्ववशे कुर्वन्ति। युद्धकाले येषां महती सेना भवति त एव विजयं न लभन्ते अपितु येषां राज्ञां सेनापतयः बुद्धिमन्तः भवन्ति ते राजानः अल्पसैन्ययुक्ता अपि जयं लभन्ते। अनेन सिद्धयति यत् शरीरबलात् बुद्धिबलं महत्तरं वर्तते।

गान्धिना लिखितं यत् डार्विनमहोदयस्य मतानुसारेण शरीरबलात् बुद्धिबलं महत्तरं भवति, किन्तु नीतिबलं शरीरबुद्धिबलाभ्यां महत्तमं वर्तते। नीतिबलस्य समक्षे बुद्धिवैभवयुक्ता अपि नम्रीभूय पराजिताः भवन्ति। संसारे जीवनस्य लोभः सर्वेषां प्राणिनां भवति। यस्य बलं भवति स एव जीवति किन्तु शरीरबलात् बुद्धिबलं, बुद्धिबलादपि श्रेष्ठं नीतिबलं भवति। गान्धिना दन्तकथानां बहून्युदाहरणानि लिखितानि। ग्रीसदेशस्य जनता बुद्धिशालिनी आसीत् किन्तु यदा तस्य देशस्य जनता नीतिं तत्याज तदा तस्य जनतायाः बुद्धिरेव शत्रुः संजाता। मनुष्यस्य गर्वरूपोऽसिस्तस्यैव कण्ठे पतति।

वसुधैव कुटुम्बकम्—महात्मा श्रीमद्रामचन्द्राणां सिद्धान्तैः प्रभावित आसीत्। महात्मा गान्धी न केवलं मानवान् अपितु सर्वान् जीवान् पशून्, कीटादीनपि आत्मवत् पश्यति स्म। एकदा कारागारे स्वपीडाकरकं हब्शीजनमपि कण्टकपीडया व्याकुलं दृष्ट्वा तस्य व्यथां निराकृतवान्। स गान्धिनो विपक्षोऽपि समक्षो बभूव। उदारचरितानां वसुधैव कुटुम्बतुल्या भवति किन्तु अधुनातनजनानां सिद्धान्तः अस्याःनीतेर्विपरीतो वर्तते। ते स्वकुटुम्बमात्रं संसारं मन्यन्ते। यदि स्वस्य कुटुम्बं स्वस्थं सुखयुक्तं च वर्तते तर्हि ते संसारे कस्याऽपि प्राणिनः दुःखं न पश्यन्ति, न च कस्यापि वेदनां शृण्वन्ति। स्वस्य कुटुम्बस्य सुखार्थं सर्वेषामन्येषां जनानां प्राणिनां वाऽहितं कर्तुं तत्पराः भवन्ति। ते नीतिमनीतिमपि न गणयन्ति। भारतवर्षे इयं प्रवृत्तिर्वर्धमाना वर्तते। अतएव सर्वत्र भ्रष्टाचारस्य साम्राज्यं वर्तते। राजकीयसेवकाः जनतायाः कार्यं परस्य कार्यं मन्यन्ते, ते सेवाभावेन सद्भावनया च

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

जनतायाः कार्यं न कुर्वन्ति। उत्कोचलोभेन सर्वत्र जनतायाः कार्याणि भवन्ति। नीतिवलेन रहितस्य देशस्य पराजयः अथ च विनाशः संभव एव।

अर्थनीतिः—महात्मा गान्धी रस्किनमहोदयस्य पुस्तकं पठित्वा तस्य चिन्तनेन प्रभावित आसीत्। गान्धिनोऽर्थशास्त्र-विषये चिन्तनं दार्शनिकस्य चिन्तनेन न्यूनं नास्ति। अर्थशात्रं केवलं धनलाभस्य विवेचनां करोति। अर्थशास्त्राणां शास्त्रं केवलं धनार्जनस्य शास्त्रं विद्यते इति जनानां धारणा। धनं तु अनेकोपायैः प्राप्यते, एकस्मिन् युगे यूरोपमहाद्वीपे जना धनिकं विषदानेन हत्वा तस्य धनेन स्वयं धनिकाः भवन्ति स्म। अधुना व्यावसायिका निर्धनेभ्यः खाद्यपदार्थेषु मिश्रणं कृत्वा धनिका भवन्ति। अयं प्रयोगोऽपि विषं दत्त्वा धनिकीभवनमिव विद्यते। अयं प्रयोगः धनिकीभवनस्य कलाऽथवा विज्ञानं विद्यते। परन्तु नीतेरनीतेर्वा विवेकं त्यक्त्वा धनार्जनं भवति। धनं साधनमात्रं मन्तव्यम्, धनेन सुखं दुःखम् उभयं संभाव्यते, यदि धनं विवेकिनो हस्तं गच्छति तर्हि कृषिर्भवति, अन्नमुत्पद्यते, कृषका निर्दोषं श्रमं कृत्वा सन्तोषं लभन्ते। परन्तु दुर्जनस्य हस्ते धनस्य सञ्चयेन युद्धस्य सामग्री निर्मीयते, जनानां सर्वनाशो भवति। युद्धे संलग्नावुभौ नश्यतः।

नैतिकनियमैरर्थशास्त्रे स्नेहस्य सहानुभूतेश्च संसर्गो भवति। स्नेहस्य सहानुभूतेः संसर्गेणैव कार्यस्य सफलता दृश्यते केवलमर्थशास्त्रनियमेन कार्येषु साफल्यं न दृश्यते। यदि सेनानायकः अर्थशास्त्रस्य नियमानुसारेण सैनिकैः सह व्यवहरति, तदा निर्दिष्टं कार्यं न संभवम्। सेनापतेः सैनिकानां मध्ये स्नेहस्य सहानुभूतेश्च वलमेव यथार्थं वलं भवति। स्नेहेनैव सैनिकः सेनापत्यर्थं मर्तुं तत्परो भवति।

सैनिकः परेषां जीवननाशाय न भवति, अपितु स जनानां प्राणरक्षार्थं स्वजीवनं समर्पयति। सैनिकः सैनिकपदग्रहणसमय एव स्वजीवनं राष्ट्राय समर्पयति। अयमेव नियमः प्राड्विवाकस्य, चिकित्सकस्य, धर्मोपदेशकस्य कृते विद्यते। प्राड्विवाकेन मरणपर्यन्तमपि न्यायप्राप्त्यर्थं प्रयतितव्यं, चिकित्सकेन प्राणसङ्कटेऽपि आतुरस्योपचारः कर्तव्यः। धर्मोपदेशकः प्राणसंकटेऽपि सज्ज्ञानं नीत्युपदेशं सन्मार्गं च प्रदर्शयेत्।

व्यापारिकक्षेत्रे जनैरिदं स्वीकृतं यत् व्यवसायिनः कार्यं केवलं धनसञ्चयो वर्तते, किन्तु यथार्थरूपेण इयं मान्यता त्रुटिपूर्णा वर्तते। यदि व्यवसायो केवलं नीत्याऽनीत्या वा केनाऽपि प्रकारेण धनं सञ्चिनोति तर्हीदं तस्य कार्यं चौर्यमेव विद्यते। यथा सैनिकस्य कर्त्तव्यं राष्ट्रहिताय प्राणत्यागो विद्यते, तथैव व्यावसायिकस्य कर्तव्यं जनहिताय न केवलं धनत्यागः किन्तु प्राणत्यागो ऽपि विद्यते। सर्वेषु

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

राज्येषु व्यवसायिनः कार्यमावश्यकवस्तूनां व्यवस्थाकरणं विद्यते। धनस्य लाभस्तु तस्यानुषङ्गिकं फलं विद्यते। व्यावसायिको बहुभ्यो जनेभ्यः सेवाया अवसरं दत्त्वा जीविकां ददाति। कतिपयबालकाः स्वनिवासस्थानं त्यक्त्वाऽन्यत्र कार्यं कुर्वन्ति। तत्र व्यावसायिका एव बालानां पित्रोः स्थाने भवन्ति।

सार्वजनीनमर्थशास्त्रमेव कल्याणकरंलोकप्रियं च भवति। सार्वजनीनस्यार्थशास्त्रस्य अर्थः उचितस्थाने, उचितसमये सुखदायकानां दुःखनिवर्तकानाञ्च वस्तूनामुत्पादनं संग्रहश्च। यः कृषकः समये उत्पादनं करोति, यः शिल्पकारः उचितं कार्यं करोति या स्त्री समये भोजनं पचति ते सर्वे यथार्था अर्थशास्त्रिणः सन्ति। ये जनाः समस्तस्य राष्ट्रस्य सम्पत्तिवर्धने संलग्नाः सन्ति, ते यथार्था अर्थशास्त्रिणः सन्ति। अनेन प्रकारेण महात्मनो गान्धिनः अर्थशास्त्रविषये ऽपि नूतनं दर्शनं विद्यते।

यद्यपि महात्मनो गान्धिनः नीति-सिद्धान्ताः पूर्वमहापुरुषप्रतिपादिताः सन्ति तथापि तेषां विषये मौलिकचिन्तनेन एवं स्वजीवने पालनेन च गान्धिसिद्धान्ताः "गान्धिनीति" रिति नाम्नाऽपि प्रसिद्धा सन्ति। तस्य सिद्धान्ता गान्धिदर्शननाम्नाऽपि प्रसिद्धाः सन्ति। गान्धिनो विचारेषु समन्वयो दृश्यते ऽतएव तस्य विचारधारा सर्वोदयनाम्नाऽपि ज्ञायते। गान्धिनीतिः जनकल्याणकारिणी, समाजव्यवस्थापिका च वर्त्तते।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

महात्मगान्धिनो जीवन-दर्शनम्

श्री गोविन्द नरहरि बैजापुरकरः, एम० ए०,
न्याय-वेदान्त-साहित्याचार्यः

जयन्ति ते महात्मानो गान्धिनः सत्यशालिनः ।
नास्ति येषां यशःकाये जरामरणजं भयम् ॥

महत्प्रमोदावहमेतत् यद् वर्षेऽस्मिन् प्रायोऽखिले विश्वस्मिन् भारतस्य राष्ट्रपितुः महात्मगान्धिनः शतसंवत्सरीमहोत्सवः परया श्रद्धा-भक्त्या परिचाल्यते । १७६९ मितेशवीयवत्सरे अक्तूबरमासस्य शोभने द्वितीये दिने प्रेष्ठेनानेन भारतवसुन्धरालङ्कारेण न केवलमस्माकमेव राष्ट्रं समुद्भासितं स्वावतरणेन, प्रत्युत विश्वस्मै भारत प्राणपदं सत्याऽहिंसापीयूषं श्रवणाञ्जलिपुटपात्रेण पाययित्वा भौतिकता-हालाहलस्य तापशामकोऽमोघ उपायः परया कृपया उपायनीकृतः ।

सामान्यतो नैकेषु राष्ट्रेषु यथाकालमसंख्याता महापुरुषाः समुदयन्ते । भारतेऽपि अनादिकालतोऽद्य यावत् कियन्तो महात्मानोऽवतीर्णाः । किन्तु आत्महन्तो भौतिकविज्ञानस्य चरमोत्कर्षकरेऽस्मिन् युगे शाश्वतिक्याः शान्ते भरतीयः प्रत्नतरो राद्धान्तोऽनितरसाधारणेन लोकग्राह्येण नव्येन व्यापकेन रूपेण महात्मगान्धिनैव प्रसारितः । नूनं सर्वथा समुचितेऽवसरे विश्वस्मिन् तत्प्रसारणमाध्यमस्य सौभाग्यमेतेभ्य एव महात्मभ्यः सुलभीभूतम् । अत एव कामं राजनैतिक्यादिदृष्टिभिस्तेषां व्यक्तित्वमतितरां स्पृहणीयं समनुकरणीयञ्च । वयं पुना राजनीतिललनायाः सौभाग्यविन्दोर्धर्मस्याध्यात्मस्य वा प्रोन्नायकस्य तात्त्विकसन्तविशेषरूपेणैव तान् सर्वाधिकस्पृहणीयान् मन्महे । लोकोत्तरमेतत् तेषां बलमेव तदा सर्वथा निश्शस्त्रमस्माकं राष्ट्रं चिरकालिकवैदेशिकदासतापाशैः उन्मोचयितुं प्राभवत् ।

महात्मगान्धिभिरस्माकं संसारयात्रिणां कृते नैकानि बहुमूल्यानि जीवनपाथेयानि उपायनीकृतानि । तानि किल परत्र इव इहापि शान्ति-सौमनस्याय सुखमयजीवनयापनाय च सविशेषं प्रभवन्ति । नूनम् ईश्वरस्तत्प्रार्थना, अहिंसासत्यादीनि एकादशव्रतानि चैतादृशान्येव उपायनानि । पूर्वमेतानि व्यक्तिगतोपास्तिसाधनत्वेन, तत्रापि च पारमार्थिनसाधनचण्यैरेव समाद्रियन्ते स्म । गान्धिमहाभागैः पुनस्तानि

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

सामूहिकसाधनरूपेण तत्रापि च न केवलमध्यात्ममार्गे एव, प्रत्युत जीवनस्य निखिलेषु क्षेत्रेषु निर्विशेषतया प्रयोजकानीति महता भरेण सङ्घुष्टम्। यदि वयं तेषु दृशमावर्जयन्तो जीवने तानि समनुकर्तुं प्रयतेमहि तदा संसारयात्रायामपि कदापि वैफल्यं न भजेम। परत्र च तेषां यादृशी कार्यकारिता, न सा विपश्चितां तिरोहितेति न तत्र वहु वक्तव्यमवशिष्यते। अत आगच्छन्तु, शुभेऽवसरेऽस्मिन् क्षणं तानि जीवन-पाथेयानि तेषामेव शब्दैराकलय्य समीक्षया समासतो भावयामः।

ईश्वरस्तत्प्रार्थना

ईश्वरः

ईश्वरविषये महात्मानस्ते वदन्ति—"ईश्वरोऽस्त्येव। न दृश्यत इति तु अस्माकं दौर्भाग्यम्। निर्धनानां सेवैव ईश्वर-सेवा। स हि पिपीलिकायै कणं हस्तिने च तदभिमतं ददाति। पिपीलिकाया अपि ज्ञानतोऽपरिपीडनं तत्सेवैव। यो हि तां समाचरति, सोऽन्यान् प्राणिनः स्वसजातीयं मानवञ्च कथन्नाम परिपीडयेत्? आत्मज्ञानमिदं जीवजातेन अर्थात् ईश्वरेण सह ऐक्यतन्मयभावने नैव समधिगम्यते। जीवजातेन सहैक्यसम्पादनं नाम तद्दुःखेन स्वात्मनि दुःखानुभूतिस्तद्दुःखनिवारणञ्चे" ति।

ईश्वरविषयकाण्येतानि तेषांसूत्राणि सर्वथा अध्यात्मनिष्ठान्यपि व्यवहारविधिमपि सौमनस्याधायिनीं विदधतीत्यहो तेषां प्रौढत्वम्।

प्रार्थना

'प्रार्थना'-शब्दार्थं निरूपयन्तस्ते प्राहुः—"स्वीयाऽऽयोग्यताया अशक्तेश्च स्वीकरणं प्रार्थना। सहस्रनाम्नो भगवतो यत्किमपि नाम रोचेत, तद् भजनीयम्। सर्वाण्यपि नामानि एकं चैतन्यमेव व्याहरन्ति। प्रार्थना भजनं वा न जिह्वया, हृदयेन जायते। अत एव मूका अपि प्रार्थनां कर्तुं शक्नुवन्ति। हृदि हालाहलं चेत्कृतं जिह्वाग्रवर्तिना अमृतेन। यावन्मानवोऽन्तर्बहिः सत्यं सामाजिकतां पावित्र्यादिकञ्च गुणजातं न वर्धयति, हृदयेन रामनामोच्चारणं सर्वथा ऽसम्भवि" इति।

प्रार्थना-निरूपणेऽस्मिन् हार्दिकतया समं सद्गुणानामाधानाय तद्वर्धनाय च उपदेशोऽयं प्रत्नोपदेशसागरात् नूत्नरत्नाविष्करणं नाम। महात्मनां श्रेष्ठतमाः शिष्याः सर्वोदयदर्शनाचार्याः श्रीविनोवा भावे महोदया अपि कथयन्ति यदात्मस्मृतिव्यतिरिक्तानां सर्वासां स्मृतीनां निवारणं ब्रह्मनिर्वाणाय आवश्यकम्। आत्मस्मृत्यैव इतरस्मृतीनां विलयः। परं स्मृतिविलयोऽयमतीव कठिनतरः। अन्ततस्तदर्थं भगवतो भक्तिरनिवार्यैव। भगवत्स्मृत्यैव भगवत्परतयैव वा व्यर्थ-स्मृतिनिराकरण-

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

मिदं प्रभवति । अतएव भगवान् वदति—'अनन्यचेताः सततम्' इत्यनन्तरं 'यो मां स्मरति नित्यशः' 'युक्त आसीत मत्परः' इति च। अनन्यचेतस्त्वं स्मृतिनिराकरणमेव । तच्च अन्ततो 'यो मां स्मरति नित्यशः' इत्यनेन अर्थात् भगवत्स्मृत्यैव साध्यते । अपूर्तेः पूरणं वाह्यतो वस्तु समादायैव क्रियते सर्वस्या अपि । आत्मस्मृतेरपि पूरणं पर्यन्ते परमात्मन एव शक्यते । स हि आत्मनां निधिः । इत्थम् ईश्वरस्मरणम् ईश्वरप्रार्थना वा सर्वथाऽनिवार्येति तैः संसाधितमस्ति ।

एकादशव्रतानि

व्रतानां मूल्यम्

व्रतानि पुनर्भारतीयसंस्कृतेः सुप्रमाणितानि समुत्कर्षसाधनानि । तैरेव मानवः क्रमश उच्चादुच्चतरं पदं समारोढुं दृढावलम्बः प्रभवति । व्रतपालनं कस्यापि साधकस्य, सेवकस्य, ब्रह्मचारिणः, गृहस्थस्य, वानप्रस्थस्य, संन्यासिनः, किं बहुना, सर्वस्य मानवस्य अनिवार्यं वस्तु। अत एव वैदिके धर्मे 'चतुर्वर्ग-चिन्तामणि' प्रभृतिषु ग्रन्थेषु स्वतन्त्रमेव व्रतखण्डं निर्माय तदशेषतो व्याख्यानविषयतां गच्छति । जैन-बौद्ध-सिख-यावनाद्यवान्तरसम्प्रदायानपि तानि पूर्णतो व्याप्नुवन्ति । जैनधर्मे पुनः समग्रं जीवनमेव प्रायो व्रतमयं याप्यते साधकैः । महात्मगान्धिभिरपि व्रतान्येतानि समादृत्य स्वीययाऽनितरसाधारणया प्रतिभया अध्यात्मजीवनवत् व्यावहारिकेऽपि जीवने संक्राम्य मानवस्य उभयलोकपन्थानौ प्रशस्तीकृतौ । ते वदन्ति—

"प्रतिज्ञाहीनं जीवनं किल निराधारं गृहमिव । प्रतिज्ञाग्रहणं नाम निश्चलीभावः । अनिश्चलोऽदृढप्रतिज्ञश्च कस्य विश्वासभाग् भवेत् ? यो हि स्वात्मनो जीवनं प्रतिज्ञामयं न विदधाति, न स जातुचित् स्थैर्यं भजते ।

"भगवतः पतञ्जलेः पञ्चव्रतेषु यं कमप्येकं समादाय समुपास्तिश्चिकीर्ष्येत चेन्न सा सम्भविनी । किन्तु तेभ्यः सत्यमेकमाद्रियेत चेत्तदा तु तत्सम्भवः । यतो हि विशिष्टानि चत्वारि महाव्रतादिसत्ये निगूहितानि । अन्यच्च, युगस्यास्य कृते पुनर्न पञ्चैव, प्रत्युत एकादशव्रतान्येव महाव्रतोपव्रतानि परमावश्यकानि । श्री विनोवा भावे महाभागेन नीति-सूत्ररूपेण संग्रथितानि श्लोकद्वये। यथा—

अहिंसा सत्य अस्तेय ब्रह्मचर्य असंग्रह ।
शरीरश्रम अस्वाद सर्वत्र भयवर्जन ॥
सर्वधर्मसमानत्व स्वदेशी स्पर्शभावना ।
विनम्र व्रतनिष्ठा से ये एकादश सेव्य हैं ॥ इति ।

व्रतान्येतानि सत्यपालनादेव आविर्भाव्यानि । सर्वाण्यपि समवलानि । एक-

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

स्यापि वैकल्पे सर्व-वैकल्प-प्रसंगः। स एव यथार्थतो ब्रह्मचारी यो मनसा, वाचा कर्मणा च एकादशव्रतान्येतानि समाचरेत्" इति।

एतेषु आदितः पञ्च 'महाव्रत' नाम्ना प्रथितानि, प्राचीनकालतः समाजे प्रचलितानि। शिष्टानि षट् पुनर्महात्मनानेन संयोजितानि 'उपव्रत' कल्पानि। अहिंसा-सत्या-ऽस्तेय-ब्रह्मचर्याऽपरिग्रहरूपाणां महाव्रतानां यमापरपर्यायाणां प्रचलनं प्राचीनकालत एवाऽऽसीत्। परं तानि मुमुक्षुमात्रानुसरणीयान्येवाऽभवन्। उपव्रतसहितान्येतानि पुनः सर्वेषां मानवानां कृते निर्विशेषतया समादरणीयानीति महात्माऽयं व्याजहार। व्रतानामेतेषां साधनाय तेन महात्मना दक्षिणाऽफ्रीकादेशे भारते च नैका आश्रमसंस्थाः सङ्घट्टिताः। तत्र स्थित्वा स्वयं तान्यनुष्ठाय आश्रमवासिभिरपि तदनुष्ठानं कारयामास सः। एकादशव्रतानामेतेषां स्वरूपाणि तेषां पर्यवेक्षणञ्च परमुपयोगीति कृत्वा समासतस्तदत्र समुपन्यस्यते।

अहिंसा

अहिंसा-विषये महात्मभिरेभिः बहु प्रपञ्चितमास्ते। तेषां समग्रं जीवनमेव अहिंसाया मूर्तरूपम्। तदेव व्रतं व्याचिख्यासुरयं महात्मा वदति—"प्रेम नामैतादृशं वस्तु यत् कठोरतममपि शत्रुं मित्रतां नयति। सुषुप्तौ या किलाऽहिंसानाम्ना प्रथिता, सैवाऽवस्था जागरे प्रेमाख्यां भजते। अहिंसामार्गो न भयाप्लुतानां कापुरुषाणाम्। क्षात्रधर्मस्य परिसीमैव सा। यतो हि तत्रैवाऽभयस्य षोडशकलाः समुल्लसन्ति। अस्या आरम्भो गृहत एव भाव्यः। मानसिकोऽयं स्थितिविशेषः। एवमहिंसां विहाय कापि मर्यादा न किमपि मूल्यं धत्ते।

"इत्थमहिंसा नाम प्रेमसमुदायो वैरभावस्य सर्वथा त्यागश्च। तत्र दीनता भीरुता वा कथमपि पदं नादधतः। दृढता, वीरता, निश्छलता चैव तदुपादानभूता। केवलं जीवदयापालनेनैव न कामादिषड्रिपूणां जयः साध्यते। परं प्रतिमानवमहिंसैव तत्र प्रभवति। षड्रिपुविजयिनश्चेतः प्रेमरसाप्लुतः सागरो नामे" ति।

अहिंसाया विस्तृतं विवरणं योगशास्त्रे पुराणेषु जैनधर्मे च द्रष्टुं शक्यम्। भगवता पतञ्जलिना तु स्पष्टमेवोक्तम्—'अहिंसाप्रतिष्ठायां तत्सन्निधौ वैरत्यागः' इति। परं महात्मनाऽनेन साऽत्र इत्थं व्याख्याता यथा इह परत्र च सममेव समुपयुक्ता सिद्ध्यति। विनोबामहाभागैः पुनरस्या महात्मोक्तेः यादृशं विश्वतोमुखं भाष्यं कृतं तदपूर्वमेव। संक्षेपतस्तेषां मतेन अहिंसाया गणितं नाम 'आत्मदर्शनम् + हरिदर्शनम् = पूर्णाऽहिंसा' इत्येव निष्कर्षरूपेण वक्तुं शक्यते। अतो व्रतमिदं सर्वैरविशेषेण समनुष्ठेयम्।

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

सत्यम्

द्वितीयस्य सत्यव्रतस्य विषये महात्मानः सङ्गिरन्ते यत् 'सत्यं नाम मनोवाक्कायानामैकरूप्यम् । ततोऽप्यधिकं यदि किञ्चित् चेत्तदपि । जगति यद्वर्तते, आसीत्, भविष्यति वा, तदेव सत्यम् । एतादृशं सत्यं परमात्मैव, नहि ततः परं किञ्चित् । शुद्धसत्यस्य शोधनं नाम राग-द्वेषादिद्वन्द्वेभ्यो विमुक्तिः ।"

इत्थं यदा सत्यं परमात्मवद् एकमेव किमिति तदा एकस्यैव तस्य विभिन्नानि रूपाणि दृश्यन्ते जगति । एकमेव सत्यमन्यस्मै असत्यं प्रतीयते, कोऽत्र हेतुः ? प्रश्नमिमं समुत्तरयन्तो महात्मान आहुर्यन् "महत्तरस्य विम्बस्य आश्रयभेदेन विभिन्नरूपतेतिवत् सत्यस्यापि नैकानि रूपाणि दृश्यन्ते । तथाप्यन्ततस्तत् एकरूपमेव । एवं स्थितो 'सत्याचरणमेव मे लक्ष्यम्, इन्द्रियाधोनः कदापि न भविष्यामी' ति निश्चयवान् मनोभूमौ स्थित्वा मनसा यादृग्-रूपं सत्यमनुभवेत्, तदाचरणमेव सत्याचरणं तस्मै हितम् । परस्यानुकरणं न जातु सत्याचरणम् । मनसा, वाचा, कायेन चैकरूपमेव वक्तव्यं सत्यान्वेषकेण । इदं तु सर्वैः कर्तुं शक्यत एव, कामं चरमस्य सत्यस्य समनुष्ठानं सुदुष्करं भवेत् ।

"अन्यच्च, सत्योपासकस्य कृते मौनं महत्तरमुपकारकम् । भाषणेऽतिशयोक्तेरवकाशोऽवर्जनीय एव । परं मौनेन नूनमसत्यवर्जनं बहुशः सहजतश्च सिद्ध्यति । मितभाषी अपि विचार्य वदतीति मितभाषणेनापि असत्यतो रक्षणं सत्यपालनञ्च अर्थतः संसाध्यते" इति ।

त्रिकालाबाध्यं सत्त्वम्, तच्च ब्रह्मणो नीरूपस्य निर्धर्मिणः प्रथमं रूपं सहजो धर्मो वा । तदेव हि सत्यं महात्मनोऽस्य अन्ततः समुद्दिष्टम् । तदेव पुनर्यथा तैर्व्यावहारिकोपास्तिविषयतां नेतुं समुपदिष्टम्, सर्वं शास्त्रसार एव। सत्येन सह मौनस्य साध्य-साधनभावः पुनरतितरां स्मरणीयोऽनुकरणीयश्च । इत्थं प्रत्येकेन सत्यव्रतोपासनेन चरमसत्यपदं सर्वथा समाक्रमणीयमेव ।

अस्तेयम्

अस्तेयव्रतविषये गान्धिमहाभागा वदन्ति यत् "जगति परस्य कस्यचन वस्तुनोऽपहरणं चौर्यं स्तेयं वेति नाम्ना प्रथितमेव । तदभाव एवाऽस्तेयम् । पुनः स्वाधिकृतस्यापि पैतृकदायादेः विना तदाज्ञां ग्रहणमपि स्तेयमेव । किं बहुना, यत्स्वात्मने न परमावश्यकम्, तद्ग्रहणमपि अस्तेयव्रत-विप्रतीपमेव" इति ।

मार्गे पतितस्य अनधिकृतकल्पस्यापि वस्तुनो ग्रहणं स्तेयमेव । उपवास-काले स्वादचिन्तनमपि अस्यामेव कोटौ अन्तर्भवति । अन्ततः परोद्भासितस्य विचारस्य

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

स्वकीयविचाररूपेण समुपस्थापनमपि तथा । एवमादीन् स्थूलसूक्ष्मान् स्तेयप्रकारान् सावहितमालक्ष्य तेषां वास्तविकं वर्जनमेव अस्तेयव्रतं महात्मनां मतेन । अस्तेय-व्रतानुष्ठातुः कृतेऽतितरां नम्रता, विचारशीलता, सावधानता, निराडम्बरता च परमावश्यकी ।

महात्मनामेषां प्रेष्ठशिष्यैः श्रीविनोवा महाभागैः पुनरयं विषयः प्रकारान्तरेण व्याख्यातः। ते वदन्ति—"मनुष्यस्य त्रयो जीवनयात्रा-प्रकाराः भवन्ति : १. भिक्षा, २. व्यवसायः, स्तेयं च । भिक्षा नाम समाजस्य अधिकाधिकां सेवां कृत्वा स्वल्पात् स्वल्पतरं ग्रहणम् । व्यवसायो नाम समाजस्य विशिष्टां सेवां कृत्वा तस्याः समुचित-शुल्कग्रहणम् । इतोऽन्यत् स्तेयं नाम समाजस्य न्यूनातिन्यूनां सेवां कृत्वा अधिका-धिकग्रहणम् । प्रसङ्गविशेषे समाजस्य हानिमपि कृत्वा स्वार्थसाधनं स्तेयमेव। एता-दृशस्य स्तेयस्य सर्वथा परिवर्जनमेव अस्तेयव्रतं महात्मानुगृहीतस्य अस्तेयव्रतस्य रहस्यतमं वस्तु" इति ।

ब्रह्मचर्यम्

ब्रह्मचर्य-व्रतविषये महात्मनां व्रतमिदं यत् "यो मनसा विकारी तस्य ब्रह्मचर्यं स्खलितमेव मन्तव्यम् । विचारे निर्विकारतामविभ्रत् कोऽपि पूर्णब्रह्मचारी भवितुं न शक्नोति । तच्च 'पर'—दर्शनेनैव साध्यते । दृष्टे परादरे स्त्री-पुंभेद एव विलयं गच्छतीति कुतोऽष्टविधमैथुनान्यतमरूपस्य ब्रह्मचर्यविप्रतीपभावस्य प्रसरः । निर्भय-स्यास्य ब्रह्मचर्यस्य पालनं सर्वदा शुभचिन्तनेनैव साध्यम् । नामस्मरणमप्यत्र भूयसा सहायकं भवती"ति ।

व्रतस्यास्य निरूपणे महात्मनां हार्दमिदमवगम्यते यत् न केवलं जननेन्द्रिय-संयमनमेव ब्रह्मचर्यम् । प्रत्युत एकादशेन्द्रियाणां सर्वेषां संयम एव । आसक्तः परो न कोऽपि ब्रह्मचर्यस्य परिपन्थी । सङ्कुचितं प्रेमैव तस्यापरः पर्यायः । व्यापकं प्रेम तु अनासक्तावेव परिगण्यते । अतएव गार्हस्थ्येऽपि सन्तानमात्रकामनया स्त्रीसङ्गे ब्रह्मचर्यं न व्याहन्यते । तत्रापि प्रथमसन्तानपर्यन्तं नियतकाले ऋतुकाले तथा गमने इति हि शास्त्रकृतां निदेशः । प्रथमसन्तान एव धर्मज उक्तस्तैः। द्वितीयादि-सन्तान-जातानि पुनः कामजान्येवेति शास्त्रकृतां राद्धान्तः । एतादृशं पूर्णं निर्भयं ब्रह्मचर्यं तु परदर्शनेनैव साध्यत इति महात्मनां वचः सर्वथा शास्त्रानुमोदितमेव । यावत् तन्न सिद्ध्यति, तावत् शुभचिन्तन-भगवन्नामस्मरणेऽपि ब्रह्मचर्यसाधने परं प्रयोजके जनसाधारणानुकरणीये । सर्वदा शुभचिन्तनेन मनसि विकारप्रसरो वार्यते । भग-वन्नामस्मरणेन च दैवात् तादृशप्रमादावसरे समुपस्थितेऽपि नूनं ततो रक्षणं भवति ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

अपरिग्रह-व्रतम्

अपरिग्रहापरपर्यायस्य असङ्ग्रहव्रतस्य विषये महात्मानो वदन्ति यत् "अनावश्यकवस्तुनो ग्रहणमेव सङ्ग्रहः। सत्यशोधकेन सदैव असङ्ग्रहिणा भाव्यम्। आदर्शभूत आत्यन्तिकोऽपरिग्रहस्तु गृहान्न-वस्त्र-वलहीनो भूत्वा विचरणम्। अन्नादीनामावश्यकताः भगवानेव पूरयिष्यतीति मत्वा तथा वर्तनम्। अमुमेवापरिग्रहं हृदि विभाव्य जीवने यावच्छक्यम् अनावश्यकवस्तुनो ग्रहणं परिवर्ज्य व्रतमिदमनुष्ठेयं जनसाधारणेन। परिग्रहेऽस्मिन् निरर्थकविचारा अपि विषयतां भजन्ते। ईश्वरविमुखतापादका विचारा अपि तथा। अतोऽपरिग्रहनिष्ठैस्तेभ्यः सर्वेभ्यो विरतैर्भाव्यमि"ति।

महाव्रतमिदं सावधानतावृत्तेः समानान्तरं वक्तुं शक्यते। यावदावश्यकं तावदेव उपादेयम्, अन्यत् त्याज्यमिति सावधानवृत्त्यैव पालयितुं शक्यमिदम्। तदर्थं स्वल्पातिस्वल्पवस्तुभिः जीवननिर्वाहः स्वावलम्बनञ्च परमावश्यकम्। कस्यापि वस्तुनोऽधिकाधिकमुपयोगः स्थिरीकरणञ्चेति व्रतस्यास्य मुख्यं सूत्रम्। अपरिग्रहो नाम नालस्येन प्रमादेन वा वस्तुनो विनाशनम्। अपरिग्रहेणानेन सुखमविनाभूतम्। अन्ततो देहस्यापि अपरिग्रहपर्यवसायो त्यागः परमस्य लक्ष्यम्। देहं विसृज्य परमात्मनि विलीय तदीयशाश्वतानन्दानुभवे एवासङ्ग्रहस्य वास्तविकी सिद्धिः। तदेव लक्ष्यं पुरतः संस्थाप्य यथाशक्ति तदनुकूलं प्रयतनमेव असङ्ग्रहव्रतनिष्ठायाः सारतत्त्वं वक्तव्यं भवति।

शरीर-श्रम-व्रतम्

शरीर-श्रम-व्रतविषये महात्मगान्धिनाभिहितम् यत् "कायिक-श्रमो मानवमात्रस्य कृते सर्वथा अनिवार्य एव। जीवनयात्रायाः कृते श्रमकरणम् ईश्वरीयो निर्देश एव। यद्यस्य पालनं प्रामाणिकतया क्रियेत चेत् साम्प्रतिकः स्वामि-भृत्ययोः व्यापकः कलहो विवादः सङ्घर्षो वा सहजत एव विलयं गच्छेत्। अहिंसायाः पालनाय, सत्यस्य आराधनाय, ब्रह्मचर्यस्य च स्वाभाविकीकरणाय कायिकः श्रमो रामबाण एव। 'स्वीयस्वेदबिन्दून् पातयित्वा करपट्टिकामर्जय' इत्यस्ति 'बाइबिल' ग्रन्थस्य वचनम्। यज्ञा हि बहुविधा भवन्ति। तेषु करपट्टिका (रोटी) समर्जनाय शरीरश्रमोऽप्यन्यतमः। तथा प्रयतमाने विपुलाऽन्नलाभो राष्ट्राय, तेन च विविधचिन्ताभ्यो निवृत्तिश्च जायते" इति।

श्रीविनोबामहाभागैः यज्ञस्य व्याख्यैवेयं कृता यज्जगतो मानवः समाजस्य उपकारं गृह्णाति। तेन च तत्साधनानां ह्रासो जायते। यज्ञाः पुनस्तद्ध्रासस्य

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

पूर्तिमाचरन्ति। एवञ्च समाजोपभुक्तवस्तूनां ह्रासपूर्तिकरो यज्ञः सिद्धयति। सत्येवं शरीरश्रमस्य यज्ञत्वं सुस्पष्टमेव। महात्मगान्धिभिः शरीरश्रमस्यास्य सिद्ध्यै एव चरखा-चक्रं प्रस्तूय सूत्रनिर्माणविधिरुद्भावितः। तेन च दैनन्दिनावश्यकताया अन्नानन्तरं द्वितीयावश्यकताप्रकारस्य वस्त्रस्य स्वावलम्बनं सहजतः सिद्ध्यति। स्वावलम्बि-जीवनस्य महत्त्वं विदुषां कृते पृथक् निरूपणीयतां नापेक्षत एव। अस्मिन्नेव प्रसङ्गे महात्मभिः धनाध्यक्ष (ट्रस्टीशिप) कल्पनाप्रस्तावः समुपस्थापितो येन धनपति-निर्धनानां स्पर्धाऽपि अकस्मादेव विलयं याति। शरीर-श्रमव्रतेन च अध्यात्मपरिपन्थी तमोगुणो रजोगुणश्च मानवस्य नियम्यते। इत्थमनेन व्रतेन अध्यात्मसाधनेन सहैव लौकिक-स्वामि-सेवकसङ्घर्षः, धनपति-निर्धनसङ्घर्षोऽपि सहजतः परिह्रियते इति व्रतमिदं सर्वथाऽनुष्ठेयम्।

अस्वाद-व्रतम्

अस्वाद-व्रतविषये महात्मगान्धिनः प्राहुः—"अनायासेन यत्किमपि पाचितं भवति, सर्वमपि अस्माकं कृते ग्राह्यम्, न कथमपि त्याज्यम्। ईश्वरकृपां मत्वा सन्तोषपूर्वकं शरीरनिर्वाहाय तद्ग्रहणमस्वादव्रतनिष्ठायाः परं रहस्यम्। ब्रह्मचर्य-व्रतपालनाय सर्वेन्द्रियाणां संयमनस्य आवश्यकत्वेऽपि स्वादग्राहकस्य रसनेन्द्रियस्य संयमनं परमनिवार्यम्। आहारः सदैव स्वल्पः, स्वाभाविकोऽनुत्तेजकश्च भाव्यः। अन्ततोऽस्वादो नाम स्वादस्याभावः। स्वादश्च रस आनन्दो वा। औषधं यथा शरीररक्षणायैव भक्ष्यते, न तत्र स्वादस्याऽवसरः तथैव भोजनमपि ग्राह्यं केवलं शरीरयात्रानिर्वाहाय। इतोऽन्यत् सामूहिक-भोजनेनापि अस्वादनिष्ठा पोषणे साहाय्यं भवति। तत्र कस्याप्येकस्य रुचिविशेषेण पाको न निष्पाद्यते। अतएव सहजतः प्रतिव्यक्तिगता भिन्ना रुचयो नियन्त्र्यन्ते।"

अस्वाद-विषये विशेषतो विमर्शनीयं नावशिष्यते। अत्यन्तदौर्बल्यप्रयुक्तो दोषो नाम स्वादरसः, योहि महतो विपदः पदम्। स्वादलोभेनैव मीनाः बडिशे बध्यन्ते। 'जितं सर्वं रसे जिते' इति सूक्तिः प्रथिततमेति व्रतमिदं सर्वसाधारणैरनिवार्यतोऽनुष्ठेयमेव।

भयवर्जनम्, अभयं वा

भयवर्जनम्, अभयं वा दैवीसम्पत्तेः सर्वाग्रगण्यो गुणो भगवतैव गीतायां प्रोक्तः—अभयं सत्त्वसंशुद्धिः........' इत्यादिना। तद्विषये महात्मानो लिखन्ति—"अभयमन्तरा सत्यशोधनमेव कथम्? 'हरिनो मारग हो शूरानो कायरनुं काम जोरे' अर्थात् हरेर्मार्गः शूराणां वर्तते, न तत्र कापुरुषाणां प्रसक्तिः। अभयं नाम

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

समस्तबाह्यभयेभ्यो निवृत्तिः। काम-क्रोधाद्यान्तररिपुभ्योऽपि भयनिवृत्तिरावश्यकी। वस्तुत एतेषां जयेनैव बाह्यभयेभ्यो निवृत्तिः सुलभा जायते। परं 'सर्वमेतत् न मम, ईश्वरस्यैव एतत्सर्वम्, अहमपि तस्यैव' एतादृशनिष्ठाया दृढीकरणेन नूनं सर्वभयतो निवृत्तिर्भवति। उपनिषदाह—'तेन त्यक्तेन भुञ्जीथाः।' तस्यैव सेवका भूत्वा शून्यभावः स्वीक्रियते चेत् सर्वभयतो निवृत्तिः, सहजा शान्तिः, सत्यनारायणस्य दर्शनं च जायते।"

अभयव्रतमिदं सत्याहिंसाभ्यां सम्बद्धम्। अहिंसायाः पूर्वोक्तरूपद्वयेन आत्म-दर्शन-हरिदर्शनात्मकेन निर्भयतापरपर्यायमभयमाविर्भवति। भयमिदं शारीरिक-मानसिके व्यक्तिगत-सामूहिके चेति विभज्यते। तत्र शारीरिकं मानसिकञ्च व्याख्यातपूर्वम् उपरिष्टात्। व्यक्तिगतनिर्भयता पुनस्त्रिविधा श्रीविनोबामहाभागै-र्व्याख्याता वर्तते। सा चेत्थम्—१. निष्णाता निर्भयता, २. ईश्वरनिष्ठा निर्भ-यता, ३. विवेकिनी निर्भयता च। मर्यादितस्य विषयविशेषस्य अभ्यासेन जायमाना आद्या। द्वितीया भक्ति-वैराग्याद्याध्यात्मिक-साधनसाध्या। चरमा विवेकिनी निर्भ-यता च नाम भयप्रसङ्गेष्वपि चित्तस्थैर्यं विधाय विवेकेन सम्प्राप्तया स्थित्या सह-सफलसङ्घर्षः, अन्ततश्च हरिस्मरणेन निःसङ्कोचं देहोत्सर्गश्च। व्यक्तिगतनिर्भय-ताया इदं निष्कृष्टरूपम्। सामूहिक-निर्भयता पुनरस्माभिः वैदेशिकदासतापाशानां छेदनावसरेऽनुभूतपूर्वैव। सेयं निर्भयता अभयं वा अहिंसा-पालनेनैव साध्यत इत्यस्ति महात्मनः समग्रस्य व्याख्यानस्य तत्त्वम्।

सर्वधर्म-समानत्वम्

सर्वधर्म-समानत्वस्य सर्वधर्मसमभावस्य वा विषये गान्धिमहाभागा आहुर्यत् "सर्वधर्मसमभावेन स्वधर्मविषये न जातु औदासीन्यमायाति। प्रत्युत स्वधर्म-विषयिणः प्रेम्णः आन्ध्यं दूरीभूय तद्धि शुद्धं ज्ञानमयं सत् परिजायते। सर्वधर्मसम-भावेन अस्माकं दिव्यचक्षूंषि समुन्मीलन्ति। धर्मान्धिता-दिव्यदर्शनयोः उत्तर-दक्षिणायितमन्तरं नाम। सर्वधर्माणामैक्यं किल नावश्यकम्। प्रत्युत विभिन्नधर्मा-नुयायिनः परस्परमादरभावं सहिष्णुता च धारयन्तु। सर्वेषां धर्माणामात्मा एक एव। स हि विभिन्नप्रकृतिर्मूर्तरूपतां याति। कालस्य आन्तं यावदिदं वस्तु-चिरस्थायि। अतो मतिमता बाह्यंकलेवरमुपेक्ष्य विभिन्नाकृतिषु वर्तमान एक आत्मैव परिदर्शनीयः" इति।

सर्वधर्मसमभावाख्यमेतत् व्रतम्, एतन्नामाऽपि महात्मगान्धिनां चेतसि दक्षि-णाऽफ्रीका देशे सत्याग्रहप्रसङ्गे उत्स्फूर्तम्, भारते च पुनरभ्यासेन तद् दाढर्यंगतम्। अहिंसासत्याभ्यां सम्बद्धमेतद् व्रतम्। अनेनाऽनेकजातिशङ्कुलेऽपि अस्माकं भारते

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

देशे यूरोपीयराष्ट्रकल्पेषु विभिन्नप्रदेशेषु विलक्षणमैकमत्यं परिदृश्यते, यदा किल एकभाषाभाषिष्वपि अस्मदीय-प्रदेशकल्पेषु तद्राष्ट्रेषु तन्न दृश्यते। अस्य नूनमेको हेतुः सर्वधर्मसमभाव एव। परधर्मस्यानादरः पर्यायतः स्वधर्मस्यैवाऽनादरो मन्यते। प्रत्येकधर्मस्तदनुयायिनां कृते स्वधर्मरूपेण नूनं पूर्णतमः। विनोवा महाभागानां शब्दे स्वमातृरूपासनवत् प्रत्येकधर्मानुयायिभिः स्वधर्मोपासनं कर्तव्यम्। स्वतन्त्ररूपेण पुनः सोऽपूर्ण एव। सर्वधर्मसमवायेन सम्भाव्यमानस्य स्वधर्मप्रमादसन्देहस्य परिहारः पुनरुपरिष्टात् महात्मनैव कृत इति व्रतमिदं सर्वथा राष्ट्रियैक्यप्रसाधनम्।

स्वदेशी-निष्ठा

स्वदेशी-व्रतविषये महात्मानः प्रोचुः—"स्वदेशीभावनाया अयमर्थो यदस्माकं सा भावना, या किलास्मान् दूरतरं क्षेत्रं विहाय स्वसमीपवर्तिनः प्रदेशस्यैव उपयोगं सेवां च शिक्षयति। मम देशभक्तिर्वर्जनशीला ग्रहणशीला चाप्यस्ति। वर्जनशीलाया अयमाशयो यदहं सप्रश्रयं स्वकीयं चेतो जन्मभूमावेव केन्द्रितं करोमि। ग्रहणशीलाया इत्यस्यार्थो यन्मम सेवायां प्रतिस्पर्धाया विरोधस्य वा भावना लेशतोऽपि न वर्तते। स्वसम्पत्तेरेव उपयोगो विधेयो येन भवतां प्रतिवेशी कथमपि पीडितो न भवेत्। नायं शासकीयो नियमः, अपि तु महत्तरो जीवनसिद्धान्त एव। अहिंसाया प्रेम्णो वा समुचितपालनस्य कुञ्जिकैवेयमि" ति।

स्वदेशभक्तिविषये पुनः किन्नाम वक्तव्यम्? भगवता मर्यादा पुरुषोत्तमेन रामभद्रेणाप्युक्तम्—

'अपि स्वर्णमयी लङ्का न मे लक्ष्मण रोचते।
जननी जन्मभूमिश्च स्वर्गादपि गरीयसी॥' इति।

'स्वतन्त्रताऽस्माकं जन्मसिद्धोऽधिकारः, तं च नूनं गृहीत्वैव विरता भवेम।' इति मन्त्रस्य द्रष्टुः लोकमान्यतिलकस्य पुनरिदं व्रतं तदीयाभिक्रमस्य मुख्यतमंसाधनमेवाऽऽसीत्। तथापि महात्मनामयं सङ्केतः कथमपि नानुपेक्ष्यो यत्स्वदेशभक्तिः परदेशहितविप्रतीपा कथमपि न भाव्या। सर्वेषामविरोधेन ब्रह्मकर्मेदं समाचरितव्यम्। लक्ष्यं किल विश्वव्यापकम्, कार्यक्षेत्रं पुनः परिसरवर्ती प्रदेश एव भाव्य एतादृशेन भावेन कार्यकरणं स्वदेशीव्रतमुच्यते। स्वराष्ट्रसमुन्नतौ व्रतस्यास्य नितरामावश्यकत्वमित्यत्र मतद्वयं जातुचन न भवतीति सर्वथा सर्वैरविशेषं समुपास्यमिदम्।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

स्पर्शभावना-व्रतम्

स्पर्शभावनाविषये महात्मनां मतं यद् "अन्त्यजानां सेवा करणीयैव। न तत्र पापम्, अपि तु पुण्यमेव। रुग्णस्य अन्त्यजबालकस्य सेवा धर्म एव। रामायणे शबरी-निषादराजौ किलाऽस्पृश्यावेव आस्ताम्। परं रामभद्रेण तौ स्वात्मीयौ कृतौ। अन्त्यजा अपि मानवा एव। 'तेषाम् अस्पृश्यत्वमित्युक्त्वा अवमाननं तिरस्कारश्च मानवताविनाशवदेव भवतः।"

धर्मस्य वास्तविकं रहस्यमजानद्भिः केवलं कर्मकाण्डपरायणैः कर्मजडैः स्वात्मानं सर्वश्रेष्ठम्मन्यैः कैश्चिद्धर्मधुरीणैः निम्नवर्गेणाऽनेन सह क्रूरो व्यवहारः कृतः क्रियते च स्वात्मप्रतिष्ठापन-भावना। न ह्यत्र शास्त्रं तथाकर्तुं समुपदिशति। विपद्ग्रस्तोऽन्त्यजबालक एव किम्, पशु-पक्षि-प्रभृतितिर्यग्योनिगतोऽपि स्यात्, तद्विपन्निवारणं मानवस्य परं कर्तव्यम्। शुनि श्वपाके विद्याविनयसम्पन्ने ब्राह्मणे गवि हस्तिनि च तिष्ठन्तमात्मानम् एकत्वेन द्रष्टुं समुपदिशच्छास्त्रं कथं नाम स्वबान्धवानामन्त्यजानां परिपीडनमनुमन्येत? भारतीयसंस्कृतौ स्पृश्यास्पृश्यव्यवस्थाया न जातु घृणामूलकत्वम्। अपितु पूर्वजन्मीय-कर्मविपाक एव सः। परमादरणीयां मातरमपि रजस्वलाकाले वयं न स्पृशामः। नैतावता साऽस्मभ्यमनादरणीया समुपेक्ष्या वा जायते। परमनधिकारिणां केषाञ्चन एतद्रहस्यानभिज्ञानां स्वात्मगौरवप्रख्यापनचणानां स्वभ्रातृभूतानामन्त्यजानां परिपीडनेन प्रतिक्रियापीडिताः समुद्विग्नाः महात्मसुलभकरुणप्रकृतयोऽगान्धिमहाभागाः स्पर्शभावनमपि द्रुतत्वेन स्वीकर्तुमतिशयं प्रेरिता अभवन्। तेषां स्पर्शभावना व्रतविषयकमुपरितनं विवेचनमपि निर्विशेषं सर्वभारतीयैः स्वीकर्तुं शक्यम्। प्रतिगतानामेतेषामस्मद् भ्रातॄणां वास्तविकोत्कर्षकारिणी सुविधा अप्रदाय स्पर्शभावना व्रतनाम्नाऽद्य तदनुयायिभिः प्रतिहिंसाप्रवणं यत्कर्म समाचर्यते, तन्नाम कियदनेन महात्मनः स्पर्श-भावना व्रतेन सङ्गच्छते इति विवेकिनां विचारणीयं वस्तु।

अन्यच्च, वैदेशिकशासकैः प्रतिगतममुं वर्गं लोभेन समाकृष्य 'विभज्य शासनकरणनीतेः' (फूट डालो और शासन करो) प्रयोगोऽस्माकं भारतीयानां विरुद्धश्चिकीर्षितपूर्वः। तेनापि महात्मनाऽनेन स्पर्शभावनाया व्रतत्वेन स्वीकारः कृतश्चेत् तन्नातिविस्मयावहं परमदेशभक्तस्य कस्यच न कृते। तेषां पवित्रकरुणाप्लुतभावनानिकषपूतं व्रतमिदं तेनैव रूपेण न कस्यापि विप्रतिपत्तिकरं भवेदिति संभावयामः।

विनम्र-भावना

विनम्रता-व्रतविषये श्री गान्धिन ऊचुः—"वस्तुतो व्रते नम्रतायाः प्रवेशस्तस्य गौरवमेव न्यूनतामापादयति। अभ्युपगमसिद्धान्तोऽयं यदहिंसा-ब्रह्मचर्यनिष्ठो नूनं

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

नम्रो भवेत् । नम्रता-विहीना अहिंसा हास्यव्यङ्ग्यचित्रकल्पा । स्वात्मानं रजःकण-वत् यावन्न मन्यते, तावदहिंसाव्रतग्रहणमसम्भवि । मनसि यावदहंभावो न ताव-दीश्वरदर्शनम् । ईश्वरमिलनं चिकीर्षितं चेत् स्वयं शून्येन भवितव्यमेवे" ति । ८

अत्र विषये किमधिकं वक्तव्यम् ? अहङ्कारस्तु सर्वस्यैव अनर्थजातस्य बीजं शास्त्रकृद्भिर्निगदित इति तत्परिहारो भारतीय-संस्कृतेः प्राणपदमेव । नम्रत्वमिदं फलोद्गमेन सहजतः सिद्ध्यति । ततः पूर्वं किल तद्यत्नसाध्यम् । स्वस्य शून्यत्व-भावनम्, परमेश्वरस्य च सर्वशक्तिमत्त्वस्वीकारः जगतश्च तद्रूपत्वप्रत्ययो नम्र-ताया अमोघानि साधनानि वक्तुं शक्यन्ते । अत इदं व्रतमपि सर्वथा सर्वैरप्रमदि-तैरनुष्ठेयम् ।

इदमत्राऽवधेयम्—यद्यपि एकस्मिन् सत्यात्मके महाव्रते एव पञ्चानां महाव्रताना-मन्तर्भावो जायते । किंबहुना, सत्यं यथा साधनं तथैव साध्यमपि ! परमलक्ष्यस्य ब्रह्मणस्तद्रूपत्वात् । तथापि निरुपधिकरुणावता भगवता पतञ्जलिना अहिंसा-सत्या-ऽस्तेयादिपञ्चव्रतानां महाव्रतत्वेन गणनं शिष्य-बुद्धि-वैशद्यार्थं साधकानां साधनानुष्ठानसौविध्याय च कृतम् ! एवमेव महात्मगान्धिभिरपि पञ्च महाव्रतैः षण्णामुपव्रतानां पृथक् गणनं लौकिकाऽलौकिकोभयविधानां साधकानाम् उभय-विधसाध्यसाधनायैव विहितम् । तेन च न विभागासङ्गतिकल्पनाया लेशतोऽप्यव-सरः इति ।

इत्थं महात्मगान्धिमहाभागैः भारतभुवं समागत्य एकादशव्रतानां य आचारो विश्वस्य, विशेषतो भारतराष्ट्रस्य कृते प्रदर्शितः, स्वीयया अनितरसाधारणया प्रतिभया अध्यात्ममात्रफलानि महाव्रतानि राष्ट्रियहितसन्दर्भेण व्यापकीकृत्य व्या-ख्यातानि, आवश्यकनव्योपव्रतानि पुनर्विश्वहिताविरोधेन ससामयिकानि सहजानु करणीयरूपाणि प्रसाधितानि, तेषामीश्वरप्रार्थनादीनाञ्च समासतः परिचयसमी-क्षणमस्माभिरत्र विहितम् । वैज्ञानिकेऽस्मिन् युगे विश्वस्य, भारतराष्ट्रस्य च कृते अनन्यसाधारणो दायोऽयं तेषां महात्मनाम् । ईश्वरप्रार्थनासमन्वितोऽयं धर्माचारो नूनम् इहामुत्र जीवनयोः सुखसाधकं महत्तरं जीवनपाथेयं नाम । यदि नाम गान्धि-शतसंवत्सरी-महोत्सव-प्रसङ्गेन वयमस्य दायस्य वास्तविकं मूल्यमभिलक्ष्य जीवने तमनुकर्तुं प्रवृत्ताः प्रभवेम, तदैव महतः समायोजनस्यास्य वास्तविकं साफल्यं भवेत् । तेषां प्रेष्ठस्यास्य राष्ट्रस्य समुन्नत्यै अमरात्मानस्ते महात्मान एवास्मान् तथा कर्तुं सद्बुद्ध्या योजयन्त्विवत्येवास्ति जनस्यायं तेषां पदपाथोजयोः श्रद्धामयः शब्द-सुमनाञ्जलिः ।

●

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

गान्धिनः शिक्षा-क्रान्तिः

श्रीरामनाथ पाठकः 'प्रणयी', एम्-ए० (द्वयम्), डिप-इन-एड
साहित्यव्याकरणायुर्वेदाचार्यः

विद्यावतां सुविज्ञातमिदं यद्गान्धिनःसर्वस्वं सर्वोदयदर्शनमस्ति । तस्य च मुख्यस्तम्भाः सत्यमहिंसा प्रेम च विद्यन्ते । गान्धी सत्यमेवेश्वरं मनुते स्म । सत्ये तस्याविचलान्तिमाश्रद्धासीत् ।

गान्धी लिखितवान् यत् सत्याहिंसे एवं संवद्धे स्तो यत्तयोः पार्थक्यमसम्भवमस्ति । सोऽहिंसां प्रसाध्यां सत्यञ्च साधनं मत्वा चलतिस्म । साधन-स्वीकृतिर्मानिवधर्मोऽस्ति, यतो साध्यप्राप्तिः तदुपरि निर्भरा विद्यते । गान्धिनोऽहिंसा केवलं हिंसानिवृत्तिपर्यन्तमेव न सीमिता, प्रत्युत तदहिंसाकल्पनापि तद्व्यक्तित्वसदृश्येवालौकिकं रूपं धत्ते । गान्धिमतेनाहिंसाया अर्थोऽस्ति प्राणिमात्रंप्रति सद्भावना । एषैव सद्भावना श्रद्धा प्रेम वा कथ्यते ।

अहिंसोपासकः गान्धी प्रेम्णोरामराज्यं विधातुं समीहते स्म । संसारः याः दलितजातीः घृणया पश्यति स्म ता एव गान्धी हरिजन, शब्देनाभिधाय परमप्रेम्णाङ्गीकृतवान् । वर्गवर्णधनशक्तीनां कृत्रिमसीमाभ्यो वहिरेकस्य स्वतन्त्रलोकस्य स्थापनां गान्धी समीहते स्म । तस्य विचार आसीद्यत् सत्या मानवसेवैवेश्वरसेवा विद्यते । स हीश्वरं सर्वव्यापिनममन्यत । तस्याधारशिक्षा (वुनियादी शिक्षा) सिद्धान्ता अपि तस्य तेष्वेव विचारेष्ववलम्बिता आसन् ।

एवं हि सर्वोदयव्यवस्थायां सर्वे स्वावलम्बिनो भविष्यन्ति, सर्वे उत्पादकाश्च । यत आर्थिक समतैव सर्वोदयाधारो विद्यते । अद्य तु वयं पश्यामो यदार्थिकजीवनं पुञ्जपतीनां हस्तेऽस्ति तथा सामाजिकजीवनं प्रतिक्रियावादिनां करे । एतस्य परिणाम एष जायते यत् सर्वत्रासंतोषः दृश्यते । अतः समाजसंस्कारस्यैक एव मार्गोऽस्ति, स च शिक्षया व्यक्तित्वनिर्माणस्य । गान्धी, विचारितवान् यत् मनुष्यः स्वप्रारम्भिकवर्गेष्वेव तद्योग्यो भवति । अत एव तेन सर्वोदयलक्ष्यप्राप्तये (बुनियादी शिक्षा) आधारशिक्षा-योजना समुपस्थापिता । तस्याः योजनाया अप्याधारः आध्यात्मिकजीवनदर्शनमस्ति । एषैव च गान्धिनः परा शिक्षाक्रान्तिर्विद्यते ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

१९३७ तमेशवीये २३ अक्टूबरे वर्धायां भारतीयशिक्षाशास्त्रिणामाहूते सम्मेलने गान्धिनाधारशिक्षायाः निम्नांकिताः मूलभूताः सिद्धान्ताः समुपस्थापिताः—

(१) प्रथमसप्तवर्षपर्यन्तं देशस्य सर्वे बालकाः बालिकाश्च निःशुल्कामनिवार्याञ्च शिक्षां प्राप्नुयुः

(२) शिक्षामाध्यमत्वेन मातृभाषा प्रतिष्ठिता स्यात् ।

(३) शिक्षा-केन्द्रे कश्चनोद्योगोभवेत् ।

(४) शिक्षाया एषा प्रणाली शनैः शनैरध्यापकानां वर्त्तनमपि निष्कासयेत्, एवं शिक्षा स्वावलम्बिनी स्यात् ।

गान्धिन एषैव शिक्षापद्धतिः 'नई तालीम' 'बुनियादी शिक्षा', आधार शिक्षादिनामभिराख्याता ।

शिक्षाया अर्थोऽक्षरज्ञानमात्रमेव नास्ति । अक्षरज्ञानन्तु शिक्षायाः साधनमात्रमस्ति । शिक्षाया अर्थस्तु वर्त्तते यद्बालकः समग्रेन्द्रियैः सत्कर्म कर्त्तुं शिक्षेत् । स हि कर्मेन्द्रियाणां ज्ञानेन्द्रियाणाञ्च सत्प्रयोगमवगच्छेत् । अत एवाधारशिक्षायाः वाहनभूतस्य कस्यचन ग्रामोद्योगस्य तस्यां परमावश्यकता विद्यते । गान्धिनः सत्यस्यापि प्रयोगः तदीयः शिक्षाप्रयोग एवास्ति ।

गान्धी प्रयोगैः ज्ञातवान् यन्नैतादृशःकोपि जनोऽस्ति, यस्य हृदये प्रेम न भवेत् । अतः प्रेमातिरिक्तं, न किञ्चन वस्तु, यत्मानवहृदये विजयं प्राप्नुयात् । आधारशिक्षायां प्रेम्णः सद्भावस्य च क्रियात्मके रूपे दृश्येते ।

गान्धिनः शिक्षासम्बन्धी सर्वप्रथमः प्रयोगः १९११ खीष्टाब्दे अफ्रिका निकटे जोहंसवर्गसमीपे 'टालस्टायफार्म'-नामके स्थानेऽभवत् । तस्मिन् स्थाने 'हिन्दू-मुस्लिम-पारसी' जातीनां जनाः आसन् । यदा तेषां बालकानां शिक्षा-समस्योपस्थिता तदैका पाठशालोद्घाटिता । गान्धी तस्यांस्वयं शिक्षककार्यभारं गृहीतवान् ।

स उद्योगद्वारेण कार्यं प्रारब्धवान् । एतादृशंवातावरणञ्च निर्मितवान्, येन बालकानां शारीरिक-मानसिक-नैतिक-विकासाः मनोवैज्ञानिकप्रणाल्या भवेयुः ।

१९१५ खीष्टाब्दे यदा गान्धी भारतवर्षे समागतः, तदा सर्वप्रथमं 'साबरमती' आश्रमे, ततश्च सेवाग्रामाश्रमे एतस्याः प्रयोगं कृतवान् । प्रारम्भिक-शिक्षाध्ययनक्रम-योजना-निर्माणार्थञ्च तेनैका विशेषज्ञसमितिराहूता, यस्याः अध्यक्षतां स्वर्गीयः डाक्टर जाकिर हुसेन महोदयोऽकरोत् ।

तस्यां निम्नांकिताः सदस्याः आसन्,

१. आर्यनायकम्

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

२. श्री विनोवा भावे
३. काका कालेलकरः
४. किशोरीलाल मशरुलालः
५. कुमारप्पा
६. के० जी० स्यादेनः
७. कृष्णादास जाजः
८. प्रो० के जी शाहः
९. श्रीमती अरुणा देवी

श्रीमत्या अरुणादेव्योल्लिखितसमितौ विस्तृतशिक्षाक्रमोनिर्मितो यश्च पश्चात् १९३८ खीष्टाब्देऽखिलभारतवर्षीयहरिपुराकांग्रेसे रक्षितः। वाद-विवादानन्तरं कांग्रेसेनैतस्याः योजनायाः पूर्ववर्त्तिनस्त्रयो नियमाः स्वीकृताः।

एवं हि गान्धिमतेन शिक्षा (Head) शिरसि, (Hand) हस्ते तथा (Heart) हृदये आधृतास्ति। क्रियाशीलता तथानुकूलोऽवसरः तस्या आधारशिले स्तः। अनुकूलावसरं वीक्ष्यैव कर्म-ज्ञानयोरभिन्नः सम्बन्धः स्थाप्यते। एवं समवाय-आधारशिक्षायाः द्वितीयं नामास्ति। यो ऽवसरः सहजरूपेणास्माकं सम्मुखे आयाति, तस्य सम्यक् रूपेणोपयोगः समवाय-कला वर्त्तते। वुनियादी शिक्षायामेष समवायः परमावश्यकोऽस्ति। कर्मद्वारेण शिक्षा समवायापरनाम विद्यते।

कर्मद्वारेण शिक्षायाः प्रणाली प्राचीना वर्त्तते। वैदिकयुगे विद्यार्थिनोऽध्ययने-रता अभवन्। ते गुरोराश्रम एव निवसन्तः विद्याध्ययनमकुर्वन्। ते केवलं सिद्धान्त-रूपेणैव शिक्षां न प्राप्नुवन्ति स्म, प्रत्युत तेषां शिक्षायां प्रयोगस्यापि स्थानमासीत्। यतः तयैव पद्धत्या शिक्षिताः अनेकेऽर्थशास्त्रिणो दार्शनिकाः महात्मानो जाताः।

अतो गान्धिना समुपस्थापितायां शिक्षायामुत्पादनस्योद्योगस्य च महत्त्वपूर्णं स्थानमस्ति।

उद्योगः ज्ञानं जनयति, ज्ञानञ्चानुभूत्या जायते। अनुभूतिश्च कार्यादुत्पद्यतेऽतो प्रमाणितमेतत् यत् ज्ञानस्रोतः कर्म, उद्योगोवास्ति।

उद्योगकेन्द्रिता शिक्षापद्धतिः मनोवैज्ञानिकी विद्यते। यतः उत्पादककार्याणि कुर्वन्तीयं विद्यार्थिनांभाविजीवनस्य व्यवस्थामापादयति। उद्योगः वालकानां स्वाभा-विकप्रवृत्तेः क्रीडायाः रचनायाः संयमादेश्च प्रवृत्तीःविकासयति। एतेन विकासेन-तेषामात्मप्रदर्शनभावना तुष्यति। उदाहरणार्थं तर्कुचक्रस्य, कार्पासस्य वस्त्रादेश्च विषये ज्ञानमवाप्य ते स्व-जिज्ञासावृत्तिं शमयन्ति। क्रोष्टनिनमहोदयः कथयति यत्

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

"मनुष्यः यस्या अपि श्रेण्याः भवेत्, विज्ञानस्योद्योगस्य विकासकृतेऽपि तथा समाजस्य सामूहिकलाभदृष्ट्या स एतादृशीं शिक्षां प्राप्नुयात्, यया स विज्ञानस्य पूर्णशिक्षया सह 'दस्तकारी'-शिक्षां योजयेत् ।

अक्षरज्ञानस्य शिक्षया सहोद्योगशिक्षाप्यावश्यकीति विषये स्विटजरलैण्ड (Switizer land) देशस्य शिक्षाविशारदः श्रीप्रिक्ट महोदयः कथयति यत् वालकानामध्ययनमेतादृशैरनुभवैः उत्तरदायित्वेन च सह सम्पन्नं भवेत्, येन विद्यालयपाठ्यक्रमः एकस्यां सजीवायां विज्ञानशालायां परिणतः स्यात् ।"

पूज्यगान्धिना वुनियादी शिक्षायै रक्तहीनाग्रदूतस्य संज्ञा प्रदत्ता । स वुनियादी-शिक्षया समाजस्य प्राचीनमूल्यानि समूलानि समाप्य तेषां स्थानेषु नवमूल्यानां स्थापनमहत्त्वाकाङ्क्षावानप्यासीत् । वुनियादी शिक्षायां नियमानां स्पष्टीकरणं कुर्वन्नेकदासौ एतल्लक्ष्योन्मुखमप्युक्तवान् "आधारशिक्षायाः (नईतालीमस्य) पूर्व-वर्त्ति उद्देश्यं केवलं संतुलितं सामञ्जस्यपूर्णञ्च व्यक्तित्वमेव नास्ति, प्रत्युत संतुलितः सामञ्जस्यपूर्णः समाजोऽप्यस्ति । स च न्यायपूर्णः स्यात् । येन धनिक-निर्धनयोः काचन विभाजिका मध्यरेखा न स्यात्, यत्र प्रत्येकजन आजीविकाश्वासनं प्राप्नुयात् तथा प्रत्येकनागरिकः स्वतन्त्रताधिकारं प्राप्नुयात् ।"

निम्नांकितपंक्तिषु सामाजिकमूल्यानां संक्षिप्ता विवेचना प्रस्तूयते ।

१. डाक्टर जाकिर हुसैन समित्यनुसारं "सामाजिकदृष्ट्या शिक्षायामेतादृशानां क्रियात्मकोत्पादकोद्योगानां समावेशेनैव वुद्धिज्ञानि-श्रमज्ञानिनोर्मध्यस्य रेखा छिन्ना भविष्यति । एवं श्रमनिष्ठा तथा मानवैकता सर्वप्रकारैः प्रोत्साहिते भविष्यतः तदा शिक्षिताशिक्षितवर्गयोः पार्थक्यं समाप्तं भविष्यति ।

१. कुलाधृतः जन्माधृतश्च वर्गभेदः समाप्तः स्यात् ।

३. समाजे सत्याहिंसा-सिद्धान्तानां स्थापना । सत्याहिंसयोः सिद्धान्तानां राष्ट्रजीवने प्रयोगाय वुनियादी शिक्षा यतते ।

४. सहयोगि-समाजस्य रचना ।

५. वालकेषु सुनागरिक-गुणानां विकासः

समाजः व्यक्तिभिः निर्मीयते । यदि कस्मिँश्चिदपि समाजे व्यक्ति-चरित्रं साधु नास्ति, तदा समाजः नोन्नतिं विधास्यति । वुनियादी शिक्षा एतद्विषये पूर्णा प्रबुद्धा वर्त्तते । सा व्यक्ति समाजमेकांकरूपेण गृह्णाति । तद्विकासञ्च समाजोन्नतिसोपानं मनुते । समाजे उद्योगेनान्यवृत्तिभिर्वा तदीयविकासस्य व्यवस्था क्रियते ।

आर्थिकदृष्ट्यापि वुनियादी शिक्षायाः महत्त्वं न तिरोहितं विद्यते ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

स्पष्टमस्ति यत् 'बुनियादी शिक्षा'—आधारशिक्षा दर्शनपूर्णा तथा भारतवर्षस्य सामाजिकार्थिकावश्यकतानुरूपा विद्यते। एषार्थिकविषमताः समाप्य बालकान् शान्तानात्मनिर्भरान् च करोति। एषा ग्रामोद्योगं पुनर्जीवितं विधाय ग्रामीणार्थनीतिं पुनः प्रतिष्ठापयति। गान्धिनः एषैव सर्वोत्तमा शिक्षा-क्रान्तिः विजयते।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri